CC-0. In Public Domain. Digitization by eGangotri

४११.अ.
वाद्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदान्त अं. ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खण्डनखण्डखाद्यम् ।

महामहोपाध्याय श्रीहर्ष विरचितम् ।

कलिकातानगरे

श्रीयुक्त वावु भुवनचन्द्रवसाक-संस्थापित संवाद-ज्ञान-
रत्नाकराख्य यन्त्रे तद्द्वारैव मुद्रितं
प्रकाशितञ्च ।

निमतलाघाट ष्ट्रीट ८ संख्यक भवन ।

सन १२८४ साल ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खण्डनखण्डखाद्ये

प्रथमः परिच्छेदः ।

अविकल्पविषय एकः स्थाणुः पुरुषः श्रुतोऽस्तियः श्रुतिषु । ईश्वरमुमया न परं वन्देऽनुमयापि तमधिगतम् ॥

मानोपनोदनविनोदनते गिरीशे
भास्येव सङ्कुचितयोरुचितन्तदिन्दोः ।
भेत्तुम्भवानिशमुचितं दुरितं भवानि
नम्रोभवानि घनमङ्घ्रिसरोजयोस्ते ॥

शब्दार्थनिर्व्वचनखण्डनया नयन्तः
सर्व्वत्र निर्व्वचनभावमखर्व्वगर्व्वान् ।
धीरा यथोक्तमपि कीरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम् ॥

अथ कथायां वादिनोर्नियममेतादृशं मन्यन्ते प्रमाणादयः सर्व्वे तन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयं । तदपरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न क्षमन्ते। तथाहि प्रमाणादीनां सत्त्वं यद-
भ्युपेयं कथकेन तत् कस्य हेतोः किं तदनभ्युप-
गच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसा-
हित्यनियतस्य तस्य प्रवर्त्तयितुमशक्यत्वात्, उत
कथकाभ्यां प्रवर्त्तनीयवाग्व्यवहारं प्रति हेतु-
भावात्, उत लोकसिद्धत्वात्, अथ वा तदनभ्यु-
पगमस्य तत्त्वनिर्णयविजयातिप्रसञ्जकत्वात्।
न तावदाद्यः तदनभ्युपगच्छतोऽपि चार्व्वाक-
माध्यमिकादेर्वाग्विस्तराणां प्रतीयमानत्वात्,
तस्यैव वा अनिष्पत्तौ भवतस्तन्निरासप्रयासा-
नुपपत्तेः। सोयमपूर्व्वः प्रमाणादिसत्त्वानभ्युप-
गमात्मा वाक्स्तम्भनमन्त्रो भवताभ्यूहितो नूनं,
यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतसू-
त्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा
नोपदिष्टाः, भगवत्पादेन वा बादरायणीयेषु
सूत्रेषु भाष्यं नाभाषि। प्रमाणाद्यनभ्युपगमेपि
प्रवर्त्तन्तां तन्मते वाचोभङ्गाः तास्तु साधनबाध-
नक्षमा न भवन्ति तावतेति ब्रूमइति चेन्न
प्रमाणाद्यनभ्युपगमस्य प्रवर्त्तितत्वं तदीयसाधन-
बाधनाक्षमतायां न नियामकं, किन्तु सद्वचना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासलक्षणयोगित्वमित्यनभ्याभ्युपेयं भवता येनाभ्युपगम्यापि प्रमाणादीनि प्रवर्तिताः मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरव्यवहारादिभिरपरैस्तथाभूता इति कथ्यन्ते। यदि त्वस्मद्वचसि सद्वनाभासलक्षणं न भवान् दर्शयितु मीष्टे, तदा अनभ्युपगम्य प्रमाणादि भवता प्रवर्तितोयं व्यवहार इति शतकृत्वस्त्वयोच्यमानेऽपि नास्माकमादरः अन्यथाभ्युपगम्य प्रमाणादीनि भवता प्रवर्तितोयं व्यवहार इत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं शक्यतएव। ननु यदि प्रमाणादीनि न सन्ति व्यवहारएव धर्म्मो कथं सिद्ध्येरत् दूषणादिव्यवस्था वा कथं स्यात् सर्व्व विधिनिषेधानां प्रमाणाधीनत्वात्। मैवं। न ब्रूमोवयं न सन्ति प्रमाणादीनीति स्वीकृत्य कथारभ्येति। किन्नाम सन्ति न वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैः, यैया स्वीकृत्य तानि भवता व्यवह्रियते तथा व्यवहारिभिरेव कथा प्रवर्त्तयतामिति, अन्यथा न सन्ति प्रमाणादीनीति मत मस्माकमारोप्य यद्द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवता दूषणमुक्तं तदपि न वक्तुं शक्यं, कीदृशीं मर्य्यादामालम्ब्य प्रवर्त्तितायां दूषणमुक्तं, किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां वादिभ्यां प्रवर्त्तितायां कथायाम् उत, सत्त्वमभ्युपेत्य, अथैकेन सत्वमपरेण चासत्वमङ्गीकृत्य। न तावदाद्यः अभ्युपगतप्रमाणादिसत्वं प्रति तादृक्पर्य्यनुयोगानवकाशात्, द्वितीये तु स्वतोऽप्यापत्तेः, न तृतीयः तथैव कथान्तरस्य प्रसक्तेः उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य, अन्यथा स्वाभिप्रायमालम्ब्य तेनापि तद्वचसि यत्किञ्चिद्रागात्मनि दूषणेऽभिहिते कस्य जयो व्यवतिष्ठताम्, प्रमाणाद्यभ्युपगन्तुरेव यानन्नियमभरयन्त्रणा महती स्यात् तस्मात् प्रमाणादिसत्वासत्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा कथायां प्रवर्त्तितायां भवतेदं दूषणमुक्तं युक्तमेव तथा सति स्यात् योऽयं भवान् स्वाभिप्रायमपि नावधारयितुं शक्तोऽतिदूरत स्तस्मिन् पराभिसन्धानावधारणप्रत्याशा। अथ वादीकृत्य दुर्वैतण्डिकं, तस्मिन् बोधोऽभिधीयतइत्येव नेष्यते, शिष्याचार्यस्तु तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथानधिकारं ज्ञाप्यते अतएव भाष्यकारः सप्रयोजनमनुयुक्तो यदि पद्यतइत्याह स नतु प्रतिपद्यसइति। नैवम्। शिष्यादीन् प्रत्यपि चार्व्वाकादेर्दोष्यत्वमित्येवाभिधातव्यम्। कथञ्च तथा स्यात् तस्य कथाप्रवेशात्तयोस्तद्वाधाच्चम-त्वात्कथायामेव हि निग्रहः। नापि द्वितीयः तथाहि स्यादप्येवं यदि कथकप्रवर्त्तनीयवाग्व्य-वहारं प्रति प्रमाणादीनां हेतुता, तत्सत्वान-भ्युपगमे निवर्त्तेत, नचैवं सम्भवति, तथा सति तत्सत्वानभ्युपगन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत, हेत्वनुपपत्तेः। उक्तञ्चाहमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपाप-लापो न शक्यत इति। अथ मन्यसे कथकवाग्-व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्वं सत्वाच्चाभ्युपगमः यत्सत्तदभ्युपगम्यइतिस्थितें-रिति। नैवं। कयापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्वं सत्वाच्चाभ्युपगमो भवता प्रसाध्यः कथनात्पूर्व्वं तत्तत्त्वावधारणं वा पर-पराजयं वा अभिलषद्भ्यां कथकाभ्यां यावता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यथा तु द्वितीयस्यैव । तादृशान्तरीजनृतया व्यवहर्तव्यौ प्रामाणिकः पक्षस्तात्त्विकतया व्यवहर्तव्य इत्यादि रुप अतएव

विना तदभिलषितं न पर्य्यवस्यति तावदनु-रोद्धव्यम् तच्च व्यवहारनियमस्यानुबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यतइति व्यवहार-नियमसमयमेव बध्नीतः सच प्रमाणेन तर्केण च व्यवहर्त्तव्योवादिना प्रतिवादिनापि कथा-ङ्गतत्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमं निग्रहस्थानं तस्य दर्शनीयम् तद्व्युत्पादने प्रथ-मस्य भङ्गोव्यवहर्त्तव्य,नियमवत्वेपि हेतुर्वक्तव्यः तथा च सोपि हेतुः कथायां प्रवृत्तायामभि-धातुं युक्तइति प्रमाणसत्वाभ्युपगमहेत्वभि-धानवत् प्रत्यवस्थान मनवकाशं द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्था-जयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परि-गृहीतत्वात् । नचैवं प्रमाणानुपज्ञस्वेच्छामात्र-गृहीतमूलत्वान्मूलापरिशुद्धिसम्भवेन सर्व्व वि-चारविचार्य्यतत्फलविप्लवापत्तिः स्यात् । अ-विद्यमानादिपारम्पर्य्यायातस्य लोकव्युत्पत्ति-गृहीतत्वादस्य च तस्यान्यथाभावासम्भाव्यता-लक्षणस्वतःसिद्धिशुद्धत्वात् । नच प्रमाणादीनां सत्तामीत्थमेव ताभ्यामङ्गीकर्त्तुमुचिता, तादृश-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः, प्रमाणादिसत्तामभ्युपेत्यापि तथा व्यवहारनियमव्यतिरेके कथा प्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य वाभिलषितस्य कथकयोरपर्य्यवसानात् । नापि तृतीयः लोकव्यवहारो हि प्रमाणव्यवहारो वा स्यात्, पामरादिसाधारणव्यवहारो वा । नाद्यः । विचारप्रवृत्ति मन्तरेण तस्य दुर्न्निरूपत्वात्, तदर्थमेव च पूर्व्वं नियमस्य गवेषणात् । नापि द्वितीयः शरीरात्मतादीनामपि तथा सति भवता स्वीकर्त्तव्यता पातात् । पश्चात्तद्विचारबाध्यतया नाभ्युपेयतइति चेत् तर्हि प्रमाणादयोपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यतइति तावन्न भवति । नापि चतुर्थः यादृशोभवताप्रमाणादीन्यभ्युपगम्य व्यवहार नियमः कथायामालम्ब्यते,+ तस्यैव प्रमाणादिसत्त्वासत्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात् । तस्य यदि मां प्रतिफलातिप्रसञ्जकत्वं तदा त्वां प्रत्यपि समानः प्रसङ्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादेतन्नियतवाग्व्यवहारक्रियासमयबन्धेन कथां प्रवर्त्तयतापि व्यवहारसत्ताभ्युपगन्तव्या नहि सत्तामनभ्युपगम्य व्यवहारक्रियाभिधातुं शक्या। क्रिया हि निष्पादना असतः सद्रूपताप्रापणमिति यावत्, प्रमाणैर्व्यवहर्त्तव्यमिति नियमबन्धने प्रमाणकारणभावस्य नियमात्, तद्भावस्य नियतपूर्व्वसत्वरूपं कारणत्वं प्रमाणानामनादाय न पर्य्यवस्यात्। दूषणानाञ्चास्तित्वेन भङ्गावधारणनियमबन्धने साधनाङ्गानां व्याप्त्यादीनां सत्वेन तद्विषयस्य तत्त्वरूपताव्यवहारनियमनादौ च कारणत्वमेव तस्य तस्य सत्वमङ्गीकृतमितिरिक्तमिदमुच्यते प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भाः शक्यन्तइति। मैवम्। एभिरपि बाधकैः कथायामारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्व्वोक्तबाधायामनिस्तारात्। नच व्यवहारनियमस्य स्वेच्छाकृतस्यैव प्रमाणादि सत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात् यतः सत्ताज्ञानस्य तत्राङ्गत्वं नतु सत्तायाः। तत्र किं सत्तावगमसात्रात्सत्ताभ्युपगम्येति मन्यसे अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाधितात्तदवगमाद्वा । न तावदाद्यः मरुमरीचिकादौ जलरूपतासद्भावाभ्युपगमप्रसङ्गात् । द्वितीयेपि किं वादिप्रतिवादि मध्यस्थमात्रस्य तस्यापि कथाकालमात्रएव बाधितावगमाभावात् । अथवा कस्यचिदपि कालान्तरेपि च बाधितबोधविरहात् । नाद्यः अतिप्रसङ्गात्, पुरुषत्रयावगतस्यापि एकक्षणावगतस्य च पुरुषान्तरेण तेनापि क्षणान्तरे बहुलं बाध्यतादर्शनादिति । नचासावर्थोऽसन्नपि द्वित्रादिपुरुषमात्रपूर्व्वं जाततत्प्रतीत्यनुरोधाद्बाधदर्शने सत्यपि तथैव सन्नित्यभ्युपगम्यते तस्मात् द्वितीयः पक्षः परिशिष्यते यत्र सर्व्वप्रकारेण बाधितत्वं नास्ति तत्सदित्यभ्युपगन्तव्यम् । तदित्थं यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथा कालमात्रे तैराबध्यमानः कथाङ्गत्वेनाभ्युपेयते, तदा किमायातं सर्व्वप्रकाराबाधित तत्तत्सत्त्वावगमायत्ततत्तत्त्वाभ्युपगमकथाङ्गताङ्गीकारस्य कतिपयप्रतिपत्तृकतिपयकालतथात्वावगमादेव च प्रायेण लौकिकव्यवहारः प्रतीयते तादृशश्चायं सत्त्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वगमः कथाङ्गमेतत्तदुच्यते व्यवहारिकीं प्रमाणादिसत्तामादाय विचारारम्भ इति। तस्माद्वादिव्यवहारनियमः कृतः तन्मर्य्यादानेन नोल्लङ्घितेति। यद्वादिवाग्व्यवहारे मध्यस्थावगमः स विजयते यस्य च वचसि नैवं तस्यावगमस्तस्य पराजयः यत्र वाद्युक्तनिग्रहसत्त्वावगमः स निगृहीतः तदितरस्तु न तथेत्यादिनियमएव कथारम्भाय ग्राह्यः अनेन नियमेन व्यवहर्त्तव्यमित्यस्य ह्ययमर्थोऽनेन नियमेनोक्तमनेनेति मध्यस्थावगमस्य विषयी भवितव्यमिति। नच वाच्यमन्ततस्तदवगमस्यापि सत्ताभ्युपेयेति। तस्यापि सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात्। नचैवमनवस्था तदनुसरणावश्यम्भावानङ्गीकारात् एवं त्रिचतुरज्ञानजन्मनोनाधिकमतिरिति न्यायात्। नचान्तिमासत्त्वे पूर्वपूर्वप्रवाहासत्त्वापत्ति स्तथाचावगममादायापि न निस्तार इति वाच्यम्। अस्त्वेव हि तथा त्रिचतुरज्ञानकक्षागवेषणमात्रविश्रान्तेन विचारेण ततःपरमननुसरणरमणीयेनैव समयं बद्धा कथाय

CC-0. In Public Domain. Digitization by eGangotri

मिथःसम्प्रतिपत्त्या प्रवर्त्तनात्। अन्यथा प्रमाणादिसत्ताभ्युपगमेऽपि ज्ञानानवस्थाया दुष्परिहरत्वात्। नच वाच्यं मत्पक्षे स्वरूपसत्ताज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् न ज्ञानस्य परम्परानुसरणमुचितं नत्वेवं त्वत्पक्षे ज्ञानस्वरूपसत्ताङ्गीकारप्रसङ्गादिति। स्वरूपसत्तामादायापि परिहरतोऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्तव्यत्वात्। यथा त्वत्पक्षे स्वरूपसदविशेषेऽपि ज्ञानस्वरूपसत्तैव परं व्यवहारोपपादिका न घटादिसत्ता एवमेवासत्ताविशेषेऽपि ज्ञातमेवासद्व्यवहारोपपादकं नान्यत्। असच्चोपपादकञ्चेति व्याहतमिति चेन्न सदुपपादकमिति कुतो न व्याहतम्। नहि सदुपपादकमसच्च नेति क्वचिदावयोः सिद्धम्। ननु तदसत्ताविशेषात्तत्कार्य्यस्यान्यदापि प्रसङ्गः न कार्य्यस्याद्यसत्ताक्षणइवान्यदापि सामग्रीसत्ताविशेषात्तवापि किं नान्यदा कार्य्यजन्म। अथ न मम तदानीन्तनं सामग्रीसत्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु ततः प्राक् सामग्रीसत्वं तथादर्शनात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हि ममापि कालान्तरस्थमपि तदसत्वं तदा-
तनकार्य्यजन्मनोऽनियामकं तथादर्शनादेव । मम
तदव्यवहितोत्तरत्वं तदा कार्य्यनियामकमिति
चेत् न समसमयत्वादागन्तुकत्वाद्यविशेषेण
नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदा-
स्थाया एव सामग्र्या स्तदा कार्य्यनियमोऽभ्यु-
पेयः तथादर्शनादित्येव मन्तव्यम् । तथा च
समः समाधिः तथापि कार्य्यजन्मकालस्य को-
विशेषः । कार्य्यजन्मैव । अन्यथा यद्विशेषान्तरं
तदपि विशेषान्तरवतः कालस्य स्यादिति अप-
र्य्यवसानमेव पर्य्यवस्येत् तथापि तत्कालस्यानु-
गतं किं रूपमिति चेन्न रूपान्तरवतोऽपि किं
रूपमित्यपि पर्य्यनुयोगस्यानुवृत्तेः । किञ्च
"अन्तर्भावित सत्वञ्चेत्कारणं तदसत्ततः ।
नान्तर्भावितसत्वञ्चेत्कारणं तदसत्ततः ।,,
तथाह्यन्तर्भूतसत्वे यदि कारणत्वं तदा स्व-
विशिष्टेऽस्ववृत्तिरसतः स्वाश्रयत्वमापादयति ।
विशिष्टस्यार्थान्तरत्वेऽपि च स्वस्मिन् स्ववृत्ति
व्यतिरेकवत् स्वविशिष्टे स्ववृत्तिव्यतिरेक-
नियमदर्शनात् न सैव सत्ता तस्मिन्निति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यस्या स्तस्याविशिष्टत्वाभ्युपगमे तामसन्निवेश्य कारणत्वमभ्युपगन्तुः सर्व्वथैव कारणमसत्यर्थ्यवस्यति। अपरापरसत्तानिवेशने वा, पर्य्यवसानमेव। नच सत्ताभेदानन्तरमस्त्वेवेत्यपि पादप्रसारिका निस्ताराय, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमननिबन्धनलङ्घिनः प्रथमापि सत्ता न स्यादिति सत्वबुद्धिमिष्टवतो मूलमपि ते नष्टमिति कष्टतरम्। नच स्वरूपसत्तोपगमाय स्वस्ति, भिन्नार्न्नत्यनुगत बुद्ध्याद्याधानपदेऽभिषिञ्चता त्वया जातिमात्राय जलाञ्जलिर्व्वितीर्यंत। माभूदनुगतिः स्वरूपसत्वस्येति च वदन् तद्धर्म्मिणीं कारणतां कथमनुगमयितासीति। किञ्च स्वरूपसत्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोपि स्वरूपं स्वरूपमेव, न ह्यसन् घटादिर्न घटादिः, तथा सति घटादिर्नैत्यपि न स्यात् असतोऽघटादित्वात्। अथ सदपि सत्ता नमन्तर्भाव्य कारणं तदानीमसदपि तत्तयास्तु सत्तासत्तयोः कारण कोट्यप्रवेशाविशेषात्। अथ न सत्ता कारणकोटिनिविष्टा किन्तु कारणत्वं सत्वं, नियतपूर्व्वसत्तां हि कारणतामन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति मन्यसे तर्हि मत्पक्षे सैव कारणतास्तु, तत्रा
कारणसत्तामभ्युपगतवानसीति घट्टकुट्यना
प्रभातमिति चेन्न भावानवबोधात् सत्तामसत्का
तीमभ्युपगच्छतापि सत्ता मयाभ्युपगतैव । अक
न्यथा कासावसतीति त्वमपि किं सत्तान्तरमन
त्तामन्तर्भाव्य कारणत्वमिच्छसि । नत्वेवं; पूर्व "
वत् क्वापि सत्तात्यागो वा अनवस्थायां पर्य्यवत
सानं स्यात् । असत्ताविशेषात्कारणनियमः कथ
स्यादिति चेन्न सत्ताविशेषेपि तुल्यत्वात् । सत्त्वेऽपि
ऽस्यान्वयाद्यनुविधानं तस्य तज्जातीयस्य वा
त्वत्पक्षेऽत्वसत्त्वाविशेषात् व्यतिरेकः परं सोप
नियतो यदा कारणाभाव स्तदा कार्य्याभावा
वश्यम्भावानभ्युपगमात् नित्यासतः कारणस्या
सत्वएव कदाचित्कार्य्योत्पादात् अन्वयस्तु न
कदाचिदपीति चेन्न तुल्यत्वात् । अन्वयो नास्ती
त्यभ्युपगच्छतापि अन्वयोपगमात् । अन्वय
स्यापि सत्तान्तर्भावने कथितदोषापत्तेः । एतेन
"आशामोदकतृप्ता ये ये चोपार्जित मोदकाः ।
रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते,, इत्य
स्यापि बाधकत्वमाशामोदकायते । सत्तान्तर्भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वानन्तर्भावाभ्यां प्रत्यादेशात् आशामोदकादि-
नापि च रसवीर्य्यविपाकादिजननात्। तदस-
त्कथं कार्य्यं स्यादिति चेन्न सत्तामन्तर्भाव्य
कार्य्यत्वोपगमे कारणवत्कार्य्येऽपि उक्तदोषस्या-
नन्तर्भावे वाऽविशेषस्य पूर्व्ववदावृत्तेः तस्मात्
'पूर्व्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ। हेतु-
तत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा।', आस्तां
प्रतिबन्दिग्रहाग्रहः कथं पुनरसतः कारणत्वमव-
सेयं प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात्
असत्त्वस्य चाविशेषादिति चेन्न इदमस्मान्नियतं
प्राक्सदितिबुद्ध्याविशेषात्। भ्रान्त्यैवं बुद्धिगोच-
रेऽतिप्रसङ्ग इति चेन्न सादृश्या हि धिया निच-
तुरकक्षा बाधानवरोधविश्रान्तया वस्तुसत्त्वनि-
श्चयस्ते तादृश्यैव विषयीकृतस्य ममापि कारण-
तानिश्चयः केवलन्ततः परास्वपि कक्षासु बाधात्
पूर्व्वपूर्व्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणं
अयं मन्यामहे इति विशेषः। परदर्शनसिद्धा-
न्तस्य भूरिकक्षाबाधाविनोऽपि ततः परकक्षाबाध्य-
मानत्वेनातथाभावोपगमात् अन्यथैकदर्शन-
परिशेषः स्यात्। एतेन सत्त्वाविशेषात् कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्यचित्पक्षस्य विचतुरकक्षाधावित्वमास्ता-
मित्यपि निरन्तरम्। अनेवं बुद्धिविषयता-
दशायां कोविशेष इति चेत् यदा कदापि
तादृशबुद्धिविषयतैव, अन्यथा कथय कथमन्यदा
तादृशबुद्धिविषयतया अन्यदा सत्त्वं स्यात्
तदा सत्त्वमन्यदास्येन गृह्यत इति चेत्
अल्पकालिकमेव तर्हि तत्तदाऽकारणंचोपयो-
गीति समानं, तदेतत् संस्मृतिसत्त्वमिति गी-
यते असती सा न विशेषिका सती सा नेष्ट-
त्यभिसन्धानेन संस्मृतिरपि सती नवेति पृच्छन्
प्रतिवक्तव्यः, ज्ञानं तावद्व्यवहारोपपादकतया
द्वाभ्यामप्यनुमतं, तस्यापि जिज्ञासायां विचतुर-
कक्षाविश्रान्तगवेषणस्य यदि सत्तोपपन्ना भवि-
ष्यति तदा सत्ता तेनेदमुपपादितम्भविष्यति
अथासत्ता तस्य पर्य्यवस्यति तदा असत्तैव, ते-
नेदमुपपाद्यत इति स्वीकर्त्तव्यं, भ्रमविशेषेण
भ्रमे विशिष्टताव्यवहारः। अविचार्य्यैव ताव-
त्तस्य सदसत्त्वं विचार आरब्धव्यः, अन्यथा
प्रथममेव मतिकर्दमे कथारम्भणमशक्यमापद्येत
स्वीकृतञ्च भवतापि भविष्यदादिविषये विज्ञाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशिष्टव्यवहारनिदानत्वमसतो विषयस्य, कारण शक्तेश्च विशेषकमसदेव कार्य्यं, नच कालान्तरसम्बन्धिनी सत्ता तस्या एकत्रान्यत्र नान्यदापीति वैधर्म्यमेतयोरपीति वक्तव्यं, विशिष्टव्यवहार प्रवृत्तिसमये द्वयोरप्यसत्त्वाविशेषात्। प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोवस्थानं पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणवृत्तान्तमनुहरति, तथापि कालान्तरस्थित्या घटादिकं स्वरूपतो विशेषणतश्च व्यवच्छिन्नं तद्विज्ञानेन स्वभावबलात्स्वविशेषणत्वेनोपादीयते, + नत्वेवमत्यन्तासद्भवितुमर्हति, तस्य स्वरूपतो विशेषणतश्च व्यवच्छिन्नतया, नङ्गीकारात्कुत स्वभावतो विज्ञानं सम्बन्धि निरूच्यते, न, उक्तमत्र असतोपि तदेव रूपं तस्य नियतस्वरूपतैव नियतविशेषणस्यैवासत्त्वादन्यथातिप्रसङ्गात् भ्रान्तिविषयेण दत्तोत्तरत्वाच्चेत्यलमतिविस्तरेण।

२ अपरे पुनश्चेतसोपि शून्यताङ्गीकारे मनःप्रत्ययमनासादयन्तः सर्व्वमिदमसदेव विश्वमित्यभिधातुं सहसैवानुत्सहमानाः मन्यन्ते- ज्ञानं तावत् स्वप्रकाशं स्वतएव सिद्धरूपं, न खलु वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने सति जिज्ञासोरपि कश्चिज्जानामि न वेति संशयः न जानामीति वा विपर्य्ययो व्यतिरेकप्रमा वा, तेन जिज्ञासितस्यातत्वज्ञानव्यतिरेकप्रमाणा(ना)भावसमुदायः स्वव्यापकं जिज्ञासितस्य प्रमितत्वमानयति, अन्यथा हि जिज्ञासित प्रमितत्वव्यतिरेकव्यापकं जिज्ञासितव्यतिरेकोल्लेखि ज्ञानमविमित जिज्ञासस्य स्यादतः सर्व्वजनस्वात्मसम्वेदनसिद्धं बोधस्य स्वरूपम् व्यवसायस्यानुव्यवसायनियमात् न तत्र संशयादिरिति चेन्न यत्रैवानुव्यवसायेयत्ता(नैयत्ता) नोपेया तत्र जिज्ञासायामात्मधर्मिकं तत्संशयमारभ्य व्यवसायविषयपर्य्यन्तं संशयाक्रान्तेर्दुष्परिहरत्वात्। विषयिसद्भावसंशये च तद्विषयेपि संशयस्य सम्भवात्, एवं हि त्रिचतुरसम्वेदनकक्षाज्ञानध्रौव्यनियमाभ्युपगमोपीति। स्वप्रकाशेतुमानमेयव्यवस्थाया अभावादेव तदाश्रया दोषा निरवकाशाः। अन्यथा तु बोधस्वरूपमेव न सिद्ध्येत्। यदि हि विज्ञानं परतः सिद्ध्येत्तदा अनवस्था स्यात्। नच वाच्यमवश्यवेद्यता वित्तेर्नाभ्युपेयते, स्वार्थव्यवहारस्तु स्वरूपसत्तया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसूयत इति क्वानवस्थेति, यतस्तस्यां प्रमाणा-
नुपन्यासे स्वरूपसत्तापि कुतो, यया व्यवहारोप-
पत्तिः, को ब्रूते सती सा वित्तिरसत्येव न,
कुतः। सामान्यतो वित्तेस्तथात्वविधावपेक्षित-
सिद्धा यत्र विशेषरूपायां प्रमाणप्रवृत्तिः
तदा तत्र सत्वसाधननाऽसत्वेपि जिज्ञा-
सायां सत्यां पश्चाद्व्यवहारसत्तैव वा अन्यद्वा
प्रमाणमस्त्वेवेति चेन्न, तस्यापि सत्वं कथ-
मित्यनवस्था स्यात्, शेषासिद्धा सर्वासिद्धिर्वा
प्रसज्येतेत्यर्थासिद्धिपर्यन्तस्य व्यसनस्य दुरु-
त्तरत्वात्, स्वयमप्रत्यक्षोपलम्भस्य नार्थदृष्टिः
प्रसिद्ध्यतीति। घटसत्तां हि व्यवहरता प्रामा-
णिकेन तत्र प्रमाणसद्भावो वाच्यः, यदि प्रमाण-
मनुपन्यस्य सास्तीत्यङ्गीक्रियते तदा वैपरीत्यमेव
किन्न स्यात्, ततश्च घटसत्तायां प्रमाणसत्ता
दर्शनीया। तथा च प्रमाणसत्तापि तत्प्रमाण-
सत्तामन्तरेण न, प्रामाणिकस्याङ्गीकारार्हा,
सर्वप्रमाणसत्तानिवृत्तेर्वस्तुसत्तानिवृत्तिनियत-
त्वात्। अन्यथा सप्तमरसादेरप्यापत्तेरिति
व्यक्तमनवस्थादौस्थ्यमस्वप्रकाशवादिनः स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि हि विनैव प्रमाणसत्तां परोङ्गीकार्य्येत तदा घटसत्तामपि तथैवाङ्गीकार्य्यमिति घटेपि वृथा प्रमाणोपन्यासायासः। अथ नाव्यवधानलग्नवित्तितद्वित्तिधाराभ्युपगम्यते किन्नाम कदाचित् कुतश्चित् वित्तिः प्रमीयत इति सर्व्वा वित्तिः प्रमाणसिद्धैवेत्यभ्युपेयत इति चेन्न स्यादप्येवं यदि घट इति घटं जानामीत्यतोधिका घटवित्तितद्वित्तिधारया विषयभावेन प्रविष्टया तादृग्विषयशतभारमन्थरा वित्तिरस्मदादेरुत्पद्यमानानुभूयेत। यद्यस्मदादिविलक्षणजन्मनि सा सम्भाव्यते तदा यस्या अपि वित्तेः तावद्वित्तिविषयगर्भितावधी विषयः साप्यन्यथा कयाचिदुल्लेख्येत्यत्र प्रमाणाभावश्चानिर्मोक्षापत्तिश्च। नहि स्वमनन्तर्भाव्य कयाचिद्धिया स्वप्रवाहो ग्राह्यः, तथा सति स्वप्रकाशसिद्धेः अतएवान्योन्यविषयतापि निरस्ता, सविषयकान्योन्यग्रहे स्वग्रहापत्तेः। नच पुरुषान्तरेण सा प्रमास्यते ननु तदभाव इति ते प्रमास्ति, तदर्थमपि प्रमाणान्तरसद्भावपरम्परापत्तेः। नचैवं घटसामग्री तत्सामग्रीगवेषणेऽप्यनवस्था स्यात्, वैषम्यात्, यदि घट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामग्री तत्सामग्रीधारा कुत्रचिद्विच्छिद्येत तदा घटः सदातनः स्यादित्यर्थापत्तेरेव घटः सामग्रीपरम्पराविच्छेदविरहित एव प्रमीयते, यदि तु ज्ञानेष्वेवं स्यात्तदा स्वस्य प्रवेशात् स्वप्रकाशापत्तिः, प्रवेशादनवस्था, अवेदने शेषासिद्ध्या सर्वासिद्धिरिति व्यसनं दुरुत्तरमेव। ये च मानमेयभावाश्रया दोषाः, कीर्त्तनीयास्तेपि प्रसज्येरन्। नच तैर्दोषैर्नास्त्येव ज्ञानमित्यास्थेयं, स्वतः सर्व्वसिद्धस्य दुरपह्नवत्वात्, स्वप्रकाशाङ्गीकारादेव चानुभवस्य सर्व्वदोषहानेर्वक्ष्यमाणत्वात्। प्रकाशात्मतामात्रस्यैव स्वतः सिद्धिसम्भवे जडात्मनां धर्माणां केषामपि तदन्तर्भावानुपपत्तिः। अतएव धर्मोपग्रहप्रवर्त्तिषु वाग्व्यवहाराविषयत्वं, कालानवच्छेदमादाय नित्यतोपचारः, देशानवच्छेदमादाय विभुत्वव्यपदेशः, प्रकारावच्छेदविरहनिबन्धनश्च सर्व्वात्मत्वाऽद्वैतादिव्यवहारः, सौगतप्रभाकरवत् अभावे ह्यभावं प्रति नैयायिकवच्चाभावानतिरेकस्वीकारादेवाद्वैताऽव्याघातः, भ्रमविषयनिषेधवच्च प्रतियोगिनः सर्व्वथैवासिद्धापि न काचित् क्षतिः। तदेतत् श्रुत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमाणेनोपलक्षणन्यायात् तात्पर्य्यतः प्रकाश्यते तेन परमार्थतोऽभिधानाभिधेयभावविरहे तात्पर्य्यतः श्रुतिस्तस्मिन्नविद्यादशायां पराभ्युपगमरीत्या प्रमाणमित्युच्यते वस्तुतस्त्वात्मसिद्धमेव चिद्रूपम् । ननु च स्वप्रकाशत्वं ज्ञानस्येत्यनुपपन्नमिदं, क्रियाकर्मभावस्य भेदव्यतिरेकेणानुपपत्तेः, कार्य्या क्रिया हि कर्मणो भवति, कर्म च कारकं क्रियायाः, नच स्वेनैव स्वनिष्पादनं शक्यं, पूर्व्वापरभाव विशेषस्य हेतुहेतुमद्भावरूपत्वात् । नच तस्मादेव तदेव पूर्व्वमपरञ्च सम्भवति, तदनवच्छिन्नकालविशेषस्य तत्पूर्वशब्दार्थत्वात्, तदा च तस्य सद्भावस्वीकारे स एव कालस्तदवच्छिन्नोऽनवच्छिन्नश्चेति विरोधात् । मैवम् । क्रियायाः कर्मजन्यतानियमानङ्गीकारात्, सर्वथैवानागतविज्ञाने तदसम्भवात् । क्वचिज्जनकतामादाय कर्मणि कारकत्व व्यपदेशात्, करणव्यापारविषयत्वाद्वा, परसमवेतक्रियाफलभागित्वाद्वा कर्मलक्षणात्, विनापि क्रियाजनकत्वेन कर्मव्यवहारोपपत्तेः । किञ्च तत्कर्मत्वं यत् स्वं प्रति विरुध्यते, परसमवेतक्रियाफलभागित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिति चेन्न, अपादानस्यातिव्याप्तेः, अपादानं कर्मापीति चेन्न, वृक्षात्पर्णं पततीति वृक्षं पर्णं पततीत्यपि स्यात्, विवक्षातः कारकाणि भवन्तीति तदविवक्षातो नैवमिति चेन्न, वस्तुसतस्ताद्रूप्यस्य यदि विवक्षा स्यात् तदा तदपि स्यात्, अपादानस्य कर्मत्वं न विवक्ष्यत इति शाब्दिकसम्प्रदाय इति चेत्, तर्हि निवृत्तसर्वकर्मव्यवहारेऽपि स्वकृतकर्मलक्षणानुरोधेन कर्मत्वमभ्युपगच्छता वस्तुमात्रं कर्मेत्यपि लक्षणं सावकाशितं स्यात्, कथञ्च लोकोत्तरप्रज्ञेन निवृत्तसर्वकर्म व्यवहारेऽपि कर्मत्वमस्तीति ज्ञातम्, अपादानेतरदीदृशं कर्मेति चेन्न, तत्रापि नदी वहति इत्यादौ तद्देशप्राप्ततीरभागप्राप्तिफलायाः सकर्मत्वापत्तेः, अपादानेतरदित्यस्य स्थाने क्रियानाशकेतिकरणेऽप्यस्य तदवस्थत्वात्, विनाशलक्षणायां वृद्धौ तदयोगाच्च, वृक्षं त्यजतीत्यादावकर्मकत्वप्रसङ्गाच्च। आत्मानं जानामीत्यत्र च परत्वाभावादकर्मकत्वापत्तेः। मनाद्युपाधिभेदात्परत्वं कर्तृत्वभोक्तृत्वाद्युपहितस्यैवात्मनो ज्ञेयत्वाभ्युपगमादिति चेन्न, यतोऽस्तु तावदेवं यथा कथ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्चित्तथाप्यध्यात्मविदो निरुपाधिमात्मानं जानतो ज्ञानं नात्मकर्मकं स्यात्। पच्यते ओदनः स्वयमेवेत्यादौ कर्मकर्त्तरि का गतिः स्यात्। सर्व्वज्ञमीश्वरम्मन्यमानेन च नित्यज्ञाने तस्मिन् भगवति फलनाश्यत्वस्यानभ्युपगमात् तं प्रत्येतल्लक्षणासिद्धिः। तस्माद्व्याकरणकारैः शब्दसिद्ध्यर्थं नदी वृद्ध्यादिवत्कर्मापि परिभाषितमित्यलं तदनुगतलक्षणगवेषणया। शेषञ्चेश्वराभिसन्धौ स्वप्रकाशवादे निर्व्वक्ष्यामः।

ननु चाभेदे विषयविषयिभावस्यैवासङ्गतत्वम्। विषयित्वं हि विषयसम्बन्धिता सम्बन्धश्च भेदमन्तरेणासम्भवद्वस्थितिः सम्बन्धिमितेः सम्बन्धिस्वरूपभेदमितिव्यतिरेके वैपरीत्यावधारणात्। मैवम्। विषयविषयिभावो हि सम्बन्धो न सम्बन्धिस्वरूपाद्भिन्नः, तथाभूतत्वेऽपि च अन्ततस्तत्सम्बन्धस्यापि स्वाश्रयात्मकत्वमभ्युपेतव्यमनवस्थाभयात्, तथा सति च सैव यथा सम्बन्धमितिः सम्बन्धस्वरूपात्तत्सम्बन्धिनोर्भेदमनादायैव पर्य्यवस्यतीत्यभ्युपगन्तव्यं, स्वभावसम्बन्धस्येतरसम्बन्धमर्य्यादातिशायित्वात्, तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनापि सम्बन्धिभेदं विषयविषयिभावात्मायं सम्बन्धः पर्य्यवस्यति, तदवगमोपि तदवगमाव्यतिरेके णैव भविष्यति को विरोधः। नचैवं घटतज्ज्ञानयो र्यादृग्विषयविषयिभाव स्तादृग्भावतयापि स्वप्रकाशविषयविषयिभावान्यत्वे बाध्यतैकत्व स्यात्, अस्तेरवश्याविद्याविद्यमान घटतज्ज्ञाने बाध्यत्वं, परमार्थ सति तु स्वप्रकाशे पारमार्थिकत्वमिति द्वयोरननुगमेपि न दोषः। अथ वा स्वात्मना सह क्रियाकर्मभावो विषयविषयिभावो वा स्वप्रकाशार्थ इति नाभ्युपेयमेव, यथा तु भवतां सत्तासम्बन्धादितरत्र सद्व्यवहारव्यवस्था, सत्ता स्वयमेव सद्रूपा, नच तावता स्वात्माश्रयता, तथा स्तयाज्ञानमपि स्वतएव सिद्धस्वरूपम्। अथवा यथा बहुव्रीहिसमासे तद्गुणसम्विज्ञाने गुणमादायैव प्रधानस्यान्यपदार्थस्य बहुव्रीहिसिद्धपदप्रतिपाद्यता, तथा विज्ञानस्याविषयमपि स्वात्मानमादायैव स्वविषयव्यवहारप्रवर्त्तनं समर्थयतां, सोयं गुरूणां सविषयकविज्ञानस्वप्रकाशतापक्षो न ब्रह्मस्वप्रकाशता, तत्र विषयाभावात्, एतावन्मात्रेण तु स्यात् यथा स्वविषयेपि कुटादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहुव्रीहि वाक्यं व्यवहारं प्रवर्त्तयति तथा ज्ञानमविषयेप्यात्मन्यविद्यादृश्यायामिति। तदेवं यद्यन्यत्र दृष्टवैधर्म्यं स्वप्रकाशे पर्य्यवस्यति तत् सर्व्वमन्यथानुपपत्तिरेव स्वप्रकाशप्रसाधकतया प्रदर्शिता स्वीकारयति। तद्यथा अन्योज्ञाता अन्यच्च ज्ञेय इत्यन्यत्र दृष्टमद्वमिति व्यवहारा-न्यथानुपपत्त्या त्याज्यं, तथा अन्यज्ज्ञानमन्यज्-ज्ञेयमिति जानामीति व्यवहारान्यथानुपपत्त्या त्याज्यं, सर्व्वतोबलवती ह्यन्यथानुपपत्तिः तथा दृष्टतामात्रमवलम्ब्य प्रवृत्तं तर्कशतमपि बाधते तदिदमाहुः। "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि। अदृष्टशतभागोऽपि न कल्प्यो निष्प्र-माणक इति।" तस्मात् "अन्यथानुपपत्तिश्चे-दस्ति वस्तुप्रसाधिका। पिनष्टि दृष्टवैमत्यं सैव सर्व्वबलाधिका। वाच्यान्यथोपपत्तिर्वा त्याज्यो वा दृष्टताग्रहः, नह्येकत्र समावेशश्छायातपवदे-तयोरिति।" तदित्थं त्वदङ्गीकृतसद्विचारलक्ष-णोपपन्नैरेवं विधैर्व्विचारैः स्वप्रकाशता भवता सुप्रतिपद्या। अस्माभिस्तु स्वसम्वेदनबलादेव स्वतःसिद्धिरूपं विज्ञानमाश्रियत इति। एवञ्च

CC-0. In Public Domain. Digitization by eGangotri

४

सति सौगतब्रह्मवादिनोरयं विशेषो यदादिमः सर्वमेवानिर्व्वचनीयं वर्णयति । यदुक्तं भगवता लङ्कावतारे "बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते । अतो निरभिलप्यास्ते निःस्वभावाश्च देशिता इति ।,, ज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसत्त्वाभ्यामनिर्वचनीयं ब्रह्मवादिनः सङ्गिरन्ते । तथा हि—नेदं सद्भवितुमर्हतीति वक्ष्यमाणदूषणग्रस्तत्वात्, नाप्यसदेव तथा सति लौकिकविचारकाणां सर्वव्यवहारव्याहत्यापत्तेः। यदपि निर्वक्तुमसामर्थ्यं गुरव उपासन्तां येभ्यो निरुक्तयः शिक्ष्यन्त इत्युपालम्भवचनं तत्तदा शोभते, यदि मेयस्वभावानुगामिनीयमनिर्व्वचनीयतेति न ब्रूयु र्वक्तृदोषादिति च वदेयुः। यस्तु यस्तु वादी निरुक्त्यभिमानं धत्ते स निर्वक्तु, न तु शक्ष्यति वक्तव्यदोषात् । न च ते दोषाःस्वोक्तिमपि भन्तो जातयः कथं न स्युरिति वाच्यं, यतोऽनिर्वचनीयत्वं बाध्यते तैर्दोषैः स्वयमप्यनिर्वचनीयैरेव, अनिर्वचनीयैरपि च तैर्व्यवह्रियत एवेति कुतोऽस्मान् प्रति व्याघातः स्यात्, तज्जातीयत्वस्य च निरुच्य योजयितुमशक्यत्वात् । ननु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदसत्त्वपक्षयोर्दोषदर्शनादनिर्वचनीयतेति ब्रु-
वाणस्य किं सदसत्त्वसंशयः किम्वा सदसत्त्व-
पक्षवहिर्भावाभ्युपगमः । आद्ये भवितव्यं सद-
सत्त्वयोरन्यतरेणेत्येकस्याभासत्वं, तच्च सत्त्वपक्ष-
दोषस्यैवाभ्युपेयभावावश्यकत्वात्, यदि तावत्
सत्त्वपक्ष स्तदा सत्त्वपक्षे दोषः कथं सङ्गच्छते
अथासत्त्वपक्ष स्तदा सर्वासत्वे तद्दोषः, कथं
सद्भावमनुभवितुं प्रभवेत, द्वितीयस्तु व्याघाता-
देवासम्भवी, परस्परविरोधे हि न प्रकारान्तर
स्थितिरिति तदेतदनाकलितपराभिसन्धेः प्रत्य-
वस्थानम् । यो हि सर्व्वमनिर्वचनीय सदसत्त्वं
ब्रूते, स कथमनिर्व्वचनीयतासत्वव्यवस्थित्यै पर्य्य-
नुयुज्यते, सापि हि कृत्स्नप्रपञ्चपरसर्वशब्दा-
भिधेयमध्यनिविष्टैव, परस्यैव तु व्यवस्थयैवं पर्य्यव-
स्यति निर्वचनप्रतिक्षेपादनिर्वचनीयत्वं विधिनि-
षेधयोरेकतरनिरासस्येतरपर्य्यवसायिताया स्ते-
नाभ्युपेयत्वात्ततः परकीयरीत्येदमुच्यते अनि-
र्वचनीयत्वं विश्वस्य पर्य्यवस्यतीति । वस्तुतस्तु
वयं प्रपञ्चसत्त्वासत्त्वव्यवस्थापनविनिवृत्ताः स्वतः
सिद्धे चिदात्मनि ब्रह्मतत्वे केवले भरमवलम्ब्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरितार्थाः सुखमास्महे, ये तु स्वपरिकल्पित-साधनदूषणव्यवस्थया विचारमवतार्य्य तत्त्वं निर्णेतुमिच्छन्ति तान् प्रति ब्रूमो, न साध्वीय-म्भवतां विचारव्यवस्था, भवत्कल्पितव्यवस्थयैव व्याहतत्वात्। अतएवास्मदुपन्यस्यमानदूषण-स्थितिविषयाः पर्य्यनुयोगा निरवकाशाः, त्वद्व्यव-स्थाया एव व्याहत्युपन्यासात्। नचोपन्यास एव निर्बन्धकारणं, विचारोपन्यासस्य सदसत्त्वोप-गमौदासीनैर्व्विचार्य्यमित्यभ्युपेत्यैव परं विचार-प्रवर्त्तनायाः शक्यत्वमित्यावेदितत्वात्। यदि तु विचारस्य सत्त्वमनभ्युपेत्य न विचारयितुं शक्य-मित्युच्यते, तदा प्रमाणमव्यापार्य्य न तदीय-सत्त्वाभ्युपगमोपि शक्यते अतिप्रसङ्गादिति वि-चारस्यापि विचार्य्यग्रहणेऽनवस्थया विचारा-रम्भएवाशक्यः स्यात्। नच पूर्व्वपूर्व्वसिद्धत्वाद्वि-चारे विचारान्तरमिदानीं गवेषणीयमिति वाच्यम्, विचारस्य पूर्व्वसिद्धत्वे, विचार्य्यरूपस्व-विषयव्यवस्थितत्वात् तस्य विचार्य्यमपि पूर्वपूर्व-मेव विचारितमित्यनारम्भ एव विचारस्य। अथ विचार्य्यविशेषस्य पूर्वमसिद्धत्वात्तदर्थं विचारारम्भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तर्हि विचारविशेषस्यापि तद्विषयकस्य पूर्व-
मसिद्धिरेवेति वृथा शुष्कचर्वणं, यदि च तद्दर्शन-
रीत्याभिधीयमान मस्माभिर्बाधं विधत्से, तदा
स्वाभ्युपगमरीतिबाधविधायितैव ते स्यात्, अस्मा-
भिर्निर्वाह्यमाणस्य त्वया खण्डनयुक्त्यैव बाधे अ-
स्माकमेव जैत्रता, खण्डनयुक्तयोबाधिका, निर्वा-
ह्यपक्षश्च बाध्य इत्यस्मदुक्तस्य पक्षस्य त्वयैव
निर्व्वाहात्, तस्मात् त्वया निर्वाह्यमस्माभिस्तु
खण्डनीयमितीदृश्यामेव परं कथायां त्वन्नि-
र्वाह्यनिर्व्वाहे तव जयो नान्यथेति। तदेवं भेदप्र-
पञ्चोऽनिर्वचनीयः ब्रह्मैव तु परं परमार्थसद-
द्वयमिति स्थितम्।

५ नचाद्वैते किं प्रमाणं, प्रश्न एव तावदयमद्वैत-
मनङ्गीकुर्व्वतो नोपपद्यते, प्रमाणं यन्नाम द्वैते
पृच्छ्यते तस्याप्रतीतौ कथमेवम्भूतः प्रश्नः सङ्ग-
च्छते, न हि प्रमाणमात्रं भवता पृच्छ्यते, किं-
न्नाम विषयविशेषनियतं, तच्च तदैवोपपद्यते
यदि तादृशं ते प्रतीतिमारोहेत, प्रश्नस्य वाग्-
व्यवहारविशेषत्वात्, व्यवहारस्य च स्वजनक-
ज्ञानविषय नियतत्वात्, अन्यथा व्यवहाराणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयनियमप्रयोजकस्यान्यस्यासम्भवेन व्यवहारविषयपारिप्लवत्वापत्तेः। यदि चाद्वैतं प्रश्नविषयः प्रतीतमुच्यते, तदा तत्प्रतीतिस्ते प्रमा स्यादप्रमा वा। आद्ये यदेव तस्याः प्रमायाः करणं तदेवाद्वैते प्रमाणं तवापि सम्प्रतिपन्नमिति वृथा तस्य प्रश्नः। नच वाच्यं सामान्येनाद्वैतप्रमाणसिद्धौ भूतायामपि विशेषतः प्रमाणे प्रश्नः, यतः सामान्यसिद्धावेवाद्वैतसिद्धौ विशेषाय विचारः काकदन्तविचारवत् स्यात्, सामान्यसिद्धिरेव विशेषमाक्षिप्यानयन्ती विशेषमपि तें कथितवतीति किमन्यत्प्रश्नेन, परिगणितेषु हि प्रमाणप्रकारेषु सर्व्वेषु मध्ये यत्रैव दोषं न प्रमिणोषि, तत्रैव विशेषे सामान्यस्य विश्रान्तेः। यदि च परिचितचरेषु प्रमाणप्रकारेषु सर्व्वेष्वेव दोषं प्रमिणोषि, तदा प्रकारान्तरमाक्षिप्यापि सामान्येन विश्रमणीयमेव, यदि च का प्रमाणव्यक्तिरसाविति प्रश्नार्थः परिशिष्यते, तदा सर्वा व्यक्ति विशेषतो न निर्देष्टुं शक्यत इति तदनिर्देशेऽपि न नः किञ्चिदपचीयते। यदि च द्वितीयस्तदानीमद्वैतप्रतीतिमप्रमाणमन्यमानस्य तव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रमाविषये किं प्रमाणमिति कथं न प्रश्नो व्याहन्यते। अथ अप्रमा सा मम मते तव तु मते प्रमैवेति तत्करणं प्रमाणं पृच्छ्यसे इति ब्रूषे नैतदप्युपपद्यते, तवाद्वैते यत् ज्ञानमुत्पद्यते तत्करणं मया प्रमाणरूपं वक्तव्यमित्यत्र ममानियमात्। यदि नाम मया अद्वैतमभ्युपेयते तावता किन्तावकीनस्य तज्ज्ञानस्य करणमवश्यं प्रमाणं स्यात्; वस्तुतो वह्निमत्यपि पर्व्वते यदि कश्चिद्वाष्पं धूमं प्रतीत्य ततो वह्निमनुमिनोति तावता वाष्पविषयं धूमज्ञानं तत्करणं प्रमाणमेष्टव्यमिति। अस्तु वा प्रश्नोऽयं यथा तथा, श्रुतिरद्वैते प्रमाणमिति ब्रूमः, श्रूयते खल्वेकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनेत्यादि, श्रुतिप्रामाण्यं, सिद्धार्थप्रामाण्यञ्चेश्वराभिसन्धौ प्रसाधयिष्यते, सिद्धार्थानां श्रुतीनामन्यपरत्वमपि यदि स्यात् तथापि पदसमन्वयबलेन तासु प्रतीयमानमर्थमबाधितमादायैव तासामैन्यपरीभवनात्। धियः स्वतः प्रामाण्यस्य बाधकैकापोद्यत्वात्। ननु नाद्वैतश्रुतीनामुक्तार्थे प्रामाण्यं भवति, प्रत्यक्षादिबाधात्, ततश्चान्यत्रैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचित्तात्पर्य्यं कल्प्यम् । मैवम् । यदद्वैतश्रुते र्बाधकं प्रत्यक्षादि मन्यसे, तदात्मीये विषये घटपटादेर्भेदे नियत एवोत्पद्येत, नतु प्रत्यक्षादिकं भूतभाविवर्त्तमानसकलव्यक्तिभेदग्राहि जायमानमावयोः सम्प्रतिपन्नमस्ति, तादृशेन च ज्ञानेनोत्पद्यमानेन सार्वज्ञं तदा तव श्रद्दध्याम्, यदि जानासि मम चेतसि किं वर्त्तत इति । यदि च प्रत्यक्षादि किञ्चिन्मात्रविषयं, तदा तद्विषयादन्यत्रापि प्रवर्त्तमाना नाद्वैतश्रुतिस्तेन बाधितुं शक्यते, स्वविषयमात्रे प्रमयाविपरीतविषयज्ञानबाधनात्, अन्यथातिप्रसङ्गात् । माभूदग्नीषोमीयपशुालम्भनविधिना सर्व्वभूताहिंसाश्रुतेर्नैरर्थ्यं, यदा चैवं तदा बाधिकाया धियो बाध्याया श्चाद्वैतबोधने श्रुतिर्निराबाधा सती तयोरैक्यं बोधयतीति प्रत्यक्षादि कथं स्वात्मानमेव बाधेत, घटेन पटेन तद्भेदेन च स्वविषयेण सह तस्याएव धियः श्रुत्या सर्वस्याद्वैतं गोचरयन्त्या कथं नाभेदे प्रामाण्यमासादयितव्यं, तत्राबाध्यमानत्वात्, नहि तस्याधियः स्वात्मा वा स्वात्मना वा सह, घटपटादेर्भेदोपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयः घटपटौ भिन्नावित्येवमाकाराहि
जायते नत्वहं घटात् पटाच्च भिन्नः मत्तो
तौ भिन्नाविति। स्वप्रकाशतापि स्वभावे
च्छिणी नतु यतो यतः प्रकाशोऽभिद्यते ततस्त
स्तस्य भेदेऽपि, अन्यथा तत्तदपि प्रकाशकु
निच्छिपन्तो न कथमद्वैतएव पर्य्यवस्यति। नच त
धिया स्वस्य स्वविषयस्य च स्वरूपावगाहने
रूपलक्षणो भेदः प्रकाशितएव स्यादिति वा
पुरोवर्त्ति रजतमिति भ्रान्तौ पुरोवर्त्यात्म
रजतात्मनश्च स्वरूपप्रकाशे भेदग्रहापत्तेःधर्म
विशेषमन्तर्भाव्य स्वरूपस्य भेदत्वे धियो
तथा स्यादिति सैव धीर्न तत्प्रकाशः, तस्मि
सन्निकर्षाद्यपेक्षायां धियः प्राक्तदसम्भवात्
आत्मवदात्मधर्मेऽपि सन्निकर्षानपेक्षा सेति चेत्
ग्रहणत्वस्मृतित्वप्रमात्वादावपि तथैव स्यादि
तदेवं सा बुद्धिः श्रुत्या घटपटात्मतया व्यवस्थाप्य
माना कथमात्मनः स्वस्मादेव भेदे प्रमाणी
भवितुं प्रभवतीति बाधिकायां बुद्धौ घटपटयो
र्भेदप्रमात्वाभावावगमादगत्या श्रुतिस्तत्र तत्वा
प्रतिद्वन्द्वितया। असङ्कुचितस्वतःप्रामाण्यबल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लब्धतत्तदर्थैक्यान्यथानुपपत्तिसहायसम्पदजेया तयोरप्यभेदं बोधयन्ती न प्रतिहन्तुं शक्येति न क्वचिदपि प्रतिहतप्रसरा सती सर्व्वाद्वैत-प्रमापिकेति । भेदप्रमान्यथानुपपत्त्या च वैपरीत्यमशक्यम् । तत्राद्वैतश्रुत्या सन्दिह्यमानस्य प्रमात्वस्यैवासिद्धेः भेदधीर्यमानस्य च द्विचन्द्रादिज्ञानवदन्यथाप्युपपत्तेः। एकमित्युपादाय यदेवकारमप्युपादत्ते श्रुतिरेकमेवेदमिति रूपा, तदैकान्तिकमैक्यं बोधयतीति भेदाभेदेनाप्यशक्यसमर्थनं घटपटादिभेदग्राहि प्रत्यक्षादिप्रामाण्यमिति, बुद्धेर्व्विरम्य व्यापाराभावात् कथमित्थमिति चेन्न, श्रुतितोद्रागेव जातायाः सर्व्वविषया या अद्वैतधियोऽस्मद्बुद्धय एवंविधविचारसोपानपरम्परामारोहन्त्यो नानाविषयेषु तत्प्रामाण्यविषयाः क्रमेण परिनितिष्ठन्तीत्युच्यमानत्वात् । ननु यदि नाम प्रत्यक्षव्यक्तया तया घटपटभेदोल्लेखिन्या स्वात्मना सह घटपटयोर्भेदो न गोचरीक्रियते तावतैव कथं तस्याः स्वविषयेन सहाद्वैते श्रुतिः प्रामाण्यमासादयितुमीष्टे, दृष्ट्यन्तरेण तया सार्द्धं घट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटयोरपि भेदमुल्लिखता तत्नाद्वैतश्रुतेर्बाधादेव। मैवं, तर्हि तस्या अपि विषयमापाततः परित्यज्य ययैवा परया बुद्ध्या घटपटभेदबुद्धेर्घटात्पटाच्च भेदोविषयीक्रियते तस्याः स्वविषयेण सहा भेदेऽद्वैतश्रुतिः प्रामाण्यमवलम्ब्य लब्धपदा घटपटतद्भेदबुद्धिभिः सह द्वितीयाया बुद्धेरभेदे पर्य्यवस्यन्ती सर्वेषामेव तेषामभेदे विश्राम्यति। एवञ्च सति यत्रैव गत्वा बाधबुद्धिपरम्पराविच्छेदो विषयान्तरसञ्चारोच्छेदभयादनवस्थाभयाच्चाभ्युपेयः तस्यामेव बुद्धौ पदमारोप्याद्वैत श्रुतिः सर्व्वं तत्तद्विषयविषयिप्रवाहमद्वैते स्थापयन्ती न केनापि प्रमाणेन क्वचिदपि बाधितुं शक्या तस्मात् "सुदूरधावनश्रान्ता बाधबुद्धिपरम्परा। निवृत्तावद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते।,, नच यत्र तस्य प्रतिपत्तुर्बुद्धिधाराविश्रान्तिस्तत्र पुरुषान्तरबुद्धिभेदे प्रमाणं स्यात् तथापि पुरुषान्तरेण भिन्नतया प्रमीयते सेत्यत्र प्रमाणं त्वया वाच्यं नहि तदपि पुरुषान्तरेणैव, नच सम्भाव्यमेवं श्रौतेन निश्चयेन तन्निवर्त्तनात्तथाप्यनवस्थानादिति। अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रूषे यदा कियद्दूरं बुद्धिपरम्परया सा बाधिता भवत्यद्वैतश्रुति स्तदा तन्न्यायाद् यापि बुद्धिः शेषं गत्वा नानुव्यवसाय्यते तत्रापि तद्बाधा गम्यते यत्र सा बाध्यते तत्तुल्यन्यायत्वादन्तिमबुद्धेरपीति । नैवम् । किञ्चियतीषु बुद्धिषु व्याप्यव्यापककोटिमवलम्ब्य व्याप्तिग्रहरूपयैव धिया शेषबुद्धौ बाधनं व्युत्पादयसि त्वमद्वैतश्रुतेः, किम्वा बुद्ध्यान्तरदृष्टव्याप्तिसनाथया पक्षधर्म्मे हेतुमुल्लिखन्त्या बुद्ध्यान्तिमबुद्धिविषयया । नाद्यः । व्याप्तिबुद्धिर्यदि विशेषेपि स्वातन्त्र्येण बाधात्मिकोपेयते तदा सैव विशेषबुद्धिरपि स्यादिति गतमनुमानकथया । अथैवमनुमितिमभ्युपैषि तदा सा नात्मानमपि पक्षीकृत्य प्रवर्त्तत इति तत्रैव दत्तपदा सर्व्वामद्वैतश्रुतिपरम्परामालम्बत इत्युक्तमावर्त्तते । अथ सर्व्वा विवादाध्यासिता बुद्धयः स्वविषयेभ्योभिन्ना बुद्धित्वात् घटपटबुद्धिवदिति सामान्याकारेणात्मानमपि धर्म्मीकृत्यात्मनोपि स्वविषयाद्भेदं साधयिष्यत्यनुमेति मन्यसे । नैवम् । एतमपि विषयितो विषयस्याभेदं बोधयन्ती श्रुतिरनुमान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मप्यनवकाशयति। विषयिस्वविषययोर्मिथोभेदे ऽपि साध्ये अस्तु हेत्वनुयोगः, परबुद्धीस्तद्विषयांश्च प्रति निराबाधा सती श्रुतिरेकस्याबुद्धेर्विषयादपरामपरस्याश्च परामभेदबोधाय धावन्ती सर्वाद्वैतएव पर्य्यवस्यतीति। नच शक्यमनुमातुं सर्वस्याबुद्धे र्विषयात् सर्वा बुद्धिर्भिन्नेति, माभूदन्यबुद्धिविषयादात्मनोऽपि बुद्धिर्भिन्नेति, नचात्मव्यतिरिक्तादित्युक्तेऽपि निस्तारः स्यात्, अद्वैतवादिनः सर्वाभेदमिच्छतः क्वचिदपि तदसिद्धा विशेषणाप्रसिद्धेरिति। एतेन सर्वं भिन्नमिति वाक्येन विना बाधं स्वतःप्रमाणेन सप्रतिशब्दा सेयमद्वैतश्रुतिरित्यप्यनवकाशं प्रत्यवस्थानं मन्तव्यम्। यस्मात् कस्मादपि भेदे मिथ्यातः सत्यभेदोपगमेन सिद्धसाधनात् सर्वस्मादिति स्वस्मादप्यापत्तेः। स्वव्यतिरिक्तादिति चाद्वैतवादिन्यव्यवच्छेदकं। तदेवं "हेत्वाद्यभावसार्वत्र्ये सर्वं पचतया स्थितम्। किञ्चित्तु त्यजता दत्ता सैव द्वारद्वयश्रुतेः।," अतएव च "आद्यधीवेद्यभेदो याप्यन्यथानुपपन्नता। स्वज्ञानापेक्षणादन्ते बाधते नाद्वय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतिम्।,, नच संस्काराख्ढदृढ़ान्वयव्यतिरेकान्वय व्यतिरेकोऽद्वयप्रतिपत्युत्पत्तिप्रतिबन्धः शक्यशङ्कः, अतः "अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि। अबाधात्तु प्रमामत्र स्वतःप्रामाण्यनिश्चलाम्। असंसर्गाग्रहस्यापि सता शंसत्यबाधिते। अत्यन्तासदसंसर्गाग्रहं संसर्गलग्नकम्। अनौचित्या हि तर्केण दुर्बाधैवाद्वयश्रुतिः। अनारोपितमूलत्वाद्वलाद्वं युरताद्दशा। प्रष्टत्तेनाप्यनौचित्यमूलं येन न लूयते, तत्रानौचित्यसाम्राज्यं वैपरीत्यात्तु नात्र तत्।,, ननु यद्यद्वैतादाद्रियते त्वया नेतरोऽस्य भेदोगृहीत इति ततोऽस्याद्वैताम्नायैरभेदबोधनेन तद्द्वारा सर्वाभेदे पर्य्यवसातव्यमिति। ततस्ततस्तस्य भेदस्तदैव गृह्यते मया तस्मादुदाह्रियमाणतायामनुदाह्रियमाणतायान्न कस्यचिदेतत् प्रत्यवस्थानमस्थाने इति। नैवम्। अन्तिमबुद्धेरद्वैत श्रुतिजबुद्ध्यादितोभेदो न त्वया प्रमित इति सयोच्यमाने यस्तदीय स्ततोभेदस्त्वया प्रमातव्यः स न तावत् प्रत्यक्षेण तत्कालमन्तिमबुद्धे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रनुपस्थितेः। यदि च केनचिद्धेतुना वा कयाचिदनुपपत्त्या वा तथा स्यात्तदानीमद्वैतवादिनं प्रति हेतोः साध्याद्यविशिष्टतयानुपपत्तेः, येन विना सा तदविशिष्टतया न ततः कथमाभासात्प्रमोदयः स्यात्। नच वाच्यं स्वयं मया स भेदो ज्ञेय इति नास्ति प्राश्निकोपि मां प्रत्यसिद्धादिरिति। यतोस्य त्वद्वचनस्य वैयर्थ्यापत्तिः स्यात्, वचनस्य परार्थत्वात्, मौनमवलम्ब्यावतिष्ठमानश्च भवानप्रतिभातो न मुच्यते। नच स्वयं प्रमितोभेदः परं प्रति वचसा केवलं बोध्यत इति वाच्यं, त्वद्वचसि परस्याप्रत्ययात्। विजिगीषुं परं प्रति विजिगीषवन्तरवचनं हि तत्रार्थे तज्जिज्ञासोत्पादनद्वारेण स्वतस्तस्य तदर्थप्रतिसमुत्पादनपर्य्यवसायितयोपयुक्तम्। नचाद्वैतवादिनं प्रति तथा कर्त्तुं शक्यते तं प्रत्यन्यथासिद्धेरुक्तत्वात्। नच वाच्यं मम वचनात् सन्देहेनापि स्मृत्या तत्र तत्र सन्दिग्धबाधितभावया नाभेदप्रतिपादनं ते घटत इति यस्मादद्वैतं मन्यमानेत भेदासिद्धा सर्व्वत्र साध्याविशेषादिदोष प्रतिसन्धायिना संशय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापनवकाशीकरणमेव स्यात् तस्मात् "एकं ब्रह्मात्मसादायनाद्यं गणयतः क्वचित्। आस्ते न धीरवीरस्य भङ्गः सङ्गरकेलिषु।" अपि च प्रतीयते तावदिदं सामान्यतो यन्नाम किञ्चिन्नरश्चेतसा चिन्तयन्नस्तीति किञ्चिद्वा विवक्षुरित्यादि तत्र परस्य बुद्धिविषयो विवक्षादिर्विषयो वा, यो विशेषतो विनिगमनं विनैव न प्रतीयते ततोऽन्तिमबुद्ध्यादिभेदो न भवता शक्यप्रमः, परेण तच्चिन्तनादेरपि सम्भवात् स्वस्मात् स्वस्य भेदाभावात् ततस्तत्र लब्धपदा कथमद्वैतश्रुतिर्विस्वाभेदे पर्यवस्यन्तीत्वया शक्यबाधा स्यात्। तस्मात् "नैव सामान्यतोज्ञाते नैव ज्ञाते विशेषतः। प्रदरोधस्त्वया कर्त्तुं शक्यः स्यादद्वयश्रुतेः।" ननु भेदमनङ्गीकुर्वतो भवतः कथं तत्तत्पदपदार्थवैचित्री व्यवहारो न व्याहन्यते, कथं व्याहन्यते प्रति वच्यते हि तत्। किञ्च योऽयं त्वया व्याघात आपादनीयः सोपि कस्माच्चिदापादकात्। नचापाद्यापादकमभिद्यमानमापत्तेर प्रभवेदिति। तस्मात् "नानात्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मवलम्ब्यापि वदत्यद्वैतवादिनि। असिद्धभेदाद्व्याघातः पतेदापादकात् कुतः।

(६) इदमपि विचारमर्हति यदद्वैतश्रुतीनां बाधकमुपन्यस्यते प्रत्यक्षादि घटपटप्रभृतिभेदग्राहि, तदपि कीदृश्यर्थे पर्य्यवस्यतु। तथाहि प्रत्यक्षेण योऽसौ भेदो गृह्यते स किं स्वरूपभेदः किमन्योन्याभावः किं वैधर्म्यम् अन्यदेव वा। यदि तावत्स्वरूपभेदः, स नाम घटपटयोर्हि स्वरूपं, यत्परस्परस्माद्भेद स्तत्परस्परमनन्तर्भाव्य न सम्भवति, भेदो हि भवन् कस्मादपि भवति। अन्यथा स्वरूप भेद इति पारिभाषिकं नाम स्यात्। यदा च घटाद्भेदः पटस्येत्येतावानेवार्थः पटादेः स्वरूपं प्रत्यक्षेण गृह्यते तदा घटोऽपि पटात्मन्येव प्रविष्ट इति घटपटयोरैकात्म्यमेव भेदग्राहिणा प्रत्यक्षेणावगाहितमिति विपरीतमापद्यते। ननु यथेयं प्रतीतिरभेदोल्लेखितया व्याख्यायते तथा भेदोल्लेखेपि दीयतामस्यां दृष्टिरभेदे हि घट इत्येव पट इत्येव वा बुद्धिः स्यात् न तु घटाद्भिन्नः पट इति चेत्, स्यादप्येष पर्य्यनुयोगः यद्यविद्यमान भावभेदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारमार्थिकमभेदमिच्छन्तोपि प्रत्यादिशामः। तस्मात् "अभेदेनोल्लिखन्ती धीर्न भेदोल्लेखनक्षमा। तथाचाद्ये प्रमा सा स्यान्नान्त्ये स्वापेक्षवैभसात।," अथ भेद इत्येतावन्मात्रं पटस्य स्वरूपं घटादिति तद्घटेन प्रतियोगिनान्येनैव निरूप्यते तदपि नोपपद्यते निष्प्रतियोगिकस्य भेदस्य प्रमाणागोचरत्वात्, नित्यं प्रतियोगिघटित एव तस्मिन् प्रमाणप्रसरात्। का चेयं वाचोयुक्तिः यदन्यासाकाङ्क्षं पटस्य स्वरूपमन्येन निरूप्यमाणं ततोभेदोभवतीति। न हि यत् स्वरूपेणैव नीलं तत्पीतेन निरूप्यमाणं सत् नीलं भवतीति, यदपि चोक्तं प्रतियोगिना घटेन निरूप्यमाणं पटस्य स्वरूपं भेद इति, तत्रापि पटं प्रति प्रतियोगित्वं घटस्य किं स्वरूपं किं वा धर्म्मः कश्चित्, यदि प्रथमस्तदा पटं प्रति प्रतियोगित्वमित्येतावानेवार्थोघटस्य स्वरूपं भवदात्मन्येव पटमपि प्रक्षिपतीति कथं नाद्वैतमेव पर्य्यवस्यति तत्रापि यदि प्रतियोगित्वमात्रं घटस्यात्मा पटं प्रतीति च घटापेक्षित्वमन्यदेव, तदप्यनुपपन्नम् अकिञ्चिदपेक्षस्य प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगित्वस्य प्रमाणाविषयत्वात् पटं प्रतीत्यनापि च स्वरूपतदन्यविकल्पे दोषएव। नापि द्वितीयः योसौ धर्मः पटं प्रति प्रतियोगित्वं तस्यात्मनि पटोऽपि प्रविशतीति तेन सह पटस्याद्वैतं स्यात् यदा च पटो घटस्य धर्मतामापन्न स्तदा घटोऽपि पटधर्मतामनेनैव न्यायेन गच्छेत् न हि पटेन प्रतियोगिना निरूप्यमाणत्वे घटस्यान्या गतिरस्तीति परस्परमाश्रितत्वमाश्रयत्वञ्च स्यात्। नच कस्यचित्प्रमाणस्य विषयो घटारूढः पटस्तत्पटारूढश्च स एव घट इति। किञ्च धर्मस्य तस्य धर्मिणा सममसम्बन्धेऽतिप्रसङ्गः। सम्बन्धानन्त्येऽनवस्था प्रथममन्ततो वा गत्वा स्वभावसम्बन्धोपगमे सम्बन्ध्यन्तरस्यापि तत्स्वभावप्रवेशादभेद एव पर्य्यवसानं स्यादिति एवमन्यस्मिन्नपि धर्मविकल्प इति तस्मात्स्वरूपभेदे प्रमाणमभवत् प्रत्यक्षमद्वैतएव प्रमाणं भवति। ननु घटादिकमेव यदान्यानपेक्षं वीक्ष्यते तदा घटादिकमित्येव प्रतीयते यदा पुनः पटादिना निरूप्यते तदा ततोभेद इति प्रतीयते। मैवम्। घटादिकमित्येवम्भूतप्रतीते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थावच्छेदप्रतीतिर्लक्षणा सा च न घटादिमा-
त्रेण विषयेणान्याकारा भवितु मर्हति तेन
पटादिकमधिकं तदा प्रकाशत इति विशेषः
स्यात् घटपटविषयप्रतीतितोपि वैलक्षण्यात्।
न हि घटः पटश्चेति घटात्पटोभिन्न इति प्रती-
त्योरैकार्थत्वं कश्चित्प्रत्येति तत् कस्य हेतोः
पञ्चम्या प्रथमया च वैकल्पिकनिर्देशमसह-
मानयैव प्रतीतिकलहनिरासात् न हि घटः
पटश्चेति प्रत्येतव्ये कश्चिद्घटात्पट इति प्रत्येति
तस्मात् घटस्य न स्वरूपनिरूपणे पटप्रतीत्य-
पेक्षा। नच यत्प्रतीति र्यत्प्रतीतेः कारणं स्यात्
तत्र तस्याः कारणभूतायाः प्रतीतेर्योऽर्थस्तस्मा-
दयमिति कृत्वा कार्य्यभूतायाः प्रतीतेरर्थः प्रती-
यते साक्षान्निर्व्विकल्पार्थोदेव सविकल्पकार्थस्य
प्रतीतिः सा च सादृश्यादेरेवं स्मर्य्यमाणादिः
स्यात् तस्मात्पटोघटाद्भिन्न इत्याद्याकारेण पटा-
देर्भेद एव भेदावधिभूत घटादिसङ्कुटितः
स्फुटं सर्व्वलोकसाक्षिकः प्रतीयमानो नैकप्रती-
तेरन्य प्रतीत्यपेक्षामात्रेण समर्थयितुं शक्यः
अतिप्रसङ्गादिति। अतएवान्योन्याभावभेद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मवगाहमानं प्रत्यक्षमद्वैतश्रुतिबाधकमित्यपि निरस्तम् अन्योन्याभावोपि हि यस्माद्भेदएष्टव्य स्तस्मात्सन्येवान्तर्भावयेदुक्त युक्तिभिः। किञ्च घटपटयोस्तत्तदन्ययोश्च तादात्म्यमन्योन्याभावस्य प्रतियोगि मन्तव्यं तद्यदि सर्व्वथा नेष्यते तदा तद्विशिष्टस्तदुपलक्षितो वान्योन्याभावोपि न प्रमाणेन प्रत्येतुं शक्यः। न हि शशविषाणविशिष्टस्तदुपलक्षितो वा कश्चित्प्रामाणिको भवितुमर्हति तत्कस्य हेतोः तस्मिन्विशिष्टरूपेऽर्थे तादृशि चोपलक्षणव्यवच्छिद्यमानात्मनि प्रमाणं निविशमानं विशेषणमपि तदीयं तदुपलक्षणमपि वा नानुल्लिख्य भवितुं प्रभवति तस्मिंश्चात्यन्तमसत्येवालम्बने न तत्प्रामाण्यं शक्यसमर्थनम्। नच वाच्यं पटप्रतियोगिको घटमाश्रितोऽसावभावोऽभ्युपगम्यमान एको घटप्रतियोगिकः पटमाश्रितश्चापरोनात्यन्तासत्प्रतियोगितादोषमारोक्ष्यतीति। तथा सति संसर्गाभावादन्योन्याभावस्य कोविशेषः स्यात् तर्हि यथा घटाभावस्य पटसंसर्गवति घटसंसर्गाभावं पटे समर्थयसे तथा घटाभावः पटात्मक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति तत्तादात्म्याभावं पटस्य स्वीकरिष्यसि तस्मात्तादात्म्यं संसर्गञ्च प्रतियोगि कोटावन्तर्भाव्यान्योन्याभाव संसर्गाभावयोर्वैलक्षण्यमुपेयं तथा सति चात्यन्ताभावप्रतियोगिता दुर्वारा। नच वाच्यं घटे पटत्वं नास्ति पटे च घटत्वं नास्तीत्येतावन्मात्रपर्य्यवसितैवान्योन्याभाव व्यवस्थामन्तव्येति यतस्तथा सति घटत्वे पटत्वे च न कश्चित्तादृशोधर्मोऽभ्युपगम्यते योऽन्योन्यस्मिन्निषेद्धुं योग्य इति तयोस्तादात्म्यापत्तौ सत्यां घटे पटत्वं पटे च घटत्वं निषेधात्प्रमाणं घटत्वपटत्व एन्यद्वयमप्यावेदयतीति वैधर्म्यस्य स्वरूपभेदस्य चासम्भवेन किं प्रतियोगि किञ्चालम्बनं विधाय घटपटान्योन्याभावोपि प्रमाणपथमवतरेदिति अतएव न वैधर्म्यमपि भेदमावेदयत्प्रत्यक्षमद्वैतबाधकमुपपद्यते वैधर्म्ये हि घटत्व पटत्वादौ वैधर्म्यमन्यदस्तीत्युपगमे वैधर्म्यविश्रान्त्यनवस्थयोरैक्यमननुभवञ्च कथं प्रत्युत्तरणीयः। वैधर्म्ये च वैधर्म्यास्वीकारे वैधर्म्ययोरैक्यापत्त्या कथमात्माश्रयभेदत्वेन तयोः पर्य्यवसानं स्यात्। किञ्च ये ते वैधर्म्ये भेदौ ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किं घटादितोऽभिन्ने धर्म्मिणि निविशेते किम-
भिन्ने परस्परविरुद्धयोरनयोः पृथग्भूतस्य प्रका-
रस्यासम्भवात्। आद्ये येन भेदेन भिन्नत्वं वैध-
र्म्ययोर्मन्तव्यं तत्रापि पर्य्यनुयोग इत्यनव-
स्थायां पर्य्यवसानं स्यात्। सन्त्वनन्ता एव भेदा
इति चेन्न क्रमेण तेषामाश्रयसम्बन्धे सावधि-
सत्वे वस्तुनि तदन्वयासङ्गतिरेव। अथ जाय-
मानं वस्तु युगपदेव ते भेदाः परिरभन्ते तद
किम्भेदविशेषिते किम्भेदस्थितिरिति विनिगमक-
विशेषाभावादन्योन्यकलहं तेषां कः समाधातु-
मीष्टे। चरमचरमस्वीकार्य्येण च भेदेन प्र-
थम प्रथमस्वीकृतभेदोपयोगसिद्धेरग्रे धावन्
पश्चाल्लुप्यमानो विस्मरणशीलश्रुतवत्स भेदप्र-
वाहः किमालम्बेत। एवमेवम्बिधे विषयेऽन्य-
त्रापि "प्राग्लोपाविनिगम्यत्वप्रमाणाग्रिमैर्भवेत्।
अनवस्थितिसाध्यातुरचिकित्स्या निदोषतेति।,,
यदि च क्वचिद्गत्वा स्वरूपमेवान्योन्यं व्यावर्त्त-
मानं भेद इष्यते तदा ययोः स्वरूपं तथैष्टव्यं
तयोर्निस्वरूपतापत्तिः। अथ न स्वरूपमात्रं
मिथोव्यवर्त्तते किन्नाम स्वरूपविशेष इत्युच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हि स्वरूपविशेषमात्रव्यावृत्तया स्वरूपमात्रं तयोः स्यादित्येकत्वापत्तिः । अथ वा वक्तव्योऽसौ स्वरूपमात्रादन्योविशेषार्थः । अथ न स्वरूपं नाम किञ्चिदनुगतमिष्यते मया किन्तु विशेषरूपास्तु व्यक्तिष्वेव स्वरूपशब्दोनानार्थः सन्निविशत इत्यभिधत्से तर्हि शतमनेन न्यायेन गोत्वादिसिद्धिप्रत्याशया । न च प्रतिव्यक्तिस्वरूपपदसमयग्रहोपपत्तिः । यदि च स्वरूपं भेदः स्यात्तदा धर्मिणि दृष्टे स्वरूपं दृष्टमिति क्वचिन्न सन्देहः स्यादिति । यदि चाभिन्ने भेदो निविशेत तदा याप्येका व्यक्तिः प्रमीयते घटादिः सापि तेनैव भेदेन नैका स्यादित्येकाभावे वानेकमपि न व्यवतिष्ठते । एतेन न भेदावच्छिन्ने नाप्यभेदावच्छिन्ने भेदोनिविशते किन्तूदासीन इत्यपि निरस्तम् । अतएव भेदो नाम स्वरूपान्योन्याभाववैधर्म्यात्मकोधर्मान्तरं पृथक्त्वापरनामकमित्यपि परास्तं सोपि हि स्वाश्रये भिन्ने निविशेताभिन्ने वेत्यादि यथोक्तदोषकलङ्कनाजङ्गालएव स्यात् । स्वाश्रयेण च सह स्वस्मिन्नभेद भयाद्यदि स एव भेदोनिविशते तदात्माश्रयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यस्मेत्तस्मिन्नेव तस्मिन्नप्यन्य इत्यनवस्था क्वचि
दपि गत्वा भेदभेदाश्रययोर्भेदास्वीकारे च त
दैक्यद्वारिकामूलपर्य्यन्तमेकता धावेत्। "तदद्वै
श्रुतेस्तावद्बाधः प्रत्यक्षतः क्षतः। नानुमाना
तं कर्त्तुं तत्रापि क्षमते मते। अद्वैतागमनासीरे
साधु साधु न्वती परान्। सेवा मेवार्जयत्यर्थं
प्रतिपत्ति परम्परा।,, नन्वद्वैतश्रुतयोवर्णपद
विभक्तितदर्थादिभेदानुपजीव्यार्थं प्रतिपादयन्त्य
स्तोपजीव्याभिर्भेदबुद्धिभिर्न कथं बाध्यन्ताम् उप
जीवकस्योपजीव्याद्दुर्ब्बलत्वात्। मैवम्। न भे
दस्य सर्व्वथैवासत्त्वमभ्युपगच्छामः। किं नाम न
पारमार्थिकं सत्त्वमविद्याविद्यमानत्वन्तु तदीय
मिच्छामएव तदेव च कार्य्यकारणभावोपयोगि
एतेन एकमेवेत्येवकारव्यवच्छेद्येनाद्वितीयमिति
द्वितीयेन नेह नानेति नानर्थेन किञ्चनेत्यनेन
बहुना विना नोपपद्यमानेन व्याघात इत्यपि
प्रत्यादिष्टं श्रुतिभिस्त्वाद्वैतार्थाभिः पारमार्थिक
मद्वैतं प्रतिपाद्यते नच पारमार्थिकमितर
पारमार्थिकधिया शक्यबाधा माभूच्छुक्तिरजत
धिया परमार्थं शुक्तिमिति बाधः; यत्र त्वनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रनुष्णा इति बुद्धेरुष्णबोधोपजीवनादुष्णबोधे-
नानुष्णबुद्धिबाधः तत्र द्वयोरप्यविद्याविद्यमान-
त्वाद्बाधो युक्तः। ननु तत्रापि तर्ह्यनुष्णता
पारमार्थिक्येव साध्यतामबाधनाय। नैवम्।
अनुष्णताया जलादि दृष्टान्तसजातीयायाः शी-
ताद्यव्याहृतस्वरूपायाः प्रसाधनेनाविद्याविद्य-
मानत्व एव विश्रामात्, तदीयैवंविधरूपतानङ्गी-
कारे चाद्वैतस्यैव नामान्तरकरणापत्तेः तत-
स्तस्यां ज्ञेयज्ञानादिभेदावश्याभ्युपेयतया जग-
द्बाधयुक्तिकबलाप्रवेशासम्भवात्, अद्वैते च द्वैता-
श्रयस्य बाधस्य वास्तवस्यानवकाशादपारमा-
र्थिकत्वसम्भावनापि दूरत एवापसरतीति। ननु
किमद्वैतपरमार्थताभ्युपगमेन समाहितम्भवति
यत उपजीव्यबाधादद्वैते प्रमां श्रुतिर्जनयितुं
शक्नोतीति ब्रूमः। नैवम्। अद्वैतं हि पार-
मार्थिकमिदं पारमार्थिकभेदेन विरुध्यते नत्व-
विद्याविद्यमानेन तदविद्याव्यवस्थितं भेदं तद्-
बोधञ्चोपजीवन्त्या न परमार्थाद्वैतबुद्धेरुपजीव्य
बाधः। यदि श्रुतिजन्या भवत्यप्यद्वैतबुद्धिर-
विद्याविद्यमाना तथापि तद्विषयस्याद्वैतस्य परमार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदेवाद्वैतं विषयविरोधेन च तस्या बाध्य
सच नास्तीति तस्मात् "पारमार्थिकमद्वैतं
विश्य शरणं श्रुतिः। बाधनादुपजीव्येन
भेति न मनागपि।" श्रुतिरप्याह। "द्वितीया
भयं भवतीति" तस्माद्वैतं ब्रह्मैवेदं सर्व्वमि
श्रुत्यर्थेन सहैक्यमापन्नं ब्रह्मैव स्यात् विज्ञा
मानन्दं ब्रह्मेति श्रुत्या च ज्ञानात्मकतया व्य
तिष्ठते तेन यदिदमद्वैतज्ञानं श्रुत्या जनि
तद्विज्ञानाद्वैतात्मन्येव निविशते। ननु क
तस्य श्रुत्या जन्यत्वमुपपद्यते सत्यमेवं स्यात् य
तस्य पारमार्थिकी श्रुत्या जन्यतापि स्यात् अ
विद्याव्यवस्थिता तु तज्जन्यता, न पारमार्थिके
तदजन्यत्वेन विरुध्यते अतएव श्रुत्येदमेकं सा
ध्यते, यत्तत्र यद्येकता भेदाभावो यदि चैकसंख
यदि वा ज्ञानात्मत्वं यदि वा अन्य एकत्वनाम
कश्चिदभेदापरपर्य्यायो धर्मस्तद्द्वत्त्वं बोध्यं
तस्याद्वैत व्याघातकत्वान्न सेद्धुं शक्नोति तद
तदपि निष्पीडनमसहमानं ज्ञानश्रुतिजन्य
त्वेन सहैव निवर्त्तताम्। यत्तु तादृशस्याद्वैतस
धर्मस्य धर्मितया प्रमितं तन्मात्रमबाधादधिग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमार्थतोव्यवतिष्ठतां न हि परमार्थशुक्ती-
रजततया प्रतीयते यदा तदा बाधात्तत्र रज-
तत्वे व्यावर्त्तमाने शुक्तिव्यक्तिरपि तदपराधा-
न्निवर्त्तते सेयमद्वैतबुद्धि र्न तर्कसवतार्य्य प्राप्नै-
रपनेया।यदाह श्रुतिः नैषा तर्केण मतिरप-
नेयेति। तस्मात् "धीधना बाधना यास्मास्तदा
प्रज्ञां प्रयच्छथ। धेनुं चिन्तामणिं पाणिलब्ध-
मक्षौ यदीच्छथ।,, सेयमद्वैतदृष्टिर्दृष्टार्थापि,
यदाह स्वल्पमप्यस्य धर्मस्य त्रायते महतोभ-
यात्। तस्मात् "ईश्वरानुग्रहादेषा पुंसामद्वैत-
वासना। महाभयकृतत्राणा द्वित्राणां यदि जा-
यते।,, तस्मात् "आपाततो यदिदमद्वयवादि-
नोनामद्वैतमाकलितमर्थतया श्रुतीनाम्। तत्
स्वप्रकाशपरमार्थविदेव भूत्वा निष्पीडितादहह
निर्वहते विचारान्।,, तदिदमेताभिरात्म-
मतसिद्धसद्युक्तिलक्षणोपपन्नाभिर्युक्तिभिरुपनी-
यमानमद्वैतमविद्याविलास लालसोऽपि सहृ-
धातुभवान् तदनूचानयैवोपनिषदर्थश्रद्धताध्यात्मं
जिज्ञासमानः परमात्मतत्त्वं क्रमाद्वृत्तिव्यावृत्त-
चेताः स्वप्रकाशसाक्षिकं साक्षिकरसातिशायि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वात्मनैव साक्षात्करिष्यते। यथा च परिहृत चापलमालतत्त्वामृतसरसि निमज्य रज्यति निरायासमेव मानसं तथाहमकथयं नैषध चरितस्य परमपुरुषस्तुतौ सर्ग इत्येषा दिक्।

(७) "अभीष्टसिद्धावपि खण्डनानामखण्डि राज्ञामिव नैवमाज्ञा। तस्मान्नि तस्मान्न यथाभिलाषं वैद्वाम्भिकेऽध्वनि योजयध्वम्। तदेतादृशीषु सर्व्वास्वपि दर्शनस्थितिषु कासमासाकीनाः खण्डनयुक्तयः प्रगल्भन्ते यासां सोश्वरपरवशां विश्वव्यवस्थामनास्थाय निरसनसमर्थं, तासामवतारणार्थमयं प्रावादुकप्रवादोपन्यासः। तथा हि यदि दर्शनेषु शून्यवादानिर्व्वचनीयपक्षयोराश्रयणं तदा तावदमूषां निराबाधैव सार्व्वपथीनता। यदि तु प्रमाणादिसत्त्वाभ्युपगन्तृमताववलम्बनं, तदापि लक्षणखण्डनयुक्तीनां लक्षणविशेषखण्डने, लक्ष्यखण्डनयुक्तीनाञ्च तद्विषयप्रमाणविशेषखण्डने प्रत्येकं तात्पर्य्यम्। नच सौत्रादिलक्षणप्रमाणखण्डनेऽपसिद्धान्तापत्तिः, तादृश्याः सूत्रादि व्याख्यायाः खण्ड्यमानत्वात्। नच वाच्यं लक्षणविशेषवस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्थापक प्रमाणविशेषलक्षणादिव्याख्याविशेष-खण्डनपरत्वेन लक्षणान्तरं प्रमाणान्तरं व्याख्यान्तरञ्च प्रसज्येत भवतोऽपीति वितण्डा-कथामात्रस्य खण्डनानां वक्तव्यत्वात् तत्र च व्याहत्य स्वपक्षनिर्व्वाहं प्रति पर्य्यनुयोगानव-काशात्, एवञ्च सति वादिदर्शनमाश्रित्यापि खण्डनप्रयोगो निर्व्वाध एव एकदेशिवत्तत्यव-स्थातुं शक्यत्वात् वैयाकरणानामिव वा शब्द-सिद्धिप्रश्नस्य परकीयतत्त्वज्ञाननिरूपणार्थं स-मानपक्षस्थित्यापि पर्य्यनुयोगसांव्यावहारिक-तायाः सम्भवात् वस्तुस्थितिं कुर्व्वाणेन च विचा-रकेणावश्यमेतायुक्ताय उद्धरणीयाः, अन्यथा वस्तु व्यवस्थितेरशक्यत्वादिति वादेऽपि प्रयोगः सम्भवत्येव खण्डनयुक्तीनाम् जल्पस्त्वेका कथा न सम्भवत्येव सामयिकी वितण्डा द्वयशरीरत्वात्, अन्यथा जल्पद्वयेनापि किमित्येका कथा न कल्प्यते अवोचाम च जल्पविचार प्रस्तावे विस्त-रेण तदिति । जल्पकथयापि वाभिधाने स्वपक्षे व्याहत्य सदोषस्यापि प्रमाणतयाभिधानं कृत्वा तदीयोद्भावनकारी काममपि खण्डनयुक्तिमवतार्य्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाधनीय इति जल्पेपि नात्यन्तमनवकाशाः खण्डनयुक्तयः। इतिखण्डनभूमिका

(८) कीदृश्यः पुनस्ताः। उच्यन्ते। तथा हि लक्षणाधीनतावल्लक्ष्य व्यवस्थितिः, लक्षणानिचानुपपन्नानि, ज्ञानाधिकरणादिलक्षणनिरूपणद्वारेण चक्रकाद्यापत्तेः, तेषु तावत्तत्त्वानुभूतिः प्रमेत्ययुक्तं, तत्त्वशब्दार्थस्य निर्व्वक्तुमशक्यत्वात् तस्य भावो हि तत्त्वमुच्यते, प्रकृतश्च तच्छब्दार्थः न चात्र प्रकृतं किञ्चिदस्ति यत्तच्छब्देन परामृश्यते, अथानुभूत्या सम्बन्धि यो विषय आक्षेपाद् बुद्धिस्थः कार्य्यते स तच्छब्देन परामृश्यते वक्तृश्रोतृबुद्धिस्थतायामेव प्रकरणपदार्थविश्रामात् तेन यस्यार्थस्य यो भावस्तस्य तत्त्वमुच्यते इति न, अरजतादेरपि रजताद्यात्मना अनुभूतिविषयतासम्भवादसत्यानुभूत्यव्यवच्छेदात् अवितुरतत्त्वशब्दार्थत्वप्रसङ्गेन च धर्म्मांशे विशिष्टे च प्रमाया अप्रमात्वापातात्। अथोच्यते अवयवार्थचिन्तया दूषणाभिधानमिदं त्यज्यतां यतोयं तत्त्वशब्दः स्वरूपमात्रवचन इति, एतदप्ययुक्तं स्वरूपत्वस्य जातेरपाधेर्वा स्वात्मनि वृत्तप्रवृत्तिभ्यामनुपपत्तेः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपशब्दार्थस्यैकस्यासम्भवेन प्रतिविषय व्यावृत्त्या लक्षणस्याव्यापकत्वापातात्। कश्चन्तु तत्त्वेति विपर्य्यासादेर्निरासः तथाहि शुक्तौ यो रजतमिति प्रत्ययः सोपि स्वरूपबुद्धिरेवेत्येव, न हि धर्मी वा रजतत्वं वा न स्वरूपं, नापि तयोः प्रतिभासमानः सम्बन्धो न स्वरूपमिति युक्तं, समवायो हि तयोः सम्बन्धः सच स्वरूपमेव, सत्यं समवायःस्वरूपं स एव तु शुक्तिव्यक्तौ रजतत्वस्य नास्तीति चेत्। नैवम्। तत नास्तित्वेपि स्वरूपताया अव्यावृत्तेः न हि गृहे देवदत्तो नास्तीति स्वरूपं न स्यात्,न स्वरूपमात्रं तत्त्वमुच्यते किन्तु यद्देशकालसम्बन्धि यत्स्वरूपं प्रतीतं तस्य तद्देशकालसम्बन्धस्वरूपं तत्त्वमुच्यत इति चेत्। नैवम्। देशकालसम्बन्धांशे प्रमाया अप्रमात्वापातात् तयोः स्वरूपमेव तत्त्वशब्दार्थ इति चेन्न तत्त्वपदस्यानेकार्थत्वे लक्षणाव्यापकत्वापत्तेः। अथैवं ब्रूषे यद्यथाभूतं प्रतीयते तत्तथा परमार्थतो व्यवस्थितं तत्त्वमुच्यते। नैतदपि युक्तं यद्यथाभूतं प्रतीयते। तद्यदि प्रतीतिसमयमपहाय कालान्तरे तथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्स्मृतिजन्यसंस्काररहितज्ञानत्वं वा. तदपि दूरध्वंसकालीन
नियतासाधारणकारणकवृत्तित्वं वा ? नतावदाद्यः
हि. अनुभूतित्वं

भूतं स्यात्तदाप्येवं तत्त्वं स्यादेवेति भाविपाक रागः कुम्भः श्यामदशायामपि रक्तपित्ति रक्ततयोपलभ्यमानस्तत्त्वं स्यादिति तद्बु प्रमात्वापातः। यदा तदेति विशेषणप्रक्षेपे च कालविशिष्टताप्रतीतेरप्रमात्वापातः। न कालवैशिष्ट्येऽपि कालान्तरसम्बन्धः सम्भवी अन्योपाध्यवच्छिन्नः सोऽन्योपाध्यवच्छिन्नो सम्भवत्यतीति चेत् तर्हि दण्डेऽपि देवदत्त कुण्डलिनं समारोप्यत्येव, उपाधिभेदेऽप्युपाधेय स्यैकत्वानिष्टेर्नैवमिति चेत् तुल्यम्। एतेन कारणं तत्त्वमित्यपि निरस्तम्। सर्वस्य तथात्वे प्रमित्यभावेनात्माश्रयेण च प्रतिक्षणविशिष्टवि-श्यावश्यककारणत्वोपगमदुरपवादत्वादर्थक्रिया कारित्वस्वरूपसत्त्वलक्षणाङ्गीकारि जैनचरण-शरणप्रवेशविडम्बनादिदोषग्रासेन चेति। किं चेदमनुभूतित्वं नाम ज्ञानत्वावान्तरजातिभेदो वा, स्मृतिव्यतिरिक्तज्ञानत्वं नाम जातिरेका-भ्युपगम्येति कुतः, अनुभवामीति प्रत्ययानुगम-वशादिति चेन्न, माघमासीयनिशावसाने सिता-सितसरित्सम्भेदस्नायिनः सत्यपि शब्दबलाद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावि स्वकीयस्वर्गसुखसम्पत्तये सुखमनुभवामीति प्रतीत्यनुदयात् प्रत्युत शीतसम्भूतवेदनासम्वेदनादेवा,परस्त्रियञ्च सम्भुञ्जानस्यास्तिककामुकस्य शब्दाधीने सत्यपि भाविनरकगमनानुभवनीययातनाधिगमे दुःखमनुभवामीति मतेरनुत्पत्तेः प्रत्युतानन्दमानन्दं सम्विदन् सांप्रतमस्मीति प्रत्ययात्। यदि तु शब्दोपदर्शितव्याप्तिजमनुमानमनुभवएव स्यात्, तर्हि सुखं दुःखं वानुभवामीति तयोः प्रत्ययः स्यात्। अथ मन्यसे साक्षात्कारमनुभवामनुरुध्य तयो नैवमधिगमव्यवहारौ,शब्दजानुमानापेक्षौ तु विमर्शकस्य स्यातामेव ताविति, तर्हि साक्षात्कारिणि ज्ञानेऽनुभवप्रत्ययव्यवहारौ साक्षात्त्वनिबन्धनाविति तत्रानुभवत्वजातिकल्पनायां न प्रयोजनप्रमाणे इत्यनुभूत्यर्थभेदाल्लक्षणानुगमो दोषः। अथ स्मृतिव्यावृत्तेन रूपेण यः प्रत्यक्षादिष्वनुभव इत्यनुगतावगमः स साक्षात्कारित्वादनुपपन्नः।,ततश्च साक्षात्कार्य्यसाक्षात्कारिज्ञानविशेषसाधारणमनुभूतित्वमन्यदेष्टव्यमित्युच्यते, तदपि न युक्तं पदार्थान्तरव्यावृत्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रूपेण यस्तदितरेष्वनुगतप्रत्ययः शब्दव्यवहारे वा तत्र तदेव रूपं निमित्तं न तु जातिः काचित्तदनुरोधात्कल्प्यते। तथा सत्यलक्ष्यपदार्थेभ्यो घटादिभ्यो व्यावृत्तेन रूपेण बिभीतकादिसाम्यावगमादक्षता जातिः कल्प्या प्रसज्यते इतोऽपि नानुभूतित्वं नाम स्मृतिव्यावृत्ता जातिः तथा हि-स एवायमिति तावत्प्रत्यभिज्ञा जायते सा किं स्मृत्यनुभवरूपं ज्ञानद्वयम्, एकमेव वा विज्ञानमंशे स्मृतिरंशे चानुभवः, उत स्मृतिरेव। आद्यो अनुभव एव, आद्ये य एव प्रत्यभिज्ञायां प्रागवस्थाविशिष्टादिदन्ताविशिष्टस्याभेदः प्रकाशते स स्मृतावन्तर्भावयितुमशक्यः अननुभूतचरत्वेन संस्कारानुपनेयत्वात्। अत एव न तृतीयोऽपि, नाप्यनुभवेऽन्तर्भावयितुमसौ शक्यः, प्रत्यभिज्ञानकालेऽनुभवेन प्रागवस्थाया असम्वेदनात्। सम्वेदने चानुभव एवेति शेषपक्षेऽन्तर्भावः स्यात्। स चाग्रे दूषयिष्यते। अत एव न द्वितीयः प्रागवस्थाविशिष्टाभिन्नत्वांशेऽनुभवस्वीकारश्चेत्प्रागवस्थावैशिष्ट्यमप्यनुभवविषय एव निविष्टमिति चरमपक्षप्रवेशः। अथ

CC-0. In Public Domain. Digitization by eGangotri

प्रागवस्थाविशिष्टादभिन्न इत्ययमर्थोऽनेकांशस्तत्र प्रागवस्थाविशिष्ट इत्यत्रांशे स्मृतित्वमभिन्न इत्यत्रांशे चानुभवत्वमित्युच्यते। एवं तर्हि प्रागवस्थाविशिष्टः स इदन्ताविशिष्टोऽभिन्नोऽयमिति स्मृत्यनुभूतिभ्यामावेदितम्भवति। प्रागवस्थाविशिष्टाश्रयतयात्वभेदः केनापि न प्रकाशित इति य एव प्रागवस्थाविशिष्टः स एवायमिति प्रत्यभिज्ञायाः शरीरं न स्यात्। अथानुभवेन योऽसावनुभूयमान धर्म्माश्रयतयाऽभेदोवोधितः स कोट्यन्तरमनालम्ब्य न पर्य्यवस्यतीति केनचित् खलु कस्यचिदभेदो भवति। स च स्मृत्यंशोपनीतमेव सन्निधानात्कोट्यन्तरं प्रागवस्थाविशिष्टरूपमालम्बत इत्यभेदस्य प्रागवस्थाविशिष्टाश्रयतासिद्धिरिति। तदेतत्तुच्छतरम्। कोट्यन्तरमालम्बत इति किं कोट्यन्तराश्रितो भवति, उत कोटयन्तराश्रिततया ज्ञायत इति। आद्ये अभेदस्तेदानीं प्रागवस्थाविशिष्टधर्म्याश्रयणोत्पत्तौ पूर्वं प्रागवस्थाविशिष्टेदन्ताविशिष्टयोर्भेदः स्यात्, द्वितीये तु यदैव कोट्यन्तराश्रिततया इदन्तावच्छिन्नधर्म्यभेदस्य ज्ञानं तत्स्मृतौ नान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्भावयितुं शक्यं नाप्यनुभवांश इत्युक्तएव दोषः
किञ्च यदा प्रत्यभिज्ञानं स इत्यंशे स्मृतिरयमि-
त्यंशे चानुभव इत्येकं ज्ञानमभ्युपेयते तदा धर्मि-
णमादायापि स्मृत्यनुभवसङ्करो दुर्वारः। तथाहि
संस्कारेण तत्तामात्रं वोपनीयते तत्ताविशिष्टो
वा धर्मी। आद्ये स इति प्रत्यभिज्ञायाः शरीरं
न स्यात्, तत्तायाः केवलायाः संस्कारेणोप-
नीतत्वात्। नापि द्वितीयः, तथा सत्ययमित्यनु-
भवांशे धर्मिप्रकाशो वक्तव्य एव अन्यथा इद-
न्तामात्रप्रकाशोऽयमिति तच्छरीरं न स्यात्।
एवञ्च संस्कारस्य चेन्द्रियस्य च धर्मिप्रतीति-
हेतोरुभयस्योपनिपाते किं विशेष्यांशे भिन्ना-
भ्यां ज्ञानाभ्यामुत्पत्तव्यम्, उत कारणद्वयसम्भे-
दादभेदभाजा ज्ञानेन। प्रथमे प्रत्यभिज्ञान-
स्यैकज्ञानव्यक्तिताभ्युपगमव्याघातः भेदपक्षोक्त-
दूषणापातश्च। द्वितीये धर्म्यंशे प्रत्यभिज्ञायाः
स्मृतित्वमप्यनुभवत्वमपीत्यनुभूतिस्मरणसङ्कर
इति विषयव्यवस्थयापि नियमोभग्नः। अथो-
च्यते माभूद्विषयोपाधिभेदाद्व्यवस्थानमुपाध्यन्त-
रात्तु भविष्यति, तद्यथा संस्कारजत्वमादाय

CC-0. In Public Domain. Digitization by eGangotri

स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमादाय चानुभवत्वव्यवस्थानमिति विरोधपरिहारोऽस्तु। न, प्रमात्वसामान्यानङ्गीकारे प्रमारूपताया विषयव्यवस्थित्यैवोपगमे नोपाध्यन्तरोपन्यासेऽपि स्मृतित्वानुभूतित्वयोरेकस्मिन्नेव धर्म्मिण्यर्थे निवेशात्प्रमात्वाप्रमात्वयोरेकविषयतैव। किञ्च ज्ञानविकल्पानामध्यात्मभावाभावसम्वेदनात् स्मृतित्वानुभूतित्वयोर्द्वयोरपि प्रत्यभिज्ञायां स्वतः प्रतिभानेन विषयनिरूपणव्यवस्थित्यनङ्गीकारे स्मृतित्वादेरिदन्तायामपि स्मृत्यवगमप्रसङ्गात्। यदि च संस्कारजत्वमेव स्मृतित्वं, तदा तस्यैव विरोधेऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिरुपन्यस्यत इति नान्यस्य चेतसि निर्विशते। अथान्यत्स्मृतित्वन्नाम, तदाप्यनुपपत्तिः, तथा हि संस्कारजत्वं संस्कारादनन्तरं नियमेन भावो, नियतत्वञ्च नानाव्यक्तिगतमेकं रूपं संग्राहकमक्रोडीकृत्य न सम्भवतीति स्मृतित्वेनैव संस्कारजत्वं वक्तव्यं, तथा च संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिः स्मृतित्वव्यवस्थितौ च संस्कारजत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यन्योन्याश्रयः, तस्मात् स्मृत्यनुसङ्करो दुर्वार एव। अपि च स्मृत्यनुभवयो र्ये कारणसामग्र्यौ ते प्रत्यभिज्ञायां मन्तव्ये न वा। नचेत् कथमंशतोऽपि स्मृतित्वमनुभवत्वञ्च प्रत्यभिज्ञानस्य एवमेव तथात्वेति प्रसङ्गात् । स्मृत्यनुभूत्योः स एव सङ्करः। प्रथमे पृथगेव कार्य्योत्पत्तिप्रसङ्गः प्रत्येकं स्वस्वकार्य्ये समर्थत्वात्, सामग्रीभेदस्य कार्य्यभेदहेतुत्वेनावधारितत्वात्। अथ यत्र ते पृथक्जायेते तत्र पृथगेव कार्य्यं, प्रत्यभिज्ञायान्तु तयोर्युगपज्जातत्वेन सम्भूयजननात्करम्बितकार्य्योत्पत्तिः। यद्यपि पटघटादिसामग्र्योर्नैवं दृश्यते, तथापि तद्विलक्षणस्वभावत्वादनयोरीदृशत्वमुपपद्यते, न हि एकस्य यादृक्पदार्थस्य स्वभावस्तादृगन्यस्यापि सर्व्वस्य भवति, जगद्वैचित्र्यभङ्गप्रसङ्गादिति। नैतदस्ति। यत्र हि मिलितत्वं तयोस्तत्र किं परस्परसहकारित्वमनयोरेष्टव्यं न वा। न चेत् परस्परमेलकलक्षणो विशेषोऽनुपयोगी, कार्य्यजननं प्रति मिथः सहकारिभावविरहेणाप्रयोजकत्वात्, ततश्चाविशेषात् पृथगेव कार्य्यं प्रसज्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ परस्परसहकारित्वं तयोरिष्यते, तदानुभवांशेऽपि संस्कारस्य व्यापारः स्मरणांशेप्यक्षस्येति नियामकत्वाभिमतयोरुभयांशे साधारण्यात् स्मृत्यंशेप्यनुभूतिरनुभूत्यंशेपि स्मरणमिति वक्तव्येपायितं प्रत्यभिज्ञायामनुभूतिसङ्करेणेति नाप्यनुभव एवेति पक्षः, तथा सति तत्तावच्छिन्नस्याभेदाश्रयतायां न संस्कारोनेन्द्रियसन्निकर्षस्येति तदविषयत्वापातः। नच संस्कारद्वारा प्रत्यासत्त्या सम्बद्धविशेषणतया तद्ग्रहः, क्वचित् सोऽयं न वेति तर्हि संशयो न स्यात्, दोषवशात्तत्र तत्प्रकाशो न सम्बद्धविशेषणत्वादिति चेन्न, विनापि संस्कारं दोषवशात्तदापत्तेः। वस्तुप्रकाशिनि च दोषवाचोयुक्त्यनिषत्तेः। क्वापि तस्यावस्तुप्रकाशित्वाद्दोषस्येत्, कथमक्षादेरपि तन्न स्यात् विशिष्टत्वेन तथात्वस्य प्रकृतेप्यपरिहारात्, न हि विनैव कुतोपि विशेषादस्यावस्तुप्रकाशिता। सत्यप्येवं दोषादवस्तु न एव प्रकाशे संशयात्प्रेक्षावत्प्रवृत्त्यादेरसम्भवापत्तेः। वस्तुविषयत्वेपि दोषादनिश्चयतेति चेन्न, वस्तुनस्तस्यासङ्कीर्णत्वात्तस्य प्रकाशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव संशयैककोटौ प्रकाशितमिति कुतः तद-
निश्चयता, निश्चयार्थस्य च संशयकोटावखण्डने
संशयेन तदभावाधिकग्राहित्वेपि, निश्चयत्व-
स्याप्रत्यक्षत्वादेवाभावनिश्चयः कोप्यन्तरं केवल-
मधिकं स्यात्, जातिः संशयत्वं तत्प्रयोजकश्च
दोष इति चेन्न, इदं तद्वा न वेति संशयकोटयर्थ-
निर्देशसमन्वयेन वा-शब्द प्रतीतिव्यवहारयो-
रभावापत्तेः, प्रतीत्या सह वाकारार्थं सम्बन्धे
प्रत्येमि न वेति पदापत्तेः, वाकारार्थस्य प्रतीति
गतत्वेपि निश्चयत्वेतरस्थाणुमानय पुरुषं वेति
स्थाणुपुरुषगतधर्मिकव्यवहारानापत्तेः। तस्मा-
द्वाकारार्थस्य ज्ञानधर्मत्वे साक्षात्कारित्वादि-
वद्विषयानन्वयापत्तिरेवेति। न च प्रत्यासत्तौ
सत्यामपि प्रत्यासत्त्यपुरस्कारान्मनसा न ग्र-
हणं, तत्र दोषवशादित्यस्तु, दोषे सत्यपि वस्तुनः
संस्कारेण संस्कारस्यालना यस्य मनसा तस्य
च वाह्येन्द्रियेण प्रत्यासत्त्यपेक्षिणएव तदर्थ-
प्रकाशादिनियमोपपत्तेः कः प्रत्यासत्त्यपुर-
स्कारस्त्वन्मते स्यात्, यदि तु संस्कारप्रत्यासत्ति-
मनपेक्ष्य तथा सन्दिह्यते तदा अननुभूय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसृत्य वा तया सन्दिह्येत। वस्तुतस्तु मनसा संस्काराग्राहिणा चक्षुरादिना चात्माग्राहिणा तादृशप्रत्यासत्त्या ग्रहणानुपपत्तेः। नियमेन तदिन्द्रियाग्राह्याश्रयप्रतियोगिकेतरस्य ग्रहणे स्वग्राह्यसम्बन्धविशेषणतायाः प्रत्यासत्तित्वनियमात्, अन्यथाप्यपरमाण्वादौ पृथिवीत्वादेरन्यत्र ग्राह्यतया निरस्तस्वरूपायोग्यत्वस्याभावो दृगादिभिर्गृह्येत। नहीन्द्रियविहारदेशेषु निष्प्रसारणकत्वनियमो युक्ताभ्युपगमः, शब्दाभावप्रत्यक्षत्ववादिनये श्रोत्रेन्द्रियविशेषणता सप्तमः सन्निकर्षो, न तु तत्र सम्बद्धविशेषणतेत्यतोऽपि न व्यभिचारः। नचात्मसंयुक्तमनः प्रतिपूर्वानुभूतार्थात्मप्रत्यासत्तिरेव संस्कार इति तदतीन्द्रियत्वं न दोषाय, प्रत्यासत्तेरतीन्द्रियाया इन्द्रियार्थसन्निकर्षस्योपगमादिति स्वीकृते निस्तारः, तथा सति स इत्यंशे चक्षुरादेः प्रत्यासत्त्यभावात्प्रत्यभिज्ञाया अचाक्षुषत्वापातात्। अयमित्यंशो दृगादिना, तदंशस्तु मनसा गृह्यतां, तदेतद्भेदस्तु केनेत्युक्तमप्यावर्त्तत इति। एतेन संस्कारः सहकारिमात्रमिन्द्रियस्यातिप्रसङ्गनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावयितुं शक्यं नाप्यनुभवांश इत्युक्त एव दोषः किञ्च यदा प्रत्यभिज्ञानं स इत्यंशे स्मृतिरयमित्यंशे चानुभव इत्येकं ज्ञानमभ्युपेयते तदा धर्मिणमादायापि स्मृत्यनुभवसङ्करोदुर्वारः। तथा हि संस्कारेण तत्तामात्रं वोपनीयते तत्ताविशिष्टो वा धर्मी। आद्ये स इति प्रत्यभिज्ञायाः शरीरं न स्यात्, तत्तायाः केवलायाः संस्कारेणोपनीतत्वात्। नापि द्वितीयः, तथा सत्ययमित्यनुभवांशे धर्मिप्रकाशो वक्तव्य एव अन्यथा इदन्तामात्रप्रकाशोऽयमिति तच्छरीरं न स्यात्। एवञ्च संस्कारस्य चेन्द्रियस्य च धर्मिप्रतीतिहेतोरुभयस्योपनिपाते किं विशेष्यांशे भिन्नाभ्यां ज्ञानाभ्यामुत्पत्तव्यम् उत कारणद्वयसम्भेदादभेदभाजा ज्ञानेन। प्रथमे प्रत्यभिज्ञानस्यैकज्ञानव्यक्तिताभ्युपगमव्याघातः भेदपक्षोक्तदूषणापातश्च। द्वितीये धर्म्यंशे प्रत्यभिज्ञायाः स्मृतित्वमप्यनुभवत्वमपीत्यनुभूति स्मरणसङ्कर इति विषयव्यवस्थयापि नियमोभग्नः। अथोच्यते माभूद्विषयोपाधिभेदाद्यवस्थानमुपाध्यन्तरात्तु भविष्यति, तद्यथा संस्कारजत्वमादाय

CC-0. In Public Domain. Digitization by eGangotri

स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमादाय चानुभवत्वव्यवस्थानमिति विरोधपरिहारोऽस्तु। न, प्रमात्वसामान्यानङ्गीकारे प्रमारूपताया विषयव्यवस्थित्यैवोपगमे नोपाध्यन्तरोपन्यासेऽपि स्मृतित्वानुभूतित्वयोरेकस्मिन्नेव धर्म्मिण्यर्थे निवेशात्प्रमात्वाप्रमात्वयोरेकविषयतैव। किञ्च ज्ञानविकल्पानामध्यात्मभावाभावसम्वेदनात् स्मृतित्वानुभूतित्वयोर्द्वयोरपि प्रत्यभिज्ञायां स्वतः प्रतिभानेन विषयनिरूपणव्यवस्थित्यनङ्गीकारे स्मृतित्वादेरिदन्तांशमपि स्मृत्यवगमप्रसङ्गात्। यदि च संस्कारजत्वमेव स्मृतित्वं, तदा तस्यैव विरोधेऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिरुपन्यस्यत इति नान्यस्य चेतसि निर्विशते। अथान्यत्स्मृतित्वन्नाम, तदाप्यनुपपत्तिः, तथा हि संस्कारजत्वं संस्कारादनन्तरं नियमेन भावो, नियतत्वञ्च नानाव्यक्तिगतमेकं रूपं संग्राहकमक्रोडीकृत्य न सम्भवतीति स्मृतित्वेनैव संस्कारजत्वं वक्तव्यं, तथा च संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिः, स्मृतित्वव्यवस्थितौ च संस्कारजत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यन्योन्याश्रयः, तस्मात् स्मृत्यनुसङ्करो दुर्वार एव। अपि च स्मृत्यनुभवयोर्ये कारणसामग्र्यौ ते प्रत्यभिज्ञायां मन्तव्ये न वा। नचेत् कथं-संशतोपि स्मृतित्वमनुभवत्वञ्च प्रत्यभिज्ञानस्य, एवमेव तथात्वेति प्रसङ्गात्। स्मृत्यनुभूत्योः स एव सङ्करः। प्रथमे पृथगेव कार्य्योत्पत्तिप्रसङ्गः, प्रत्येकं स्वस्वकार्य्ये समर्थत्वात्, सामग्रीभेदस्य कार्य्यभेदहेतुत्वेनावधारितत्वात्। अथ यत्र ते पृथक्जायेते तत्र पृथगेव कार्य्यं, प्रत्यभिज्ञायान्तु तयोर्युगपज्जातत्वेन सम्भूयजननात्करम्बितकार्य्योत्पत्तिः। यद्यपि पटघटादिसामग्र्योर्नैवं दृश्यते, तथापि तद्विलक्षणस्वभावत्वादनयोरीदृशत्वमुपपद्यते, न हि एकस्य यादृक्पदार्थस्य स्वभावस्तादृगन्यस्यापि सर्व्वस्य भवति, जगद्वैचित्र्यभङ्गप्रसङ्गादिति। नैतदस्ति यत्र हि मिलितत्वं तयोस्तत्र किं परस्परसहकारित्वमनयोरिष्टव्यं न वा। न चेत् परस्परमेलकलक्षणोविशेषोऽनुपयोगी, कार्य्यजननं प्रति मिथः सहकारिभावविरहेणाप्रयोजकत्वात्, ततश्चाविशेषात् पृथगेव कार्य्यं प्रसज्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ परस्परसहकारित्वं तयोरिष्यते, तदानुभवांशेऽपि संस्कारस्य व्यापारः स्मरणांशेष्वक्षस्येति नियामकत्वाभिमतयोरुभयांशे साधारण्यात् स्मृत्यंशेष्वनुभूतिरनुभूत्यंशेपि स्मरणमिति वज्रलेपायितं प्रत्यभिज्ञायामनुभूतिसङ्करेणेति नाप्यनुभव एवेति पक्षः, तथा सति तत्तावच्छिन्नस्याभेदाश्रयतायां न संस्कारोनेन्द्रियसन्निकर्षस्येति तदविषयत्वापातः। नच संस्कारद्वारा प्रत्यासत्त्या सम्बद्धविशेषणतया तद्ग्रहः, क्वचित् सोऽयं न वेति तर्हि संशयो न स्यात्, दोषवशात्तत्र तत्प्रकाशो न सम्बद्धविशेषणत्वादिति चेन्न, विनापि संस्कारं दोषवशात्तदापत्तेः। वस्तुप्रकाशिनि च दोषवाचोयुक्त्यनिवृत्तेः। क्वापि तस्यावस्तुप्रकाशित्वाद्दोषश्चेत्, कथमक्षादेरपि तन्न स्यात्, विशिष्टत्वेन तथात्वस्य प्रकृतेप्यपरिहारात्, न हि विनैव कुतोपि विशेषादस्यावस्तुप्रकाशिता। सत्यर्थे दोषादवस्तु न एव प्रकाशे संशयात्प्रत्यभिज्ञावत्प्रष्टृत्वादेरसम्भवापत्तेः। वस्तुविषयत्वेपि दोषादनिश्चयतेति चेन्न, वस्तुनस्तस्यासङ्कीर्णत्वात्तस्य प्रकाशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव संशयैककोटौ प्रकाशितमिति कुतः तद-
निश्चयता, निश्चयार्थस्य च संशयकोटावखण्डने
संशयेन तदभावाधिकग्राहित्वेपि, निश्चयत्व-
स्याप्रत्यक्षत्वादेवाभावनिश्चयः कोऽप्यन्तरं केवल-
मधिकं स्यात्, जातिः संशयत्वं तत्प्रयोजकश्च
दोष इति चेन्न, इदं तद्वा न वेति संशयकोट्यर्थ-
निर्देशसमन्वयेन वा-शब्द प्रतीतिव्यवहारयो-
रभावापत्तेः, प्रतीत्या सह वाकारार्थे सम्बन्धे
प्रत्येमि न वेति पदापत्तेः, वाकारार्थस्य प्रतीति
गतत्वेपि निश्चयत्वेतरस्थाणुमानय पुरुषं वेति
स्थाणुपुरुषगतप्राश्निकव्यवहारानापत्तेः। तस्मा-
द्वाकारार्थस्य ज्ञानधर्मत्वे साक्षात्कारित्वादि-
वद्विषयानन्वयापत्तिरेवेति। न च प्रत्यासत्तौ
सत्यामपि प्रत्यासत्त्यपुरस्कारान्मनसा न ग्र-
हणं, तत्र दोषवशादित्यस्तु, दोषे सत्यपि वस्तुनः
संस्कारेण संस्कारस्यात्मना यस्य मनसा तस्य
च बाह्येन्द्रियेण प्रत्यासत्त्यपेक्षिण एव तदर्थ-
प्रकाशादिनियमोपपत्तेः कः प्रत्यासत्त्यपुर-
स्कारस्त्वन्मते स्यात्, यदि तु संस्कारप्रत्यासत्ति-
मनपेक्ष्य तथा सन्दिह्यते तदा अननुभूय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्मृत्य वा तया सन्दिह्येत। वस्तुतस्तु मनसा संस्काराग्राहिणा चक्षुरादिना चात्माग्राहिणा तादृशप्रत्यासत्त्या ग्रहणानुपपत्तेः। नियमेन तदिन्द्रियाग्राह्याश्रयप्रतियोगिकेतरस्य ग्रहणे स्वग्राह्यसम्बन्धविशेषणतायाः प्रत्यासत्तित्वनियमात्, अन्यथा परमाण्वादौ पृथिवीत्वादेरन्यत्र ग्राह्यतया निरस्तस्वरूपायोग्यत्वस्याभावो दृगादिभिर्गृह्येत। नहीन्द्रियविहारदेशेषु निष्प्रसारणकत्वनियमो युक्ताभ्युपगमः, शब्दाभावप्रत्यक्षत्ववादिनये श्रोत्रेन्द्रियविशेषणता सप्तमः सन्निकर्षो, न तु तत्र सम्बद्धविशेषणतेत्यतोऽपि न व्यभिचारः। नचात्मसंयुक्तमनः प्रतिपूर्व्वानुभूतार्थात्मप्रत्यासत्तिरेव संस्कार इति तदतीन्द्रियत्वं न दोषाय, प्रत्यासत्तेरतीन्द्रियाया इन्द्रियार्थसन्निकर्षस्योपगमादिति स्वीकृते निस्तारः, तथा सति स इत्यंशे चक्षुरादेः प्रत्यासत्त्यभावात्प्रत्यभिज्ञाया अचाक्षुषत्वापातात्। अयमित्यंशो दृगादिना, तदंशस्तु मनसा गृह्यतां, तदेतदभेदस्तु केनेत्युक्तमप्यावर्त्तत इति। एतेन संस्कारः सहकारिमात्रमिन्द्रियस्यातिप्रसङ्गनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारकं प्रत्यभिज्ञायां तदर्थम् इन्द्रियेणासंनि-
कृष्ट एवोल्लिख्यते, विभ्रमार्थवत्सन्निकर्षर-
हिता चेन्द्रियस्य सन्निकर्षसहकार्य्यवश्यम्भा-
भावं, तस्येदमंशसन्निकर्षादेव स्यात्। ननु स-
ग्राह्यसन्निकर्षसहकारितेत्यपि निरस्तं, सो-
न वेति संशयाभावापातेनैवेति। तदद्राक्षमि-
त्यादिस्मृतिरपि चैवमनुभव एव स्यात्। मन-
आत्मसंयोगसहकृतादात्मार्थसन्निकर्षात्
स्काराज्जायमानाया स्मृत्या इन्द्रियार्थसन्निक-
जत्वादेव मनसा आत्मसंयोगसमवायेन प्रत्यक्षी-
क्रियमाणे ज्ञानादिभिः स्मर्य्यमाणस्यार्थस्यावि-
शेषादिति। एतेन तत्तावच्छिन्नप्रतियोगिका-
न्योन्याभावविरहः स्वरूपाभेदोवायं भातीत्यपि
निरस्तम्। अन्योन्याभावव्यतिरेकोऽन्योन्यमे-
तत्तेदन्तोपाध्यवच्छिन्नयोः स्यात्, न च तन्नि-
लितमेकेन सुग्रहम्। एवं स्वरूपाभेदोऽपि
तयोर्धर्म्मैक्यं तदनवगाहिना दुरवगममेव। सं-
स्कारोपनीते च विषये यदि ज्ञानमनुभवः
स्यात्, स्मृतिरपि कुतोनानुभूतिः। अथ न
संस्काराधीनत्वमात्रेणस्मृतित्वं, किन्त्वनुभव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणासंसृष्टसंस्कारजत्वेन, ततश्चाधिकार्थेन्द्र-
सन्निकर्षापेक्षं प्रत्यभिज्ञानमनुभव एव भवति
न तु स्मृतिरिति चेन्न, संस्कारासंसृष्टानुभव-
कारणजत्वेनानुभवत्वम्भवति, प्रत्यभिज्ञानन्तु
संस्कारसहितानुभवकारणजं स्मृतिरेवेति वैप-
रीत्यं किन्न स्यात्। अन्यत्र न स्मृतिरनुभवका-
रणसंसृष्टसंस्कारजन्येति तु नान्यत्रानुभवेऽपि
संस्कारसंसृष्टार्थेन्द्रियसंयोगजन्येति साध्यादेव
बाधकम्। तदेवं विनिगमनायां प्रमाणाभावात्
स्वयं कल्पितव्यवस्थामवैपरीत्येनापि कल्पनास-
म्भवात्प्रत्यभिज्ञानमुभयकारणसंप्लवात् स्मृति-
श्चानुभवश्चेति मन्तव्यं, तथा च स्मृतिव्यावृत्तमनु-
भवत्वं जातिरस्तीति दुष्प्रत्याशा निरवकाशा।
न च विषयांशे स्मृतित्वानुभवत्वयोर्व्यवस्था कर्त्तुं
शक्यते, तन्निरासस्य निवेदितत्वात्। ततश्च
तदेव ज्ञानं तस्मिन्नेवांशे स्मृतिश्चानुभूतिश्चेत्या-
पतितेऽपि यदि न विरोधबुद्धिर्भवतस्तदा तद-
धीने तत्रैवार्थे प्रमात्वापाते सास्तु॥ एतेन वि-
रोधाद्यत्रानुभवत्वस्वीकारे बाधबलेन स्मृति-
व्यतिरिक्तमनुभवत्वं नामानुगतं साक्षात्कार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानानुमित्यादिसाधारणमनुभवबलादेव व्य-
स्थापनीयमिति प्रतीति कलहोपि निरस्तः।
ननु चानुभव एव धारणमिह, प्रत्यभिज्ञा-
ह्यनुभवत्वमेवानुभूयते न तु स्मृतित्वं, ते-
संस्कारजत्वेपीन्द्रियार्थ सन्निकर्षाधिकापेक्षय-
ऽनुभवत्वमेवेति विनिगमनायामपीदमेव प्रमा-
णम्, अन्यथा प्रत्यभिज्ञानेऽनुभवप्रत्ययो न स्या-
दिति प्रतीतिकलहेन प्रत्यवस्थेयमिति न, इद-
न्तातत्तावभासयोरनुभवस्मरणभागयोः सत्त्वे-
नानुभवस्यैकपक्षे असाधारणीकृत्य प्रमाणयितु-
मिहाशक्यत्वात्। एतेन स्मृत्यनुभवसङ्करप्रसङ्गि-
ङ्गेनानुभूतिपदव्यवच्छेद्यं परिस्मृतं मन्तव्यं। न चा-
वाच्यं प्रत्यभिज्ञानं व्यवच्छेद्यं माभूत्, स्मृत्यन्तरा-
रन्तु भविष्यतीति, तस्याप्यनुभूतित्वेन भवताप्य-
वश्यस्वीकर्त्तव्यत्वात्। तथा हि घटस्तदासीदित्यु-
त्यादिस्मृतौ पूर्वकालविशिष्टो घटः स्फुरति, न किन्तु
चासौ पूर्वमनुभूता भूततया संस्कारेणोपनीयत इति
प्रत्युत पूर्वं वर्त्तमानतया एवानुभूत्या ग्रहणं
तस्मादिदानीं पूर्वमननुभूताधीसामग्रीसम्भेदात्
सोऽयमिति प्रत्यभिज्ञानवत्तद्विशिष्टतावगमोऽय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽसौ स्मृत्यनुभवात्मक एवाभ्युपगन्तव्यः। एते-
नानुभवसामग्रीसहितः संस्कारोऽनुभवकारण-
मिति पक्षे पूर्व्वं शङ्किते इदमपि दूषणं द्रष्टव्यं,
तथा सति स्मृत्युच्छेदापत्तेः। नच तदस्ति स्मरणं,
यत्र सा न प्रकाशते, ततश्च व्यवच्छेद्यानुपपत्तिः॥
यदपि कैश्चिदुच्यते दोषवशात्प्रमुष्टतत्तांश-
स्मरणम्भवतीति, तदपि नोपपन्नं, तदीयस्मर-
णत्वे प्रमाणाभावात्। नचानुभवसामग्र्यभा-
वात्पारिशेष्येण स्मृतित्वम्, इन्द्रियार्थसन्निकर्ष-
त्वाद्युत्तरा अनुभवसामग्र्यभावात्पारिशेष्येणानु-
मित्यादेरपि स्मृतित्वापत्तेः। सर्व्वानुभवसामग्र्य-
भावादिति चेत्, कथं पुनस्तत्तांशशून्यरजतादि-
ज्ञानहेतुसामग्री नानुभवहेतुसामग्रीत्यवधारितं,
पञ्चप्रमाणीकरणसामग्र्यसम्भवादिति चेन्न
चतुष्प्रमाणीजनकसामग्र्यसम्भवात्पञ्चमी प्रमा
न किन्न पारिशेष्यात्स्मरणं व्यवस्थापि, कुत्र वा
प्रतिपन्नं पञ्चप्रमाणीकरणसामग्र्यभावे जाय-
मानं ज्ञानं स्मृति र्भवतीति, घटस्तत्रासीदि-
त्यादिज्ञानानामनुभवत्वोपन्यासस्य कृतत्वात्।
अथ मन्यसे प्रत्यक्षादिकरणसामग्र्यनुपपत्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजतमात्रस्य च पूर्व्वमनुभूतत्वेन तद्विषय
स्कारसम्भवात्संस्कारस्यैव हेतुताङ्गीक्रियते न
न्यत्कारणत्वेन कल्प्यते, इन्द्रियार्थसन्निकर्ष
सम्भवे जायमानस्य त्वनुमानादेरननुभूत
षयत्वेन तस्मान्नोत्पत्तिसम्भव इति तत्कार
लिङ्गादिकमङ्गीक्रियते, अतः प्रमाणान्तरास
कृतसंस्कारजत्वं तद्यङ्ग्रा वा जातिविशेष
स्मृतित्वमिति। नैवम्। तत्र कारणत्वं किमि
नात्मस्यैव, येन संस्कारजत्वं व्यवस्थाप्यते, ते
र्थेन सह तदात्मस्य सन्निकर्षाभावादसन्नि
ष्टस्य च तस्य ज्ञानजनकत्वेऽतिप्रसङ्गात् ने
यजत्वं तस्येति चेन्न संस्कारस्यापि केवल
तज्जननेऽतिप्रसङ्गतादवस्थ्यात्। सहचरि
धर्म्मदर्शनादिना सहकारिणा युक्तस्य संस्
रस्य तज्जननेनास्त्यतिप्रसङ्ग इति चेन्न ते
सहकारिणा सहितस्येन्द्रियस्यापि तज्जन
नातिप्रसङ्गाभावात्। अननुभूतेऽपि तर्हि प्रस
इति चेन्न, तथापि तद्धर्म्मतानधिगततद्धर्म्मवत्त्या
गते तस्य संस्कारबलः स्मृत्यापत्त्या समाधि
ध्यात्। लुप्ततत्साहचर्य्यदर्शनजसंस्कारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा सति तत्सहचरितरजताद्युद्बुनप्रतीतिप्रसङ्ग इति चेन्न, तवापि मते तादृशस्य रजतादिसंस्कारवतो रजतादिस्मृतिप्रसङ्गसाम्यात्, तस्माद्यतस्ते कालव्यवधानादितः संस्कारलोपतदनुपनिपातस्यापि हेतुत्वोपगमे, नातिप्रसङ्गात् तथा कालादिव्यवधानाद्यभावसदृशदर्शनसहकृतस्य चक्षुषो युक्तं तदेवं [तत्सदृक्प्रत्यभिज्ञानं यत्ते संस्कारबोधकं। सहकारितदेवास्तामचख्यातिप्रसक्तिनुत्] तत्सदृशप्रत्यभिज्ञानन्तु स्मर्त्तव्य स्मरणपूर्वकमित्येतदपि सममेव। तथाप्यन्यत्रार्थसन्निकर्षमन्तरेणेन्द्रियस्य ज्ञानकारणत्वं नोपलब्धचरमिति चेन्न, विशिष्टरूपेण भ्रमविषये मया तदुपगमात् सहकारिभूतदोषशक्तेर्वा प्रत्यासत्तित्वेनेष्टत्वात्। किञ्च संस्कारस्यापि प्रमाणान्तरासहकृतस्य नान्यत्र ज्ञानजनकत्वं दृष्टमिति तदपि कथं कल्प्यते, प्रत्यभिज्ञान एव संस्कारस्य सदृशदर्शनादिसहकारित्वं कल्पितं नत्विन्द्रियस्येति चेन्न, प्रत्यभिज्ञाने संस्कारेन्द्रिययोर्द्वयोरपि कारणत्वात्। सदृशदर्शनादिसहकृतत्वदर्शनादि अविशेषात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र सदृशदर्शनसहकारित्वे संस्कारसहकारित्वस्यापि प्रसङ्गः प्रत्यभिज्ञानवदिति चेत्तथा सति तद्वदेव तत्तोल्लेखापत्तेः। सदृशदर्शनादिसहकृतत्वेन च तत्तांशप्रसञ्जने संस्कारजत्वस्योपाधित्वम्। नच सदृशदर्शनसहकारितैव तत्ता प्रयोजिकात्र त्यज्यतां न संस्कार इति युक्तं, सदृशदर्शनं परित्यज्य संस्कारे सत्यपि तथाबोधात्। तथापि सदर्थे प्राप्यकारित्वमिन्द्रियस्य दृष्टं न हातुं शक्यमिति चेन्न, उक्तमव। यथेन्द्रियस्य प्राप्तिसहकृतस्य ज्ञापकत्वं दृष्टं तथैव संस्कारस्यापि प्रमाणान्तरसहकृतस्य ज्ञापकत्वमुपलब्धमिति तदपि हातुं न युक्तमिति संस्कारस्यापि चेन्द्रियप्रत्यासत्तित्वस्वीकारेण तद्विरहासिद्धेः। तत्तांशमोषकल्पनञ्च स्वतन्त्रसंस्कारजत्वपक्ष एव यावदधिकं युक्तश्चायं तत्तांशमोष इति विचारमधिकरोति, पूर्वं वर्त्तमानादिकालविशेषविशिष्टस्य रजतादेरेकस्मिन्ननुभवे प्रकाशिततया तज्जन्येन संस्कारेणापि तथैवोपनेतुमुचितत्वात्। प्रत्यभिज्ञायां तथैव फलदर्शनात् दोषवशात्तत्तांशमोष इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न, विषयसम्बन्धस्य स्वभावत्वेन संस्कारे तद्-लोपात् । दोषस्मृतौ तथेति चेत्, कः पुनरसौ दोषः, यस्माद्भ्रान्त्युत्पत्तिः परेषामिति चेत्तर्हि तद्रजताविशिष्टमिदं रजतमित्यत्र सैव रजत-व्यक्तिरियमित्यत्र वा पुनस्तदेव रजतमुपस्थित-मितीह वा सामान्यतएव रजतस्य तदापि परामृष्टस्य भ्रान्तौ तत्तांशमोषः स्यात्, दोषस्य विद्यमानत्वात्, अन्यथा इदं रजतमित्यंशेपि तस्मिन् ज्ञाने तत्तांशमोषो न स्यादित्यास्ता-मियं प्रसक्तानुप्रसक्तिः । नच प्रत्यभिज्ञानं स्मर-णानुभवाभ्यामन्यएव प्रकार इति वाच्यम्, अननुभवत्वेनाप्रमात्वापातात् । नचैवमस्त्वित्यपि वाच्यम्, अक्षणिकवादिना स्थिरसिद्धौ प्रमा-त्वेनोपन्यस्तत्वात् । ईदृशप्रसिद्धलक्ष्यत्यागेन च लक्षणोपादनेऽनियमः प्रसज्येतेति, तस्मात्स्मा-तिवाचिनोऽनुभवपदस्य स्मृतितोव्यवच्छेदार्थ-मुपादानमिति सर्व्वथानुपपन्नमिति । नापि स्मृत्यन्यत्वमनुभवार्थः नापि स्मृतिलक्षणरहित-त्वम्, उक्तक्रमेण स्मृत्यनुभूतिसङ्करस्य दर्शित-त्वेन व्यवच्छेदकत्वानुपपत्तेः । इतोपि न स्मृत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यत्वमनुभवार्थः, तथा हि स्मृत्यन्यत्वं यत्किञ्चि
त्स्मरणान्यता वा, सर्व्वस्मृतिव्यक्त्यन्यता
स्मृतित्वरहितत्वं वाभिप्रेतं, प्रथमे स्मृत्यन्तर
व्यतिरेकात् स्मृत्यन्तरमप्यनुभूतिः स्यात्। न
यतो व्यतिरिक्ता स्मरणव्यक्त्यन्तरादेका स्मृ
व्यक्ति स्तत् स्मरणमेव न भवति येन तदन्य
न स्मृत्यन्यत्वं स्यात्। नापि द्वितीयः, सदीया
स्मृतिव्यक्तिभ्यो हि भवता कथंकारं व्यतिरि
क्तत्वमवधारणीयं प्रमायाः, तासां सर्व्वासां भ
वता प्रत्येतुमशक्यत्वात्, तथा हि न तावत्पर
कीयज्ञानेऽपरस्यास्मादृशोऽध्यक्षसम्भवः, नाप्यनु
मानार्थापत्ती लिङ्गानुपपद्यमानयोः सर्व्वा
र्व्वाग्दृशा प्रत्येतुमशक्यत्वात्, नापि शब्दः, सर्व्व
तस्यासम्भवात्, उपमानाद्यसम्भवोऽपि स्फुट एव
ततः कथं सर्व्वाभ्यः स्मृतिव्यक्तिभ्यो व्यतिरेको
निरूप्यः प्रमाया इत्यनवबोधादसिद्धिर्लक्षणस्य
न च वाच्यं स्मृतित्वेन सर्व्वाः स्मृतिव्यक्तयः सर्व्व
कालसर्व्वपुरुषसम्बन्धिन्यः स्वात्मीयास्मृतिव्यक्ति
प्रत्यक्षतया प्रत्यक्षादेवावगम्यन्ते, सामान्यलक्ष
णयेन्द्रियप्रत्यासत्त्या व्याप्तिग्रहणकाल इव व्याप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापकव्यक्तय इति, दृष्टान्तदार्ष्टान्तिकयोर्दोष-
ग्रस्तत्वात्। तथा सति ह्येकं प्रमेयं प्रत्यक्षयतः
प्रमेयत्वसामान्य प्रत्यासत्त्या विश्वमेव प्रत्यक्षं
स्यात्। एवमभ्युपगच्छतश्च श्रद्दधीमहि सार्वज्ञ-
मिदं यदि जानासि किमस्माच्चेतसि विपरि-
वर्त्तत इति। नापि तृतीयः, स्मृतित्वरहितत्वं हि
स्मृतित्वाभाववत्त्वं वा स्यात् स्मृतित्व प्रतियो-
गिकमाश्रयस्वरूपं वा, तज्ज्ञानं वा, न ताव-
दाद्यः, तथा हि स्मृतित्वान्योन्याभावोऽपि स्मृति-
त्वाभावो भवत्येव, तद्वत्त्वञ्च स्मृतिष्वप्यस्ति।
न हि स्मृतित्वमेव स्मृतिः ततश्च स्मृतेरपि
प्रमात्वापातः, तद्व्यवच्छेदाद्विशेषणवैयर्थ्यञ्च
विना विशेष्यमिच्छादावतिप्रसङ्गात्। स्मृतित्वस्य
संसर्गाभावास्तत्र विवक्षित इति चेन्न, तथा हि,
स्मृतित्वस्य संसर्गाभाव इति किमुच्यते, किं
स्मृतित्वविशिष्टस्य संसर्गस्याभावः, उत संसर्ग-
विशिष्टस्य स्मृतित्वस्य, अथान्यदेव यत्किञ्चि-
दनया वाचोयुक्त्या विवक्षितम्। आद्ये स्मृतित्व-
संसर्गान्योन्याभावः स्मृतावस्तीति स एव प्र-
सङ्गः, न हि स्मृतित्वसंसर्गः स्मृतिः। अतएव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न द्वितीयोपि न हि संसर्गविशिष्टं यत्स्मृतित्वं तदेव स्मृतिव्यक्तिः तत्र संसर्गविशिष्टस्मृतित्वेन सह स्मृतिव्यक्तेरन्योन्याभावमादायोक्तदोषानिवृत्तिः, एवं तत्र तत्रापि संसर्गविशेषणप्रक्षेपे दोषानिवृत्तिरेव, अनवस्थायां वा पर्य्यवसानं विशेषणप्रक्षेपपरम्परायाः। नच वाच्यं स्मृतित्वसंसर्गस्य न संसर्गान्तरेण सम्बन्धित्वं किन्तु स्वभावतएव तत् कुतः परम्परागवेषणं कार्य्यमिति। स्मृतित्वसंसर्गस्यान्योन्याभावमादाय कृतस्य प्रसङ्गस्य परिहर्त्तुं तदानीं सुतरामशक्यत्वात् संसर्गान्तरविशेषणवचनस्याधिकार्थापर्य्यवसायित्वात्। किञ्च तदुभयस्वरूपातिरेकं तत्संसर्गस्यामन्यमानेन स्मृतित्वसंसर्गोधर्म्मिस्वरूपं चेत्येतयोः संसर्गात्मत्वे व्यवस्थाप्यमानेनुभूतौ कथं तादृशस्य संसर्गस्य निषेधः किमनुभूतेः स्वरूपं नास्ति उत स्मृतित्वसंसर्गस्य ततः कस्य निषेधः। अर्थान्तरभूतस्य च संसर्गस्य निषेधे स्मृतावपि प्रसङ्गस्तदवस्थः स्मृतौ तस्यार्थान्तरभूतस्य भवताऽनभ्युपगमात् स्वरूपमेव तयोः सम्बन्ध इति तत्र भवतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽभ्युपगमः । अथोच्यते अनुभूतिस्मृतित्वसंसर्गयोः स्वरूपसम्बन्धेऽपि न परस्परसम्बद्धबुद्धिजनकत्वं तयोस्तादृशत्वञ्च यत्र तयोस्तत्र सम्बन्धात्मकत्वं स्वरूपयोरुच्यत इति । मैवम् । विशेषोपसंग्रहासिद्धौ तस्याप्यनुपपत्तेः, उपसंग्राहकान्तरोक्तौ तत्सम्बन्धेनापि प्रसङ्गेनापरापरोपसंग्राहकगवेषणायामनवस्थापातात् तावतापि चानुभूतिस्वरूपे कस्य निषेधोवर्णितः स्यात् । स्मृतित्वसंसर्गोनुभूतौ सम्बद्ध इत्येवं रूपबुद्धिजनकत्वस्येति चेन्न भ्रान्त्यात्मिकाया ईदृशबुद्धेर्जनकत्वस्य वारयितुमशक्यत्वात् । यथार्थाया इति चेत् ईदृशबुद्धिर्यथार्थाया यदि सत्त्वमभ्युपैषि तदानुभूतौ स्मृतित्वप्रसङ्गः, अथ नाभ्युपैषि किं प्रति तस्य जनकत्वाभावोनिरूप्यः । अथात्यन्तासतीमेव तादृशबुद्धिं प्रति जनकत्वाभावधारणमनुभूतेरभ्युपैषि, तदा स्मृतावपि प्रसङ्गः यावत्यस्तद्बुद्धयस्तत्र जायन्ते तदधिकां तादृशबुद्धिमत्यन्तासतीं प्रत्यजनकत्वस्य स्मृतावपि सम्भवात् । सर्वामेव तादृशबुद्धिं प्रत्यजनकत्वमनुभूतेर्नत्वेवं स्मृतेरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चेन्न सर्व्वं तद्व्यक्तिप्रमित्यसम्भवात्। किञ्च सर्व्वा-
मिति कोऽर्थः किमसतीं सर्व्वाम् उत सतीम्
अथ सतीमसतीञ्चेत्युभयीमपि प्रत्यजनकत्वम्
आद्ये द्वितीये च स्मृतावपि तदजनकत्वमस्त्येव
न हि स्मृतित्वसंसर्गस्मृतीसम्बद्धे इति या-
वत्यः स्मृतिव्यक्तिषु बुद्धयो भवन्ति ताः प्रति
प्रत्येकं स्मृतिव्यक्तिषु जनकत्वमिति काश्चित्
सत्यां सतीं प्रति च तदजनकत्वं प्रागेव दूषि-
तम्। तृतीये नानुभूतावपि तदजनकत्वं सत्या-
सत्यतादृशबुद्धेर्भावेनाभावेन च सतीमसतीं
प्रत्यजनकत्वस्यासम्भवादिति। स्यादेतत्स्मृति-
त्वस्यान्योन्याभावमादाय यातिप्रसक्तिर्दर्शिता
सा नोपपद्यते भेदाभेदवादिमते स्मृतित्वभे-
दस्य स्मृत्या सहाभ्युपगमात् ययोर्भेदाभेद-
भयोरन्योन्याभावानभ्युपगमात्। मैवम्। कथं
ह्यवधार्य्यं स्मृतित्वस्य भेदाभेदः स्मृत्या नानु-
भूत्येति। अनुभूत्या सह तद्विशिष्टप्रमाया अ-
भावादिति चेन्न किं सत्याः किमसत्या इत्या-
द्युक्तविकल्पदोषात्। प्रागभावप्रतियोगिन्या
इति चेन्न अनुभूतौ तादृश्याः स्वीकारेणानुभूते

CC-0. In Public Domain. Digitization by eGangotri

स्तथात्वापातात् । स्मृतिस्मृतित्वयोरन्योन्याभावाभावश्चान्योन्यात्मानुभूतावपि तुल्यः, न हि स्मृतित्वान्योन्याभावोऽनुभूतिरित्युक्तमावर्त्तते । अथ माभूद्भेदाभेदमादाय परिहारः, तथापीदं तत्र भवति इह तन्नास्तीति प्रतीतिसाक्षिक एवान्योन्यसंसर्गाभावयोर्भेद इति चेन्न, प्रतियोगिरूपोपाध्यवैचित्र्यादभावे जात्यादिभेदाभ्युपगमाच्च तयोर्भेदबुद्धिरेव प्रामाण्यमश्नुवाना कूटसाक्षिणीति तदनादरणात् । न च स्वप्रतियोगिसमानकालसमानाधिकरणोऽभाव स्तदन्योन्याभाववांश्च तदभावः संसर्गाभावयथासम्भवमात्माश्रयाद्यननुभवस्वभेदाननुगम तत्तद्वगमानभ्युपगमानामनुत्तरणीयत्वप्रसङ्गात् । ननु संसर्गप्रतियोगिको निषेधः संसर्गाभावः, तादात्म्यप्रतियोगिकश्च तादात्म्याभाव, इत्युक्त एव, न भिन्नता, तयोर्हि संसर्गतादात्म्यस्य निषेधः संसर्गनिषेध एव न भवति, तादात्म्यप्रतियोगिकत्वादिति । नैवम् । द्रव्यगुणकर्मणां समवायिकारणेषु हि तेषां प्रध्वंसा नैवं संसर्गाभावाः स्युः । संसर्गप्रतियोगित्वे तु संसर्गस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समवायस्वरूपतया समवायानित्यत्वप्रसङ्गात्किन्तर्हि संसर्गान्योन्याभावौ द्वावपि न घटादिप्रतियोगिकाविति घटादेः कालादिवन्निरवधित्वापातः। संसर्गतादात्म्ययोश्चाविशेषितयोर्निषेधे सामान्यत एव तयोरुच्छेदः स्यात्, एवं यद्यदेव प्रतियोगि वाच्यं तत्तत्स्वरूपत एव न स्यात् तस्यापि संसर्गं प्रति धावने च तदन्ततं संसर्गानवस्थाशेषोच्छेदात्पूर्व्वपूर्वोच्छेदो वा स्यात् न प्रतियोग्यनुयोगिनोस्तथात्वं विरोधः, किन्तु सहभावाभावोऽतस्तन्मात्रं न स्यात्। ननु तन्मात्रमेव न स्यादिति चेन्न, अनुयोगिनि प्रतियोग्यासत्तेः। तथा प्रमाभावात् कथं तदास्तामिति चेन्न, तथाप्रमाभावमूलकस्य विरोधस्य सहानवस्थानस्य नियमनभङ्गात्, प्रतियोग्यनुयोगिभावादन्यः कस्तयोर्व्विरोधः स्यात्। तथा न प्रतीयमानत्वमेव स इति चेन्न, अतिप्रसङ्गात्, नियमेनेति चेन्न, व्यक्त्यन्तरविरोधापत्तेः, तथा न प्रमातुमनौपाधिकी योग्यतेति चेत्, सैव मेयगतानुयोगिप्रतियोगित्वादन्या का समर्थिता स्यात्, स्वरूपमेवेति चेन्न, मिथः सम्बं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाभ्युपगन्त्वापि तयोः स्वरूपोपगमात् तथाभूतं स्वरूपमिति चेन्न,तस्यैव निर्वाच्यतापत्तेः। कस्य गोत्वाश्वत्वाभ्यां भावाभावयोरेवविरोधे विशेषः स्यात् सत्याञ्च तयोः साहित्यप्रमायां प्रकारभेदेन व्यवस्थापना किमिति कार्य्या प्रमयैवा प्रमानुपगमादिति। अथ घटादिविशेषितयोस्तयोर्निषेधौ तौ सविशेषणौ च विधिनिषेधौ न कथञ्चिद्विशेषणमनुमक्रम्य स्याता-मिति ब्रूषे,तदपि न,तर्हि विशिष्टस्य निषेधो-विशेषणस्यापि भवतीति संसर्गान्योन्यनिषेधोपि संसर्गनिषेधः स्यादेवेति पुनस्तत्प्रसङ्गो-वज्रलेपायते। अन्योन्यप्रतियोगिकः संसर्गप्रतिषेधो यथा विवक्षितः एवमन्योन्यनिषेधोपि संसर्गाप्रतियोगित्वेन निर्वाच्य इति चेन्न, एवं ह्यन्योन्यसंसर्गाभावः संसर्गान्योन्याभावश्चापरा कोटिः स्यात्। किञ्चैवं सति संसर्गाभावोन्योन्याभावो यो न भवति स संसर्गाभावतया विवक्षित इत्युक्तं स्यात् तथा च संसर्गविशेषणं व्यर्थमिति संसर्गाभावमर्थमधिकमाकाङ्क्षता त्वयात्यर्थं संसर्गाभावशब्दोपि हारितः स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चानयापि वाचा अन्योन्याभावनिषेधेऽभि-
धीयमानेऽन्योन्याभावेऽपि प्रसज्यते । नह्यन्यो-
न्याभावोऽन्योन्याभावो भवतीति शक्यं न प्रमातुं
सामानाधिकरण्यं हि प्रकारभेदे सति भवति
यथा नीलमुत्पलमित्यादि ततस्तदभावादेव ?
तथेत्यतिप्रसङ्गः । अन्यच्चान्योन्याभावेष्वेव तिष्ठ-
न्नेव कः प्रमेयो यद्गति तथा कथ्यते अभावमा-
त्रेत्वतिप्रसङ्गात् व्यक्तिविशेषे च शेषेष्वन्योन्या-
भावेषु संसर्गाभावत्वापत्तेः । एतच्च सर्वत्र त-
दन्यत्वेन व्यवच्छिद्यमाने द्रष्टव्यं, तथा हि
“नातत्तन्मनुषे तावन्न तत्तदपि मंस्यसे । सा-
माधिकरण्यं हि रूपभेदमपेक्षते । रूपान्त-
रेण निर्दिश्य तच्चेत्तदभिधीयते । ताद्रूप्ये
तथापि स्यात् सैव सव्यभिचारिता ।,, अपि च
अन्योन्याभावस्य संसर्गाभावोऽप्येवं व्यवच्छिन्नः
स्यात् तस्याप्यन्योन्यप्रतियोगितत्वात् । अथान्यो-
न्याभावस्य संसर्गाभावो नामाधिको नोपेयत ए-
वमादाय तथा स्यादिति चेदेवं तर्ह्यन्योन्याभाव-
स्याभावोऽपि नाधिकोऽभ्युपगन्तव्यः स्यादित्यन्यो-
न्याप्रतियोगित्वेन व्यवच्छेदोऽपि संसर्गाभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदभिमतस्य कथं स्यात्, व्यवच्छेदस्य निषेधार्थत्वात्। अथ माभूदधिकोऽसौ स्वरूपमेव तु तथेष्यत इति, तदा तथैव व्यवहार एव निर्दोष इति चेत्, तर्ह्यन्योन्याभावसंसर्गव्यतिरेकेऽपि तुल्यमेतत्। अपि च अन्योन्यप्रतियोगिको न भवत्यभावो यः संसर्गाभाव इति वदता त्वयाऽन्योन्यप्रतियोगिकेऽभावे निषिध्यमानेऽन्योन्यात्मकोऽसावभावोऽभ्युपगतः स्यात् द्वयोर्निषेधयोः सुन्दोपसुन्दतया अन्योन्यस्यैव स्थैर्यापत्तेः। तथा च सत्यन्योन्यस्मिन्निर्विशेषणे जगदेव प्रविष्टमिति संसर्गाभावत्वेन विवक्षितस्य जगदात्मतायां सिद्ध्यन्त्यामन्योन्याभावात्मतापि स्यादिति व्यर्थो विशेषणप्रयासो हासायेति सविशेषणेऽप्यविशेषणत्वप्रसङ्ग इति महत् कौतुकम्। ननु घटाभावो न भवति स्तम्भ इत्युक्ते किं स्तम्भो घटात्माभिहितो भवति, तत् कस्य हेतोः, तदा हि तथा स्यात् यदि घटस्तदभावश्चेत्येव जगत्स्यात्। यदा तु स्तम्भादिरपपरा कोटिरस्ति तदा कथं तथा स्यादित्युक्तप्रसङ्गानवकाश इति। मैवम्। यथा घटतद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावाभ्यामन्या वस्त्वादिकमप्यस्ति कोटिस्तथा
ऽन्योन्यान्योन्याभावाभ्यां नान्यकोटिः सम्भवति
निर्विशेषणेऽन्योन्यमध्ये जगतएव प्रवेशात्
तदात्मनोऽपि निषिध्यमानत्वे तन्निषेधात्मे
तदात्मनि जगत्प्रवेशात्, न हि घटः पटात्मत्व
नेन घटस्वरूपादन्यस्तदात्मा विहितः स्यात्
यदि तु तादात्म्यं नामाभेदाख्यो धर्मः कश्चि
दिष्यते स घटपटाद्यधिकरणतया निषिध्येत
तदा संसर्गाभावएव स्यात्। तस्मान्निर्विशेषे
तदात्मान्तर्भूतं जगदिति कोऽप्यन्तराभाव इति
अपि च एवं तर्हि घटे निषिध्यमाने घटाभावो
विधीयते घटाभावे च निषिध्यमाने घट इत्य
न स्यात् तृतीयस्याविद्यमानत्वात् भवन्वा घट
भावः स्तम्भो न भवतीत्यत्रापि घटाभावत्वावि
शेषाद्विशेषान्तरानिर्वचनाच्च। घटः स्तम्भात्
त्येवोक्तं स्यादिति त्वत्प्रसङ्ग स्त्वयि निपतेत्
संसर्गान्योन्याभाववैचित्र्यमादाय स परिहार
स एव च नाद्यापि व्यवतिष्ठते, अतएव प्रतीति
बलादन्यदेव वैधर्म्यमनयोरुपेयमित्यपि नि
स्तम्। प्रतिषेधप्रतिषेध्यविरोधे हि प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेष व्यवस्थानिरुक्त्यशक्तेरविशेषणैकनिषेधे अन्यविधिध्रौव्यं भवदन्योन्याभावनिषेधेऽप्यन्योन्यविषये स्यात्। मम चानिर्वचनीयतेव प्रतीतिव्यवहारव्यवस्था पर्य्यनुयोगवाणवारणाय वज्रवाणवारायमाणा विजयते मम त्वेवं दर्शनं प्रतीतिसिद्धत्वादत्यन्तासद्विलक्षणम्भवदपि जगत्तथा सत्त्वोपगमे बाध्यमानत्वादनिर्वचनीयमिति। अत एव प्रतीयमानत्वाद्वैचित्र्यमनयोर्दृश्यमानमतिदूरनिरस्तम्, प्रतियोग्यादिवैचित्र्यानुपपत्तितः प्रतीयमानस्यैव बाध्यताया एव कथनात्। तस्मात् "अन्योन्याभावसंसर्गाभावभेदव्यवस्थितौ सत्यां व्यावृत्त्यवस्थेति स्वाश्रयं कश्चित्कित्वत्तु,, ननु स्मृतिलक्षणाभाव एव यतेति सावधारणं वक्तव्यमेवेति चेन्न, एवकारेण किमधिकमभिधीयते भावोनिषिध्यत इति चेन्न, तस्याभावपदेनैव लब्धत्वात्, भावनिषेधोऽभाव इत्यनर्थान्तरमिदं, भावसामानाधिकरण्यनिषेध एवकारार्थ इति चेन्न, उक्तेनैव गतार्थत्वात्। अन्योन्याभावस्य च तस्य स्मृतावपि भावात्, न हि भावसामानाधिकरण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावयितुं शक्यं नाप्यनुभवांश इत्युक्तएव दोषः
किञ्च यदा प्रत्यभिज्ञानं स इत्यंशे स्मृतिरयमि-
त्यंशे चानुभव इत्येकं ज्ञानमभ्युपेयते तदा धर्मि-
णमादायापि स्मृत्यनुभवसङ्करोदुर्वारः। तथा हि
संस्कारेण तत्तामात्रं वोपनीयते तत्ताविशिष्टो
वा धर्मी। आद्ये स इति प्रत्यभिज्ञायाः शरीरं
न स्यात्, तत्तायाः केवलायाः संस्कारेणोप-
नीतत्वात्। नापि द्वितीयः, तथा सत्ययमित्यनु-
भवांशे धर्मिप्रकाशोवक्तव्य एव अन्यथा इद-
न्तामात्रप्रकाशोऽयमिति तच्छरीरं न स्यात्।
एवञ्च संस्कारस्य चेन्द्रियस्य च धर्मिप्रतीति-
हेतोरुभयस्योपनिपाते किं विशेष्यांशे भिन्ना-
भ्यां ज्ञानाभ्यामुत्पत्तव्यम्, उत कारणद्वयसम्मे-
लादभेदभाजा ज्ञानेन। प्रथमे प्रत्यभिज्ञान-
स्यैकज्ञानव्यक्तिताभ्युपगमव्याघातः भेदपक्षोक्त-
दूषणापातश्च। द्वितीये धर्म्यंशे प्रत्यभिज्ञायाः
स्मृतित्वमप्यनुभवत्वमपीत्यनुभूतिस्मरणसङ्कर
इति विषयव्यवस्थयापि नियमोभग्नः। अथो-
च्यते माभूद्विषयोपाधिभेदाद्व्यवस्थानमुपाध्यन्त-
रात्तु भविष्यति, तद्यथा संस्कारजत्वमादाय

CC-0. In Public Domain. Digitization by eGangotri

स्मृतित्वव्यवस्थितिरिन्द्रियसन्निकर्षजत्वमादाय चानुभवत्वव्यवस्थानमिति विरोधपरिहारोऽस्तु। न, प्रमात्वसामान्यानङ्गीकारे प्रमारूपताया विषयव्यवस्थित्यैवोपगमे नोपाध्यन्तरोपन्यासेऽपि स्मृतित्वानुभूतित्वयोरेकस्मिन्नेव धर्म्मिण्यर्थे निवेशात्प्रमात्वाप्रमात्वयोरेकविषयतैव। किञ्च ज्ञानविकल्पानामध्यात्मभावाभावसम्वेदनात् स्मृतित्वानुभूतित्वयोर्द्वयोरपि प्रत्यभिज्ञायां स्वतः प्रतिभानेन विषयनिरूपणव्यवस्थित्यनङ्गीकारे स्मृतित्वादेरिदन्तायामपि स्मृत्यवगमप्रसङ्गात्। यदि च संस्कारजत्वमेव स्मृतित्वं, तदा तस्यैव विरोधेऽभिधीयमाने स एव विरोधसामञ्जस्यायोपाधिरुपन्यस्यत इति नान्यस्य चेतसि निर्विशते। अथान्यत्स्मृतित्वन्नाम, तदाप्यनुपपत्तिः, तथा हि संस्कारजत्वं संस्कारादनन्तरं नियमेन भावो, नियतत्वञ्च नानाव्यक्तिगतमेकं रूपं संग्राहकमक्रोडीकृत्य न सम्भवतीति स्मृतित्वेनैव संस्कारजत्वं वक्तव्यं, तथा च संस्कारजत्वव्यवस्थितौ स्मृतित्वमुपाधिः, स्मृतित्वव्यवस्थितौ च संस्कारजत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्यन्योन्याश्रयः, तस्मात् स्मृत्यनुभवसङ्करो दुर्वार एव। अपि च स्मृत्यनुभवयो र्ये कारणसामग्र्यौ ते प्रत्यभिज्ञायां मन्तव्ये न वा। नचेत् कथं संभूतोपि स्मृतित्वमनुभवत्वञ्च प्रत्यभिज्ञानस्य एवमेव तथात्वेति प्रसङ्गात् + स्मृत्यनुभूत्योः स एव सङ्करः। प्रथमे पृथगेव कार्य्योत्पत्तिप्रसङ्गः प्रत्येकं स्वस्वकार्य्ये समर्थत्वात्, सामग्रीभेदस्य कार्य्यभेदहेतुत्वेनावधारितत्वात्। अथ यत्र ते पृथक्जायेते तत्र पृथगेव कार्य्यं, प्रत्यभिज्ञायान्तु तयोर्युगपज्जातत्वेन सम्भूयजननात्करम्बितकार्य्योत्पत्तिः। यद्यपि पटघटादिसामग्र्योर्नैवं दृश्यते, तथापि तद्विलक्षणस्वभावत्वादनयोरीदृशत्वमुपपद्यते, न हि एकस्य यादृक्पदार्थस्य स्वभावस्तादृगन्यस्यापि सर्व्वस्य भवति, जगद्वैचित्र्यभङ्गप्रसङ्गादिति। नैतदस्ति यत्र हि मिलितत्वं तयोस्तत्र किं परस्परसहकारित्वमनयोरेष्टव्यं न वा। न चेत् परस्परमेलकलक्षणोविशेषोऽनुपयोगी, कार्य्यजननं प्रति मिथः सहकारिभावविरहेणाप्रयोजकत्वात्, ततश्चाविशेषात् पृथगेव कार्य्यं प्रसज्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ परस्परसहकारित्वं तयोरिष्यते, तदानुभवांशेऽपि संस्कारस्य व्यापारः स्मरणांशेप्यक्षस्येति नियामकत्वाभिमतयोरुभयांशे साधारण्यात् स्मृत्यंशेप्यनुभूतिरनुभूत्यंशेपि स्मरणमिति वक्तव्येपायितं प्रत्यभिज्ञायामनुभूतिसङ्करेणेति ० नाप्यनुभव एवेति पक्षः, तथा सति तत्तावच्छिन्नस्याभेदाश्रयतायां न संस्कारोनेन्द्रियसन्निकर्षस्येति तदविषयत्वापातः। नच संस्कारद्वारा प्रत्यासत्त्या सम्बद्धविशेषणतया तद्ग्रहः, क्वचित् सोऽयं न वेति तर्हि संशयो न स्यात्, दोषवशात्तत्र तत्प्रकाशो न सम्बद्धविशेषणत्वादिति चेन्न, विनापि संस्कारं दोषवशात्तदापत्तेः। वस्तुप्रकाशिनि च दोषवाचोयुक्त्यनिवृत्तेः। क्वापि तस्यावस्तुप्रकाशित्वाद्दोषश्चेत्, कथमक्षादेरपि तन्न स्यात् विशिष्टत्वेन तथात्वस्य प्रकृतेप्यपरिहारात्, न हि विनैव कुतोपि विशेषादस्यावस्तुप्रकाशिता। सत्यमर्थे दोषादवस्तुन एव प्रकाशे संशयात्मत्वावत्प्रवृत्त्यादेरसम्भवापत्तेः। वस्तुविषयत्वेपि दोषादनिश्चयतेति चेन्न, वस्तुनस्तस्यासङ्कीर्णत्वात्तस्य प्रकाशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव संशयैककोटौ प्रकाशितमिति कुत: तद-
निश्चयता, निश्चयार्थस्य च संशयकोटावखण्डने
संशयेन तदभावाधिकग्राहित्वेपि, निश्चयत्व-
स्याप्रत्यूहत्वादेवाभावनिश्चय: कोट्यन्तरं केवल-
मधिकं स्यात्, जाति: संशयत्वं तत्प्रयोजकश्च
दोष इति चेन्न, इदं तद्वा न वेति संशयकोट्यर्थ-
निर्देशसमन्वयेन वा-शब्द प्रतीतिव्यवहारयो-
रभावापत्ते:, प्रतीत्या सह वाकारार्थं सम्बन्धे
प्रत्येमि न वेति पदापत्ते:, वाकारार्थस्य प्रतीति
गतत्वेपि निश्चयत्वेतस्थाणुमानय पुरुषं वेति
स्थाणुपुरुषगतप्रामाणिकव्यवहारानापत्ते:। तस्मा-
द्वाकारार्थस्य ज्ञानधर्मत्वे साक्षात्कारित्वादि-
वद्विषयानन्वयापत्तिरेवेति। न च प्रत्यासत्तौ
सत्यामपि प्रत्यासत्त्यपुरस्कारान्मनसा न ग्र-
हणं, तत्र दोषवशादित्यस्तु, दोषे सत्यपि वस्तुन:
संस्कारेण संस्कारस्यात्मना यस्य मनसा तस्य
च वाह्येन्द्रियेण प्रत्यासत्त्यपेक्षिणएव तदर्थ-
प्रकाशादिनियमोपपत्ते: क: प्रत्यासत्त्यपुर-
स्कारस्त्वन्मते स्यात्, यदि तु संस्कारप्रत्यासत्ति-
मनपेक्ष्य तथा सन्दिह्यते तदा ग्ननुभूय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रसृत्य वा तया सन्दिह्येत। वस्तुतस्तु मनसा संस्काराग्राहिणा चक्षुरादिना चात्माग्राहिणा तादृशप्रत्यासत्त्या ग्रहणानुपपत्तेः। नियमेन तदिन्द्रियाग्राह्याश्रयप्रतियोगिकेतरस्य ग्रहणे स्वग्राह्यसम्बन्धविशेषणतायाः प्रत्यासत्तित्वनियमात्, अन्यथा परमाण्वादौ पृथिवीत्वादेरन्यत्र ग्राह्यतया निरस्तस्वरूपायोग्यत्वस्याभावो दृगादिभिर्गृह्येत। नहीन्द्रियविहारदेशेषु निष्प्रमाणकत्वनियमो युक्ताभ्युपगमः, शब्दाभावप्रत्यक्षत्ववादिनये श्रोत्रेन्द्रियविशेषणता सप्तमः सन्निकर्षो, न तु तत्र सम्बद्धविशेषणतेत्यतोऽपि न व्यभिचारः। न चात्मसंयुक्तमनः प्रतिपूर्वानुभूतार्थात्मप्रत्यासत्तिरेव संस्कार इति तदतीन्द्रियत्वं न दोषाय, प्रत्यासत्तेरतीन्द्रियाया इन्द्रियार्थसन्निकर्षस्योपगमादिति स्वीकृते निस्तारः, तथा सति स इत्यंशे चक्षुरादेः प्रत्यासत्त्यभावात्प्रत्यभिज्ञाया अचाक्षुषत्वापातात्। अयमित्यंशो दृगादिना, तदंशस्तु मनसा गृह्यतां, तदेतद्भेदस्तु केनेत्युक्तमप्यावर्त्तेत इति। एतेन संस्कारः सहकारिमात्रमिन्द्रियस्यातिप्रसङ्गनि-

CC-0. In Public Domain. Digitization by eGangotri

वारकं प्रत्यभिज्ञायां तदर्थम् इन्द्रियेणासन्नि-
कृष्ट एवोल्लिख्यते, विभ्रमार्थवत्सन्निकर्षकृष्ट
हिता चेन्द्रियस्य सन्निकर्षसहकार्य्यवश्यम्भा
मात्रं, तस्येदमंशसन्निकर्षादेव स्यात्। ननु स
ग्राह्यसन्निकर्षसहकारितेत्यपि निरस्तं, सोऽ
न वेति संशयाभावापातेनैवेति। तदद्राक्षमि-
त्यादिस्मृतिरपि चैवमनुभव एव स्यात्। मनः
आत्मसंयोगसहकृतादात्मार्थसन्निकर्षात् सं-
स्काराज्जायमानाया स्मृत्या इन्द्रियार्थसन्निकर्ष-
जत्वादेव मनसा आत्मसंयोगसमवायेन प्रत्यक्षी-
क्रियमाणे ज्ञानादिभिः स्मर्य्यमाणस्यार्थस्याभि-
शेषादिति। एतेन तत्तावच्छिन्नप्रतियोगिका-
न्योन्याभावविरहः स्वरूपाभेदोवायं भातीत्यपि
निरस्तम्। अन्योन्याभावव्यतिरेकोऽन्योन्यमे-
तत्तेदन्तोपाध्यवच्छिन्नयोः स्यात्, न च तन्मि-
लितमेकेन सुग्रहम्। एवं स्वरूपाभेदेऽपि
तयोर्धर्मैक्यं तदनवगाहिना दुरवगममेव। सं-
स्कारोपनीते च विषये यदि ज्ञानमनुभवः
स्यात्, स्मृतिरपि कुतोनानुभूतिः। अथ न
संस्काराधीनत्वमात्रेणस्मृतित्वं, किन्त्वनुभव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणासंसृष्टसंस्कारजत्वेन, ततश्चाधिकार्थोंन्द्रिय-
सन्निकर्षापेक्षं प्रत्यभिज्ञानमनुभव एव भवति
न तु स्मृतिरिति चेन्न, संस्कारासंसृष्टानुभव-
कारणजत्वेनानुभवत्वम्भवति, प्रत्यभिज्ञानन्तु
संस्कारसहितानुभवकारणजं स्मृतिरेवेति वैप-
रीत्यं किन्न स्यात्। अन्यत्र न स्मृतिरनुभवका-
रणसंसृष्टसंस्कारजन्येति तु नान्यत्रानुभवेऽपि
संस्कारसंसृष्टार्थेन्द्रियसंयोगजन्येति साम्यादेव
बाधकम्। तदेवं विनिगमनायां प्रमाणाभावात्
स्वयं कल्पितव्यवस्थामवैपरीत्येनापि कल्पनास-
म्भवात्प्रत्यभिज्ञानमुभयकारणसंप्लवात् स्मृति-
श्चानुभवश्चेति मन्तव्यं, तथाच स्मृतिव्यावृत्तमनु-
भवत्वं जातिरस्तीति दुष्प्रत्याशा निरवकाशा।
नच विषयांशे स्मृतित्वानुभवत्वयोर्व्यवस्था कर्त्तुं
शक्यते, तन्निरासस्य निवेदितत्वात्। ततश्च
तदेव ज्ञानं तस्मिन्नेवांशे स्मृतिश्चानुभूतिश्चेत्या-
पतितेऽपि यदि न विरोधबुद्धिर्भवतस्तदा तद-
धीने तत्रैवार्थे प्रमात्वापाते साक्षु॥ एतेन वि-
रोधाधत्तत्रानुभवत्वस्वीकारे बाधबलेन स्मृति-
व्यतिरिक्तमनुभवत्वं नामानुगतं साक्षात्कारि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञानानुमित्यादिसाधारणमनुभवबलादेव व्य-
वस्थापनीयमिति प्रतीति कलहोऽपि निरस्तः
ननु चानुभव एव धारणमिह, प्रत्यभिज्ञा-
ह्यनुभवत्वमेवानुभूयते न तु स्मृतित्वं, ते-
संस्कारजत्वेपीन्द्रियार्थसन्निकर्षाधिकापेक्षया
ऽनुभवत्वमेवेति विनिगमनायामपीदमेव प्रमा-
णम्, अन्यथा प्रत्यभिज्ञानेऽनुभवप्रत्ययो न स्या-
दिति प्रतीतिकलहेन प्रत्यवस्थेयमिति न, इद-
न्तातत्तावभासयोरनुभवस्मरणभागयोः सत्वे-
नानुभवस्यैकपक्षे असाधारणीकृत्य प्रमाणयितु-
मिहाशक्यत्वात् । एतेन स्मृत्यनुभवसङ्करप्रस-
ङ्गेनानुभूतिपदव्यवच्छेद्यं परिसुतं मन्तव्यं न च
वाच्यं प्रत्यभिज्ञानं व्यवच्छेद्यं माभूत्, स्मृत्यन्त-
रन्तु भविष्यतीति, तस्याप्यनुभूतित्वेन भवताऽ-
वश्यस्वीकर्त्तव्यत्वात् । तथा हि घटस्तत्रासीदि-
त्यादिस्मृतौ पूर्व्वकालविशिष्टो घटः स्फुरति, न कि-
चासौ पूर्व्वमनुभूता भूततया संस्कारेणोपनीयते
प्रत्युत पूर्व्वं वर्त्तमानतया एवानुभूत्या ग्रहण-
तस्मादिदानीं पूर्व्वमनुभूतासामग्रीसम्भेदात्
सोऽयमिति प्रत्यभिज्ञानवत्तद्विशिष्टतावगमो-

ह्यसौ स्मृत्यनुभवात्मक एवाभ्युपगन्तव्यः। एते-नानुभवसामग्रीसहितः संस्कारोऽनुभवकारण-मिति पक्षे पूर्वं शङ्किते इदमपि दूषणं द्रष्टव्यं, तथा सति स्मृत्युच्छेदापत्तेः। नच तदस्ति स्मरणं, यत्र सा न प्रकाशते, ततश्च व्यवच्छेद्यानुपपत्तिः॥ यदपि कैश्चिदुच्यते दोषवशात्प्रमुष्टतत्तांश-स्मरणम्भवतीति, तदपि नोपपन्नं, तदीयस्मर-णत्वे प्रमाणाभावात्। नचानुभवसामग्र्यभा-वात्पारिशेष्येण स्मृतित्वम्, इन्द्रियार्थसन्निकर्ष-व्यावृत्त्या अनुभवसामग्र्यभावात्पारिशेष्येणानु-मित्यादेरपि स्मृतित्वापत्तेः। सर्वानुभवसामग्र्य-भावादिति चेत्, कथं पुनस्तत्तांशशून्यरजतादि-ज्ञानहेतुसामग्री नानुभवहेतुसामग्रीत्यवधारितं, अन्यप्रमाणीकरणसामग्र्यसम्भवादिति चेन्न चतुष्प्रमाणीजनकसामग्र्यसम्भवात्पञ्चमी प्रमा नकिन्न पारिशेष्यात्स्मरणं व्यवस्थापि, कुत्र वा प्रतिपन्नं पञ्चप्रमाणीकरणसामग्र्यभावे जाय-मानं ज्ञानं स्मृति भवतीति, घटस्थलासीदि-त्यादिज्ञानानामनुभवत्वोपन्यासस्य कृतत्वात्। अथ मन्यसे प्रत्यक्षादिकरणसामग्र्यनुपपत्त्या

CC-0. In Public Domain. Digitization by eGangotri

रजतमात्रस्य च पूर्व्वमनुभूतत्वेन तद्विषयस्य
स्कारसम्भवात्संस्कारस्यैव हेतुताङ्गीक्रियते नह्ति
न्यत्कारणत्वेन कल्प्यते, इन्द्रियार्थसन्निकर्षाभा
सम्भवे जायमानस्य त्वनुमानादेरननुभूतविषय
यत्वेन तस्मान्नोत्पत्तिसम्भव इति तत्कारणप
लिङ्गादिकमङ्गीक्रियते, अतः प्रमाणान्तरासंभव
क्तसंस्कारजत्वं तद्व्यङ्ग्या वा जातिविशेष
स्मृतित्वमिति। नैवम्। तत्र कारणत्वं किमिन्द्रि
नान्यस्यैव, येन संस्कारजत्वं व्यवस्थाप्यते, ते
र्थेन सह तदानीमस्य सन्निकर्षाभावादसन्नि
ष्टस्य च तस्य ज्ञानजनकत्वेऽतिप्रसङ्गात् नेन्द्रिय
यजत्वं तस्येति चेन्न संस्कारस्यापि केवल
तज्जननेऽतिप्रसङ्गतादवस्थ्यात्। सहचरि
धर्मदर्शनादिना सहकारिणा युक्तस्य संस्का
रस्य तज्जननेनास्त्यतिप्रसङ्ग इति चेन्न तेनै
सहकारिणा सहितस्येन्द्रियस्यापि तज्जन
नातिप्रसङ्गाभावात्। अननुभूतेपि तर्हि प्रस
इति चेन्न, तथापि तद्धर्मतानधिगततद्धर्मवत्य
गते तस्य संस्कारबलः स्मृत्यापत्त्या समाधि
व्यात्। लुप्ततत्साहचर्य्यदर्शनजसंस्कारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा सति तत्सहचरितरजताद्यज्ञानप्रतीतिप्रसङ्ग
ति चेन्न, तवापि मते तादृशस्य रजतादिसं-
स्कारवतो रजतादिस्मृतिप्रसङ्गसाम्यात्, तस्मा-
द्यतस्ते कालव्यवधानादितः संस्कारलोपतद-
नुपनिपातस्यापि हेतुत्वोपगमे, नातिप्रसङ्गात्
तया कालादिव्यवधानाद्यभावसदृशदर्शनसह-
कृतस्य चक्षुषो युक्तं तदेवं [तत्सदृक्प्रत्यभिज्ञानं
यत्ते संस्कारबोधकं। सहकारितदेवास्तासञ्च-
स्यातिप्रसक्तिनुत्] तत्सदृशप्रत्यभिज्ञानन्तु
स्मर्तव्य स्मरणपूर्वकमित्येतदपि सममेव। तथा-
प्यन्यत्रार्थसन्निकर्षमन्तरेणेन्द्रियस्य ज्ञानकार-
णत्वं नोपलब्धचरमिति चेन्न, विशिष्टरूपेण भ्रम-
विषये मया तदुपगमात् सहकारिभूतदोष-
शक्तेर्वा प्रत्यासत्तित्वेनेष्टत्वात्। किञ्च संस्कार-
स्यापि प्रमाणान्तरासहकृतस्य नान्यत्र ज्ञान-
जनकत्वं दृष्टमिति तदपि कथं कल्प्यते, प्रत्यभि-
ज्ञान एव संस्कारस्य सदृशदर्शनादिसहका-
रित्वं कल्पितं नत्विन्द्रियस्येति चेन्न, प्रत्यभि-
ज्ञाने संस्कारेन्द्रिययोर्द्वयोरपि कारणत्वात्।
सदृशदर्शनादिसहकृतत्वदर्शनादि अविशेषात्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र सदृशदर्शनसहकारित्वे संस्कारसहका-रित्वस्यापि प्रसङ्गः प्रत्यभिज्ञानवदिति चे-तथा सति तद्वदेव तत्तोल्लेखापत्तेः। सदृशदर्श-नादिसहकृतत्वेन च तत्तांप्रसञ्जने संस्कार-त्वस्योपाधित्वम्। नच सदृशदर्शनसहकारितै-तत्ता प्रयोजिकात्र त्यज्यतां न संस्कार इ-युक्तं, सदृशदर्शनं परित्यज्य संस्कारे सत्यपि तथाबोधात्। तथापि सदर्थे प्राप्यकारित्वमि-न्द्रियस्य दृष्टं न ह्यातुं शक्यमिति चेन्न, उक्तम-यथेन्द्रियस्य प्राप्तिसहकृतस्य ज्ञापकत्वं दृ-तथैव संस्कारस्यापि प्रमाणान्तरसहकृतस्य ज्ञापकत्वमुपलब्धमिति तदपि ह्यातुं न युक्त-मिति संस्कारस्यापि चेन्द्रियप्रत्यासत्तित्वस्वी-कारेण तद्विरहासिद्धेः। तत्तांशमोषकल्पनञ्च स्वतन्त्रसंस्कारजत्वपक्ष एव यावदधिकं युक्तस्याय-तत्तांशमोष इति विचारमधिकरोति, पूर्वं वर्त-मानादिकालविशेषविशिष्टस्य रजतादेरेक-स्मिन्ननुभवे प्रकाशिततया तज्जन्येन संस्कारे-णापि तथैवोपनेतुमुचितत्वात्। प्रत्यभिज्ञायां तथैव फलदर्शनात् दोषवशात्तत्तांशमोष इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न, विषयसम्बन्धस्य स्वभावत्वेन संस्कारे तद्‌-लोपात् । दोषकृतौ तथेति चेत्, कः पुनरसौ दोषः, यस्माद्भ्रान्त्युत्पत्तिः परेषामिति चेत्तर्हि तद्रजतावशिष्टमिदं रजतमित्यत्र सैव रजत-व्यक्तिरियमित्यत्र वा पुनस्तदेव रजतमुपस्थित-मितीह वा सामान्यतएव रजतस्य तदापि परामृष्टस्य भ्रान्तौ तत्तांशमोषः स्यात्, दोषस्य विद्यमानत्वात्, अन्यथा इदं रजतमित्यंशेऽपि तस्मिन् ज्ञाने तत्तांशमोषो न स्यादित्यास्ता-मियं प्रसक्तानुप्रसक्तिः । नच प्रत्यभिज्ञानं स्मर-णानुभवाभ्यामन्यएव प्रकार इति वाच्यम्, अननुभवत्वेनाप्रमात्वापातात् । नचैवमस्त्वित्यपि वाच्यम्, अक्षणिकवादिना स्थिरसिद्धौ प्रमा-त्वेनोपन्यस्तत्वात् । ईदृशप्रसिद्धलक्ष्यत्यागेन च लक्षणोपादनेऽनियमः प्रसज्येतेति, तस्माज्जा-तिवाचिनोऽनुभवपदस्य स्मृतितोव्यवच्छेदार्थ-मुपादानमिति सर्वथानुपपन्नमिति । नापि स्मृत्यन्यत्वमनुभवार्थः नापि स्मृतिलक्षणरहित-त्वम्, उक्तक्रमेण स्मृत्यनुभूतिसङ्करस्य दर्शित-त्वेन व्यवच्छेदकत्वानुपपत्तेः । इतोऽपि न स्मृत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यत्वमनुभवार्थः, तथा हि स्मृत्यन्यत्वं यत्किञ्चि
त्स्मरणान्यता वा, सर्व्वस्मृतिव्यक्त्यन्यता
स्मृतित्वरहितत्वं वाभिप्रेतं, प्रथमे स्मृत्यन्त
व्यतिरेकात् स्मृत्यन्तरमप्यनुभूतिः स्यात्। न
यतो व्यतिरिक्ता स्मरणव्यक्त्यन्तरादेका स्मृ
व्यक्ति स्तत् स्मरणमेव न भवति येन तदन्य
न स्मृत्यन्यत्वं स्यात्। नापि द्वितीयः, मदीया
स्मृतिव्यक्तिभ्यो हि भवता कथंकारं व्यति
क्तत्वमवधारणीयं प्रमायाः, तासां सर्व्वासां
वता प्रत्येतुमशक्यत्वात्, तथा हि न तावत्प्र
कीयज्ञानेऽपरस्यास्मादृशोऽध्यक्षसम्भवः, नाप्यनु
मानार्थापत्ती लिङ्गानुपपद्यमानयोः सर्व्वा
र्व्वादृशा प्रत्येतुमशक्यत्वात्, नापि शब्दः, सर्व
तस्यासम्भवात्, उपमानाद्यसम्भवोऽपि स्फुट एव
ततः कथं सर्व्वाभ्यः स्मृतिव्यक्तिभ्यो व्यतिरेको
निरूप्यः प्रमाया इत्यनवबोधादसिद्धिर्लक्षणस्य
न च वाच्यं स्मृतित्वेन सर्वाः स्मृतिव्यक्तयः सर्व
कालसर्वपुरुषसम्बन्धिन्यः स्वात्मीयां स्मृतिव्यक्ति
प्रत्यक्षतया प्रत्यक्षादेवावगम्यन्ते, सामान्यलक्ष
णयेन्द्रियप्रत्यासत्त्या व्याप्तिग्रहणकाल इव स्माप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri

व्यापकव्यञ्जय इति, दृष्टान्तदार्ष्टान्तिकयोर्दोषग्रस्तत्वात् । तथा सति ह्येकं प्रमेयं प्रत्यक्षयतः प्रमेयत्वसामान्य प्रत्यासत्त्या विश्वमेव प्रत्यक्षं स्यात् । एवमभ्युपगच्छतश्च अहृधीमहि सार्वज्ञमिदं यदि जानासि किमस्मच्चेतसि विपरिवर्त्तत इति । नापि तृतीयः स्मृतित्वरहितत्वं हि स्मृतित्वाभाववत्त्वं वा स्यात् स्मृतित्व प्रतियोगिकसाक्षयस्वरूपं वा, तज्ज्ञानं वा, न तावदाद्यः, तथा हि स्मृतित्वान्योन्याभावोपि स्मृतित्वाभावो भवत्येव, तद्वत्त्वञ्च स्मृतिव्यप्ति । न हि स्मृतित्वमेव स्मृतिः ततश्च स्मृतेरपि प्रमात्वापातः, तद्व्यवच्छेदाद्विशेषणवैयर्थ्यञ्च विना विशेष्यमिच्छादावतिप्रसङ्गात् । स्मृतित्वस्य संसर्गाभावास्तत्र विवक्षित इति चेन्न, तथा हि, स्मृतित्वस्य संसर्गाभाव इति किमुच्यते, किं स्मृतित्वविशिष्टस्य संसर्गस्याभावः, उत संसर्गविशिष्टस्य स्मृतित्वस्य, अथान्यदेव यत्किञ्चिदनया वाचोयुक्त्या विवक्षितम् । आद्ये स्मृतित्वसंसर्गान्योन्याभावः स्मृतावस्तीति स एव प्रसङ्गः, न हि स्मृतित्वसंसर्गः स्मृतिः । अतएव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न द्वितीयोऽपि न हि संसर्गविशिष्टं यत्स्मृतित्वं तदेव स्मृतिव्यक्तिः तच्च संसर्गविशिष्टस्मृतित्वेन सह स्मृतिव्यक्तेरन्योन्याभावमादायोक्तदोषानिवृत्तिः, एवं तत्र तत्रापि संसर्गविशेषणप्रक्षेपे दोषानिवृत्तिरेव, अनवस्थायां वा पर्य्यवसानं विशेषणप्रक्षेपपरम्परायाः। नच वाच्यं स्मृतित्वसंसर्गस्य न संसर्गान्तरेण सम्बन्धित्वं किन्तु स्वभावतएव तत् कुतः परम्परागवेषणं कार्य्यमिति। स्मृतित्वसंसर्गस्यान्योन्याभावमादाय कृतस्य प्रसङ्गस्य परिहर्त्तुं तदानीं सुतरामशक्यत्वात् संसर्गान्तरविशेषणवचनस्याधिकाया पर्य्यवसायित्वात्। किञ्च तदुभयस्वरूपातिरेकं तत्संसर्गस्यामन्यमानेन स्मृतित्वसंसर्गधर्म्मिस्वरूपं चेत्येतयोः संसर्गात्मत्वे व्यवस्थाप्यमानेऽनुभूतौ कथं तादृशस्य संसर्गस्य निषेधः किमनुभूतेः स्वरूपं नास्ति उत स्मृतित्वसंसर्गस्य ततः कस्य निषेधः। अर्थान्तरभूतस्य च संसर्गस्य निषेधे स्मृतावपि प्रसङ्गस्तदवस्थः स्मृतौ तस्यार्थान्तरभूतस्य भवताऽनभ्युपगमात् स्वरूपमेव तयोः सम्बन्ध इति तव भवतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽभ्युपगमः । अथोच्यते अनुभूतिस्मृतित्वसंसर्गयोः स्वरूपसम्बन्धेपि न परस्परसम्बद्धबुद्धिजनकत्वं तयोस्तादृशत्वञ्च यत्र तयोस्तत्र सम्बन्धात्मकत्वं स्वरूपयोरुच्यत इति । नैवम् । विशेषोपसंग्रहासिद्धौ तस्याप्यनुपपत्तेः, उपसंग्राहकान्तरोक्तौ तत्सम्बन्धेनापि प्रसङ्गेनापरापरोपसंग्राहकगवेषणायामनवस्थापातात् तावतापि चानुभूतिस्वरूपे कस्य निषेधोवर्णितः स्यात् । स्मृतित्वसंसर्गानुभूती सम्बद्धे इत्येवं रूपबुद्धिजनकत्वस्येति चेन्न भ्रान्त्यात्मिकाया ईदृशबुद्धेर्जनकत्वस्य वारयितुमशक्यत्वात् । यथार्थीया इति चेत् ईदृशबुद्धिर्यथार्थीया यदि सत्त्वमभ्युपैषि तदानुभूतौ स्मृतित्वप्रसङ्गः अथ नाभ्युपैषि किं प्रति तस्य जनकत्वाभावोनिरूप्यः । अथात्यन्तासतीमेव तादृशबुद्धिं प्रति जनकत्वाभावधारणमनुभूतेरभ्युपैषि तदा स्मृतावपि प्रसङ्गः यावत्यस्तद्बुद्धयस्तत्र जायन्ते तदधिकां तादृशबुद्धिमत्यन्तासतीं प्रत्यजनकत्वस्य स्मृतावपि सम्भवात् । सर्वामेव तादृशबुद्धिं प्रत्यजनकत्वमनुभूतेर्नत्वेवं स्मृतेरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न सर्व्वं तद्व्यक्तिप्रमित्यसम्भवात्। किञ्च सर्व्वा-
मिति कोऽर्थः किमसतीं सर्व्वाम् उत सतीम्
अथ सतीमसतीञ्चेत्युभयीमपि प्रत्यजनकत्वम्
आद्ये द्वितीये च स्मृतावपि तदजनकत्वमस्त्येव
न हि स्मृतित्वसंसर्गस्मृतीसम्बद्धे इति या-
वत्यः स्मृतिव्यक्तिषु बुद्धयो भवन्ति ताः प्रति
प्रत्येकं स्मृतिव्यक्तिषु जनकत्वमिति काचित्
सत्यां सतीं प्रति च तदजनकत्वं प्रागेव दूषि-
तम्। तृतीये नानुभूतावपि तदजनकत्वं सत्या-
सत्यतादृशबुद्धेर्भाविनाभावेन च सतीमसतीं
प्रत्यजनकत्वस्यासम्भवादिति। स्यादेतत्स्मृति-
त्वस्यान्योन्याभावमादाय यातिप्रसक्तिर्दर्शिता
सा नोपपद्यते भेदाभेदवादिमते स्मृतित्वभे-
दस्य स्मृत्या सहाभ्युपगमात् ययोर्भेदाभेद-
स्त भयोरन्योन्याभावानभ्युपगमात्। मैवम्। कथं
ह्यवधार्य्यं स्मृतित्वस्य भेदाभेदः स्मृत्या नानु-
भूत्येति। अनुभूत्या सह तद्विशिष्टप्रमाया अ-
भावादिति चेन्न किं सत्याः किमसत्या इत्या-
द्युक्तविकल्पदोषात्। प्रागभावप्रतियोगिन्या
इति चेन्न, अनुभूतौ तादृश्याः स्वीकारेणानुभूते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तथात्वापातात् । स्मृतिस्मृतित्वयोरन्योन्याभावाभावश्चान्योन्याभावानुभूतावपि तुल्यः, न हि स्मृतित्वान्योन्याभावोऽनुभूतिरित्युक्तमावर्त्तते । अथ माभूद्भेदाभेदमादाय परिहारः, तथापीदं तत्र भवति इह तन्नास्तीति प्रतीतिसाक्षिक एवान्योन्यसंसर्गाभावयोर्भेद इति चेन्न, प्रतियोगिरूपोपाध्यवैचित्र्यादभावे जात्यादिभेदाभ्युपगमाच्च, तयोर्भेदबुद्धिरेव प्रामाण्यमश्नुवाना कूटसाक्षिणीति तदनादरणात् । न च स्वप्रतियोगिसमानकालसमानाधिकरणोऽभावस्तदन्योन्याभाववांश्च तदभावः संसर्गाभावयथासम्भवमात्माश्रयाद्यननुभवस्वभेदाननुगमतत्तदवगमानभ्युपगमानामनुत्तरणीयत्वप्रसङ्गात् । ननु संसर्गप्रतियोगिको निषेधः संसर्गाभावः, तादात्म्यप्रतियोगिकश्च तादात्म्याभाव, इत्युक्त एव न भिन्नता, तयोर्हि संसर्गतादात्म्यस्य निषेधः संसर्गनिषेध एव न भवति, तादात्म्यप्रतियोगिकत्वादिति । नैवम् । द्रव्यगुणकर्मणां समवायिकारणेषु हि तेषां प्रध्वंसा नैवं संसर्गाभावाः स्युः । संसर्गे प्रतियोगित्वे तु संसर्गस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समवायस्वरूपतया समवायानित्यत्वप्रसङ्गात्किञ्च तर्हि संसर्गान्योन्याभावौ द्वावपि न घटादिप्रतियोगिकाविति घटादेः कालादिवन्निरवधित्वापातः। संसर्गतादात्म्ययोश्चाविशेषितयोर्निषेधे सामान्यत एव तयोरुच्छेदः स्यात्, एवं यद्यदेव प्रतियोगि वाच्यं तत्तत्स्वरूपत एव न स्यात् तस्यापि संसर्गं प्रति धावने च तदच्चतं संसर्गानवस्थाशेषोच्छेदात्पूर्व्वपूर्व्वोच्छेदो वा स्यात् न प्रतियोग्यनुयोगिनोस्तथात्वं विरोधः, किन्तु सहभावाभावोऽतस्तन्मात्रं न स्यात्। ननु तन्मात्रमेव न स्यादिति चेन्न, अनुयोगिनि प्रतियोग्यासत्तेः। तथा प्रमाभावात् कथं तदास्तामिति चेन्न, तथाप्रमाभावमूलकस्य विरोधस्य सहानवस्थानस्य नियमनभङ्गात्, प्रतियोग्यनुयोगिभावादन्यः कस्तयोर्व्विरोधः स्यात् तथा न प्रतीयमानत्वमेव स इति चेन्न, अतिप्रसङ्गात्, नियमेनेति चेन्न, व्यक्त्यन्तरविरोधापत्तेः, तथा न प्रमातुमनौपाधिकी योग्यतेति चेत्, सैव मेयगतानुयोगिप्रतियोगित्वादन्या का समर्थिता स्यात्, स्वरूपमेवेति चेन्न, मिथः सम्भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाभ्युपगन्त्वापि तयोः स्वरूपोपगमात् तथाभूतं स्वरूपमिति चेन्न,तस्यैव निर्वाच्यतापत्तेः। कस्य गोत्वाश्वत्वाभ्यां भावाभावयोरेवमविरोधे विशेषः स्यात् सत्याञ्च तयोः साहित्यप्रमायां प्रकारभेदेन व्यवस्थापना किमिति कार्य्या प्रमयैवा प्रमानुपगमादिति। अथ घटादिविशेषितयोस्तयोर्निषेधौ तौ सविशेषणौ च विधिनिषेधौ न कथञ्चिद्विशेषणमनुपक्रम्य स्यातामिति ब्रूषे,तदपि न,तर्हि विशिष्टस्य निषेधो-विशेषणस्यापि भवतीति संसर्गान्योन्यनिषेधोऽपि संसर्गनिषेधः स्यादेवेति पुनस्तत्प्रसङ्गो-वज्रलेपायते। अन्योन्यप्रतियोगिकः संसर्गप्रतिषेधो यथा विवक्षितः,एवमन्योन्यनिषेधोऽपि संसर्गाप्रतियोगित्वेन निर्वाच्य इति चेन्न, एवं ह्यन्योन्यसंसर्गाभावः संसर्गान्योन्याभावश्चापरा कोटिः स्यात्। किञ्चैवं सति संसर्गाभावोन्योन्याभावो यो न भवति स संसर्गाभावतया विवक्षित इत्युक्तं स्यात्, तथा च संसर्गविशेषणं व्यर्थमिति संसर्गाभावमर्थमधिकमाकाङ्क्षता त्वयात्यर्थं संसर्गाभावशब्दोऽपि हारितः स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चानयापि वाचा अन्योन्याभावनिषेधोऽभि
धीयमानेऽन्योन्याभावेऽपि प्रसज्यते। नह्यन्यो
न्याभावोऽन्योन्याभावो भवतीति शक्यं न प्रमा
सामानाधिकरण्यं हि प्रकारभेदे सति भव
यथा नीलमुत्पलमित्यादि ततस्तदभावादेव
तथेत्यतिप्रसङ्गः। अन्यच्चान्योन्याभावेष्वेव ति
न्नेव कः प्रमेयो यदिति तथा कथ्यते अभावम
ते त्वतिप्रसङ्गात्, व्यक्तिविशेषे च शेषेष्वन्योन्या
भावेषु संसर्गाभावत्वापत्तेः। एतच्च सर्वत्र त
दन्यत्वेन व्यवच्छिद्यमाने द्रष्टव्यं, तथा हि
"नातत्तन्मन्यसे तावन्न तत्तदपि मंस्यसे। सा
माधिकरण्यं हि रूपभेदमपेक्षते। रूपान्त
रेण निर्दिश्य तच्चेत्तदभिधीयते। ताद्रूप्ये
तथापि स्यात् सैव सव्यभिचारिता।," अपि
अन्योन्याभावस्य संसर्गाभावोऽप्येवं व्यवच्छिन्न
स्यात्, तस्याप्यन्योन्यप्रतियोगितत्वात्। अथान्यो
न्याभावस्य संसर्गाभावो नामाधिको नोपेयत ए
यस्मादाय तथा स्यादिति चेदेवं तर्ह्यन्योन्याभा
स्याभावोऽपि नाधिकोऽभ्युपगन्तव्यः स्यादित्यन्यो
न्याप्रतियोगित्वेन व्यवच्छेदोऽपि संसर्गाभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वदभिमतस्य कथं स्यात्, व्यवच्छेदस्य निषेधार्थत्वात्। अथ माभूदधिकोऽसौ स्वरूपमेव तु तथेष्यत इति, तदा दायैव व्यवहार एव निर्दोष इति चेत्, तर्ह्यन्योन्याभावसंसर्गव्यतिरेकेऽपि तुल्यमेतत्। अपि च अन्योन्यप्रतियोगिको न भवत्यभावो यः संसर्गाभाव इति वदता त्वयाऽन्योन्यप्रतियोगिकेऽभावे निषिध्यमानेऽन्योन्यात्मकोऽसावभावोऽभ्युपगतः स्यात् द्वयोर्निषेधयोः सुन्दोपसुन्द तया अन्योन्यस्यैव स्थैर्यापत्तेः। तथा च सत्यन्योन्यस्मिन्निर्विशेषणे जगदेव प्रविष्टमिति संसर्गाभावत्वेन विवक्षितस्य जगदात्मतायां सिद्धन्त्यामन्योन्याभावात्मतापि स्यादिति व्यर्थविशेषणप्रयासोपहासार्थित सविशेषणेऽप्यविशेषणवत्प्रसङ्ग इति महत् कौतुकम्। ननु घटाभावो न भवति स्तम्भ इत्युक्ते किं स्तम्भो घटात्माभिहितोभवति, तत् कस्य हेतोः, तदा हि तथा स्यात् यदि घटस्तदभावश्चेत्येव जगत्स्यात्, यदा तु स्तम्भादिरपरा कोटिरस्ति तदा कथं तथा स्यादित्युक्तप्रसङ्गानवकाश इति। मैवम्। यथा घटतद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावाभ्यामन्या वस्त्रादिकमप्यस्ति कोटिस्तथा
ऽन्योन्यान्योन्याभावाभ्यां नान्यकोटिः सम्भवति
निर्व्विशेषणेऽन्योन्यमध्ये जगतएव प्रवेशात्
तदात्मनोऽपि निषिध्यमानत्वे तन्निषेधात्मक
तदात्मनि जगत्प्रवेशात्, न हि घटः पटात्मत्व
नेन घटस्वरूपादन्यस्तदात्मा विहितः स्यात्
यदि तु तादात्म्यं नामाभेदाख्यो धर्मः कश्चि
दिष्यते स घटपटाद्यधिकरणतया निषिध्य
तदा संसर्गाभावएव स्यात्। तस्मान्निर्विशेषे
तदात्मान्तर्भूतं जगदिति कोट्यन्तराभाव इति
अपि च एवं तर्हि घटे निषिध्यमाने घटाभाव
विधीयते घटाभावे च निषिध्यमाने घट इत्य
न स्यात् तृतीयस्याविद्यमानत्वात् भवन्वा घट
भावः स्तम्भो न भवतीत्यत्रापि घटाभावत्वा
शेषाद्विशेषान्तरानिर्वचनाच्च। घटः स्तम्भात्
त्वेवोक्तं स्यादिति त्वत्प्रसङ्ग त्वयि निपतेत्
संसर्गान्योन्याभाववैचित्र्यमादाय स परिहार
स एव च नाद्यापि व्यवतिष्ठते, अतएव प्रती
बलादन्यदेव वैधर्म्यमनयोरुपेयमित्यपि नि
स्तम्। प्रतिषेधप्रतिषेध्यविरोधे हि प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निश्चेव व्यवस्थानिरुक्तयुक्तोरविशेषणैकनिषेधे अन्यविधिध्रौव्यं भवदन्योन्याभावनिषेधेऽप्यन्योन्यविषये स्यात्। मम चानिर्वचनीयतेव प्रतीतिव्यवहारव्यवस्था पर्य्यनुयोगवाणवारणाय वज्रवारणायमाणा विजयते मम त्वेवं दर्शनं प्रतीतिसिद्धत्वादत्यन्तासद्विलक्षणमभवदपि जगत्तथा सत्त्वोपगमे बाध्यमानत्वादनिर्वचनीयमिति। अत एव प्रतीयमानत्वाद्वैचित्र्यमनयोर्वर्ण्यमाणमतिदूरनिरस्तम्, प्रतियोग्यादिवैचित्र्यानुपपत्तितः प्रतीयमानस्यैव बाध्यताया एव कथनात्। तस्मात् "अन्योन्याभावसंसर्गाभावभेदव्यवस्थितौ सत्यां व्यावृत्तव्यवस्थेति स्वाश्रयं कश्चित्कित्वस्तु,। ननु स्मृतिलक्षणाभाव एव यत्वेति सावधारणं वक्तव्यमेवेति चेन्न, एवकारेण किमधिकमभिधीयते भावो निषिध्यत इति चेन्न, तस्याभावपदेनैव लब्धत्वात्, भावनिषेधोऽभाव इत्यनर्थान्तरमिदं, भावसामानाधिकरण्यनिषेध एवकारार्थ इति चेन्न, उक्तेनैव गतार्थत्वात्। अन्योन्याभावस्य च तस्य स्मृतावपि भावात्, न हि भावसामानाधिकरण्यं

CC-0. In Public Domain. Digitization by eGangotri

स्मृतिः, स्मृतौ च भावाभावं चैकत्वमन्यमानेन तस्याप्येष्टव्यत्वात्, तयोः परस्परप्रतिक्षेपरूपत्वात्, न हि रूपरसयोरेकत्वाभावेन तत्सामानाधिकरण्याभावः स्यात्, समाविष्टयोर्भावाभावयोः परस्परप्रतिक्षेपात्मकतैव न सिद्धेदिति चेत्तर्हि तथाविधयोर्भावतदभावपदसङ्केतनं रूपरसयोरिति कश्चित्ते प्रमाणं, रूपरसयोः परस्परप्रतिक्षेपानात्मकत्वात्तदभावे तयोः सामानाधिकरण्यभाव आस्ताम्, अत्र तु नैवमिति चेन्न, तथात्वस्या, सामानाधिकरण्यप्रयोजकत्वे तद्व्यतिरेकः सामानाधिकरण्यप्रयोजकः स्यादिति रूपरसादीनामसामानाधिकरण्यापत्तिः, भावाभावयोरसामानाधिकरण्यानुपपत्तिश्च। असामानाधिकरण्यमेव यत्नेति विवक्षितमिति चेन्न, एवकारार्थदौर्वस्थ्यात्, एतेन विलक्षणएवायमभावोभावसहासनानुपवेशो एवकारसमभिव्याहारेणोच्यत इति निरस्तं, तस्यापि वैलक्षण्यं प्रतियोग्याश्रयनिवेशितासाम्येपि सामानाधिकरण्य विरहादुन्नेयं तच्च तुल्यमभावान्तरेण सामानाधिकरण्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावप्रत्ययेनेति चेन्न, प्रत्ययविशेषकस्यार्थस्य स्मृतावपि भावात्। अन्योन्याभावव्यतिरिक्तः स्मृतित्वाभाव इत्युक्तौ च स्मृतिव्यतिरिक्तपक्षोक्त एव दोषः तदा स्तां विस्तरः। नापि स्मृतित्वप्रतियोगिकमाश्रयस्य स्वरूपं तद्धीर्वेति पक्षः। अन्योन्याभावेऽपि भवतामभावव्यवस्थायास्तादृशत्वेनोक्तप्रसङ्गस्य समानत्वात्। अथान्यदेव किञ्चित्संसर्गाभावनिर्वचनं क्रियते, तथा हि स्मृतित्वस्य यत्र संसर्गितया निषेधस्तत्र तदभावस्य संसर्गाभावत्वं, यत्र तु तदात्मत्वेन तत्र तदभावस्य न संसर्गाभावता किन्त्वन्योन्याभावत्वमेव, स इह न विवक्षितः पूर्वोक्तएव तु संसर्गाभावोविवक्षित इति नैतद्विचारसहं संसर्गितया निषेध इति येयं तृतीया सा लक्षणे वा सहयोगे वा कारकभेदे वा करणादौ। नाद्यः; संसर्गितया लक्षितस्यैवान्योन्याभावमादाय प्रसङ्गात्। नापि द्वितीयः, तत्सहितस्यैवान्योन्यनिषेधस्य प्रत्याख्यातुमशक्यत्वात्। तृतीयस्तु न सम्भवति, अत्यन्तनिषेधस्यानुत्पत्तिधर्मकत्वात्। तस्य च प्रकृतोदाहरणत्वात् प्रकारवाचिनीयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयेति चेन्न, प्रकारशब्दार्थस्याधिकस्य नि-र्वक्तव्यत्वापातात्। प्रकारः प्रकार एवेति चेन्न अविदितलक्षणस्य लक्षणमनभिधायेतरव्यव-च्छेदेन तस्य दर्शयितुमशक्यत्वात्, अन्यथा स-र्वत्र प्रष्टारं प्रति लक्षणानभिधानापातात् को घट इत्यापृष्टे घट इत्येवोत्तरं सङ्गच्छेत, प्रकार इति पक्षोनोपपन्नः सदोषत्वादिति वक्ता को दोष इत्यभिधायैव च निवृत्तोऽभवेदिति। स्मृ-तित्ववत् स्मृते र्लक्षणान्तरेण रहितत्वमनुभू-तित्वमिति प्रत्युक्तं वेदितव्यम्। गृहीत ग्राहि ज्ञानं स्मृतिरिति च स्मृतिलक्षणे धारावाहिक-ज्ञानेऽति प्रसक्तिः। सापेक्षं ज्ञानं स्मृतिः, सापे-क्षता च स्वविषयानियमे समानविषयज्ञाना-पेक्षतेति चेन्न, प्रत्यभिज्ञायां तत्ताभागस्य स्मृतित्वापत्तेः, एवमस्त्विति चेत्तर्हि प्रत्यभि-ज्ञायां स्मृत्यनुभवभागयोर्भिन्न विषयत्वव्यव-स्थितौ तद्भेदः केन गृह्यतेति। संस्कार-मात्रजं ज्ञानं स्मृतिरित्यपि न, सामग्रीतः सर्व-सम्भवेन लक्षणस्यासम्भवात्। असाधारणत-द्धेतुकधीत्वमिति चेन्न, आत्मप्रत्यभिज्ञानेऽव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्तेः, आत्ममनोयोगस्यासाधारण्यात् । कार्य्यै-
क्यानवधारणे च कारणत्वानवधारणात् तदैक्ये
च तदेव लक्षणं स्यात् येन ज्ञानेनार्थो ज्ञातता-
त्मकः क्रियते, तदनुभवः येन तु ज्ञातता तथा
तत्स्मरणमिति चेन्न, ज्ञातोज्ञास्यते चेत्यनुमा-
नादावव्याप्तेः । ततश्च विषयतः स्मृतिविशे-
षणमन्ततोवाक्येनाप्यनुभाव्यत्वात् कार्य्यकार-
णाभ्यां चानुगतस्वरूपस्य प्रागसिद्धेर्जातितश्च
सङ्करप्रसङ्गादशक्यमिति । नापि चतुर्थः, यतः
कार्य्यगतवैलक्षण्यानवगमे क्व कारणता क्वासा-
धारण्यं वा ज्ञेयमिति न केवलं प्रत्येकं पदा-
र्थस्य तद्व्यवच्छेदकत्वस्य चानुपपत्तेर्मिलितेऽप्य-
स्मिन् लक्षणे दूषणमुच्यते, तथा हि तत्त्वानु-
भूतिः प्रमेत्यनेन काकतालीयमपि यथार्थं ज्ञानं
व्याप्यते, तद्यथा पाणौ पञ्च वराटकानपिधाय
कश्चित् पृच्छति कति वराटका इति, पृष्टश्च
अजाकृपाणीयन्यायेन ब्रवीति पञ्चेति, ततश्च
पञ्चेति ज्ञानमस्ति वक्तुः श्रोतुश्च दृश्यन्ते ताव-
देवम्विधान्युदाहरणानि । तच्च ज्ञानं न यत्त्व-
पदेन व्यवच्छेत्तुं शक्यम् । वस्तुतस्तस्य पञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संख्यावच्छिन्नत्वेनातथाभूतत्वाभावात्। नाप्यनुभवमवच्छेद्यमननुभूतचरत्वेन स्मरणलक्षणोपेक्षणात्। नच वक्तुः संशय एव निश्चायकाभावादेकतर कोटिव्यवहारस्तु कृष्यादिप्रवृत्तिवदिति युक्तं, तत्राप्याहार्यरूपैककोटिनिश्चयाख्यानादन्यथा संशयस्य कोटिद्वयसमुच्चयतापत्तेः। नच प्रमैव तदित्युत्तरीयैकरणीयं मध्येऽप्यक्षादिदुरन्तभावत्वात्। अव्यभिचारकारणत्वे सतीति विशेषणीयमिति चेन्न तत्त्वपदवैयर्थ्यापातात्, काकतालीयसंवादमपि ज्ञानं न व्यभिचारि,साधारणकारणसामग्रीजन्यख्यातुमीशिषे व्यभिचारिणोपि कारणाविशेषादयथार्थत्वप्रसङ्गात्। नह्यहेतुकमेवास्य यथार्थत्वं,नियामकाभावेनातिप्रसङ्गापातात्। अवश्यमस्याव्यभिचारित्वे अव्यभिचारि नियतमेव कारणं वक्तव्यं किन्तदिति चेत्, स्वात्मनैवा-प्रश्ने दीयतामुत्तरम्भवता,येन नियतेषु प्रमाराशिषु चेदं ज्ञानमन्तर्भाव्यं प्रमासामान्यलक्षणेन वा व्यवच्छेत्तव्यम्,एवं लिङ्गाभासादिभ्योऽपि जातं लिङ्गिज्ञानं दैवगत्याश्रितलिङ्गलिङ्गि-

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गमत्येव वा यत्स्यात्तद्यद्यपि लिङ्गाभासे न प्रमा न वा तद्वति लिङ्गिस्वरूपे, तथापि विशिष्टं तथाविधं गोचरयन्त्यास्तस्या बुद्धे लिङ्गान्तरवति केवले वा लिङ्गिनि वह्न्यादावाप्यंशे विषये प्रामाण्य स्वीकारेणोक्तदोषापरिहारादिति। आभासकरणजत्वात्तद्विषयस्य वस्तुभूतालिङ्गादेरन्यत्वमेवेति चेन्न, विशेषस्यान्यत्वेपि तज्जातीयमात्रवत्ताप्रभासांशे दोषापरिहारात्। सामान्यसम्बन्धकोटिनिविष्टत्वात् विशेषस्य, तस्य च तत्राश्रितस्यैव स्फुरणान्नैष दोष इति चेन्न, विशेषाप्रतिभासे सामान्यतस्तन्मात्रवत्ताप्रतिभासस्याप्यभ्युपेयत्वात्, देवदत्त यज्ञदत्तसम्बन्धितासंशयेपि पुरुषसम्बन्धितानिश्चयवत्सम्बन्धिविशेषस्य निर्लुठितविशेषरूपतया च प्रवेशे व्याप्त्यादेरननुगमप्रसङ्गात् सामान्यानुमानाभावे च संवादिति विशेषान्यतानन्ताकल्पनानवकाशात्। सामान्यासमवाययोरप्यन्ययोरेव प्रतिभासे चान्यथाख्याति विरहाद्वा सत् ख्यातिप्रवेशापातात्। तत्रत्यधर्म्यन्तरस्य जात्या तादात्म्यारोप स्तत्रेति चेन्न तथापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मिणि जातौ च प्रमात्वतादवस्थ्यात् संसर्गा
रोपनिमित्ताच्च तादात्म्यारोपानुपपत्तेः पदार्था
नुमानाभासे हि प्रतिपादितपदार्थसंसर्गारोप
कारणसम्भवात्तथापि तत्र तादात्म्यारोपकल्पने
च तयाभ्रमनियमस्य निष्प्रमाणकत्वात् कस
चित्तत्रजात संवादजातिसंसर्गभ्रमस्य मिते
का गतिः का वा गतिः सिद्धसाधने तत्राप्यत्यल
कल्पनायां सिद्धत्वव्याघातात्। तत्त्वे च हेत्वा
भासस्यापि यथार्थग्राहितयोक्तनिमित्तस्य व्यभि
चारेणान्यथाप्याभासेऽन्यप्रतिभास कल्पनाय
निर्निमित्तत्वात्। सिद्धसाधनमितेरेव वा व्यव
च्छेदात् यथार्थानुभवः प्रमेत्यप्यलक्षणं यथार्थत
हि तत्त्वविषयत्वं वा अर्थसदृशत्वं वा स्यात्
नाद्यः पूर्वनिरस्तत्वात् नापि द्वितीयः व्यभि
चारिणोपि प्रमेयत्वादिनार्थसादृश्येन प्रमा
त्वापातात्। ननु ज्ञानविषयीकृतेन रूपे
सादृश्यमिदं विवक्षितं न च प्रमेयत्वादिरूपे
व्यभिचारिण्यपि प्रकाशनसम्भवेन तथाप्यति
प्रसङ्ग इति वाच्यं प्रमेयत्वाद्यंशे प्रकाशमा
विषयीभूतधर्मान्तरापेक्षया व्यभिचारिणोपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमात्वाभ्युपगमादिति। नैतदुक्तं प्रकाशमानेन रूपादिसमवायित्वेन रूपेण ज्ञानस्यार्थसादृश्यानभ्युपगमेपि तत्र तदीयप्रमात्वाङ्गीकारादिति। प्रकाशमानरूपेण विशेषणभावादर्थसादृश्यमनुभवस्य विवक्षितम् अर्थस्य हि यथा समवायाद्रूपं विशेषणीभवति तथा विषयभावात् ज्ञानस्यापि तद्विशेषणं भवत्येवेति चेन्न एवं हि पुरोवर्त्तित्वादिना रूपेण तथाभावसम्भवात् पुरोवर्त्तिनीं शुक्तिं रजततया गाहमानं ज्ञानं प्रमा स्यात्। नच वाच्यमिष्यतएव सा प्रमापीति न व्यभिचारचोदनेयं युक्तिमतीति यथार्थताविशेषणवैयर्थ्यप्रसङ्गात्। अनुभूतिः प्रमेत्युक्त एव हि तावन्नास्त्यतिप्रसङ्गः सर्व्वस्य व्यभिचार्य्यनुभवस्यान्ततोऽन्यथाख्यातिवादिनये धर्म्मिण्यपि प्रमात्व सम्भवेन प्रमायामेवानुभवत्वस्य स्थैर्य्यात्। यदि त्वंशतोपि व्यभिचारि प्रमाणलक्षणं स्यादिति चेतसि निधाय यथार्थत्वं विशेषणं प्रयुक्तं तदा न युक्तमुक्तदोषात्। अथोच्यते प्रकाशमानेन रूपेण सर्वेण विशेषणभावाद्यस्यानुभवस्यार्थसादृश्यं सा प्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न च तावता धर्म्मिणो धर्म्मविशेषणतया दोष
तस्यापि तद्विषयान्तरव्यवच्छेदकत्वादिति तदि
व्यभिचारिज्ञानं धर्म्मिण्यपि प्रमाणं स्यात्सर्वा
त्मना तादृश्या भावात् अव्यभिचारिण्यंश
मननुरुध्य तदीयप्रतिकोटिनिक्षेप साहसि
स्यादबिभ्यता किमव्यभिचार्य्यंशानुरोधेन व्यभि
चार्य्यंशस्यापि प्रमाकोटिनिवेशनमेव नाध्यव
सीयते भवता शक्यन्ते ह्यनुभूतित्वज्ञानत्वादय
तादृशाभिप्रायाविरोधिना लक्षणीकर्त्तुं यदि
बाध्यधीर्धीशा धीरबाध्यार्थांशेषप्रमैव तदा सौ
भाग्यकुम्भादिवद्दूरत्वात्तुहिनद्युतिविद्युदादिपर
भागाग्रहणादवयविनाञ्च तावत्परिमाणाग्रह
णादल्पपरिमाणमुल्लिखन्त्यपि प्रमात्वेन लोक
प्रसिद्धमप्रमा स्यात्। अथ लब्धं देशकालालो
कादिव्यक्तिसहितजलादिज्ञानस्य समस्ततार-
दर्थप्रवृत्तिसामर्थ्योदाहरणं येन तदप्रामाण्य
मन्यसे। यदि च बाध्यार्थांशे बाधादबाध्येऽप्यंशे
तद्बोधविषयत्वं समर्थयसे तदा तदर्थजातीयं
बाध्यं तदर्थजातीयबाध्यमपि मिथ्येति मन्यमाने
किमुत्तरं ते स्यादन्यत्र लोकप्रसिद्धप्रमोदा-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दरत्वत्यागात्। यथोच्यते प्रकाशमानेन रूपेण विशेषणतया यदर्थसाध्यमनुभवस्य तत्र प्रमात्वमिति विषय विशेषनियमेनैव प्रमात्वं लक्षणीयमित्येतदर्थमेव यथार्थविशेषणोपादानमिति। मैवम्। विशेष्यांशे अनुभूतिरेवं प्रमा न स्यादिति व्यवच्छेदकत्वं विशेषणत्वमभिमतं धर्म्यपि च स्वसम्बन्धाद्धर्मान्विशिनष्टीति नोक्त दोष इत्युक्तमेवेति चेन्न विशिष्टे प्रमात्वाभावापत्तेः। अपि च एवं तर्हि रजतत्वादिकमपि व्यवच्छिनत्त्येव शुक्तिकां रजततया प्रकाशिता शुक्तिव्यक्तिः शेषमिति। ननु साक्षाद्विशेषणत्वं विवक्षितं रजतत्वं तु ज्ञानद्वारा शुक्तिविशेषणमिति नातिप्रसङ्गः। मैवं तर्हि दीर्घदण्डः पुरुष इत्यादौ ह्रस्वदण्डादिभ्यो वैलक्षण्येपि विशेष्यस्यानुभूयमानेऽनुभूते न प्रमात्वं स्यात् दीर्घत्वादेर्दण्डादिद्वारा विशेषकत्वादिति ज्ञानरूपद्वारानपेक्षतया विशेषणत्वमिष्टमिति चेन्न साक्षात्कृत इत्याद्यवगमानामप्रमात्वापातात्। तज्ज्ञानप्रकाशितरूपेण विशेषणत्वमिष्टमिति तु दूरतस्तुच्छं रूपादेः समवायेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानाविशेषकत्वात् अर्थविशेषणत्वेऽयं नियमे यत्तज्ज्ञानप्रकाशितेन रूपेणेति न तु ज्ञाने ऽपीति चेन्न तज्ज्ञानव्यक्तेरन्यत्रासम्भवेनासा धारण्यादव्यापकत्वादित्यलम्।

सम्यक्परिच्छेदः प्रमेत्यपि न युक्तं न खा सम्यक्त्वं तत्त्वविषयता याथार्थ्यं वा सम्भ त्युक्तदोषात्। ननु साकल्यं सम्यक्त्वमिष्टम् अभि धीयते हि लोकेन मया सम्यक् दृष्टं सामान्या कारेण तूपलब्धमिति तदिह समीचोऽर्थस परिच्छेदः सम्यक्परिच्छेदः सम्यगर्थविषय त्वाद्वा सम्यक्शब्दः परिच्छेदसमानाधिकर एवायमिति। नैवम्। साकल्यमर्थस्य किं सर्वा यवसहितत्वमथवा सर्वधर्मसहितत्वम्। नाद्य अनवयवपदार्थपरिच्छेदस्यैव सावयवपदार्थ परिच्छेदस्यापि मध्यभागाद्यविषयस्याप्रमात्वा पातात्। नापि द्वितीयः असर्वविल्परिच्छि त्तीनां सर्वासामप्रमात्वापत्तेः। अथ मन्य सम्यक् शब्द सविशेषार्थः यदपि लोकेऽभिधी यते न मया सम्यक् दृष्टं तस्यापि न मया वि शेषतो दृष्टमित्यर्थः तस्माद्विशेषसहितधर्मिपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छित्तिः प्रमेत्युक्तम्भवति । विभ्रमादयो हि
विशेषमपश्यतो जायन्त इति तद्व्यावृत्त्यर्थं वि-
शेषणमिदं विशेषाणाञ्च सर्वेषां विशेषान्तरा-
नभ्युपगमेऽपि स्वरूपमेव केषाञ्चिद्विशेष इति ।
नैतद्युक्तं विशेषपदेन विशेषमात्राभिधाने रज-
तत्वादिना विशेषेण सहैव शुक्तिव्यक्त्यादे-
र्धर्मिणोऽवगाहनात् तस्यापि प्रमात्वं स्यात् ।
प्रत्यर्थं व्यावृत्ताकाराणाञ्च विशेषाणामुपादाने-
ऽननुगमप्रसङ्गात् सामान्यतश्चातिप्रसङ्गात् उभ-
यथाप्यसङ्गततापत्तेः विशेषस्य च भवतु स्वरूप-
मेव विशेषस्तथाप्यभेदादेव विशेषसहितत्वं
नास्तीत्यव्याप्तेरपरिहारात् । यत्तु कश्चिदवो-
चत्कश्चिदर्थो विशेषशब्देनाभिधीयते यद्दर्शने
भ्रमसंशयावकाशो यद्दर्शने च बाधव्यवस्था तद-
नभ्युपगमे तत्त्वातत्त्वविभागो न स्यात् भवि-
तव्यञ्च तेनान्यथा व्याघातादिति । यदयुक्तं न
तावदेवंविधो विशेषोऽभिधातुं शक्यो यदव-
गमस्य न भ्रमत्वादिसम्भवः स्वप्नदृशः सर्वविशे-
षोपलम्भसम्भवात् । न च व्याघातदण्डभय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातादृशावुपपादयितुमशक्योऽप्यभ्युपगन्तव्य इ-
युक्तं तदुपदर्शनाशक्यत्वेन व्याघातपरिहार ए-
कश्चिदन्यो निर्वक्तुमशक्योऽस्तीत्येव तदा किं
व्यवस्थाप्यते न हि परिदृश्यमानपदार्थगोचर
तदस्ति किञ्चिदनुभूयमानं यत्स्वप्ने वा वाक्या-
भासे वा प्रतिपत्तुमशक्यमिति प्रतिपत्तराकू-
तथा चेयमप्रतीयमानकल्पना ततोवरमनुप-
लभ्यमानस्य व्याघातपरिहारस्यैव कल्पना अप्र-
बङ्गाशश्च व्याघातोद्भावनविभीषिकाप्युन्मूलयि-
ष्यामः । ननु भो विशेषणसहोपलम्भो विशेष-
सहितोपलम्भ इति किन्नाम विशेषणसहितस्य
पदार्थस्योपलम्भस्तथा च न शुक्तौ रजतत्व
विशेषोऽस्ति तत्कथं रजतभ्रमेऽपि तत्प्रसङ्ग
इति । मैवम् । उक्तदोषेणैव निरस्तत्वात्
यदि हि विशेषस्य सामान्यतोऽभिधानं तदा
शुक्तेर्वर्त्तित्वादिः सत्त्वात् प्रसङ्गसत्त्वनिवारणम् ।
विशेषतस्तदभिधाने त्वननुगम इति बाध्यबाध-
व्यवस्थाहेतुरस्ति विशेष इति पक्षं यस्तु जड-
तरो न जहाति स भ्रमाभ्रमाभ्यां वाक्याभ्यां नदी-
तीरे पञ्चफलानि सन्तीत्येवं रूपाभ्यां प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाद्यमानेऽर्थे स्थितं किं विशेषमेकत्र पश्यसि यमपरत्र न पश्यसीति पृष्ट्वा प्रतिबोधनीयः तथाप्यनुपजातप्रबोधस्तु जडतमः कश्चिद्यदि स्यात् स एवं प्रबोध्यः ये ते विशेषान्तरप्रवाहस्वीकारेऽनन्तविशेषापत्तिभयात् त्वया स्वत एव विशेषरूपा इति स्वीकृताः तेषां स्वरूपं तावत् परस्परव्यावृत्तमतोऽनुगतैकरूपाभावादव्यापकत्वं स्यादिति। बाधव्यवस्थाहेतुत्वादेवानुगतिरिति चेन्न क्वाचित्कबाधव्यवस्थाहेतोर्भ्रमेऽपि प्रकाशात्। तत्र तस्येति चेन्न व्यावृत्तेर्बोधस्य च तद्विपरीतार्थप्रमात्वेन तदर्थाननुगमात् प्रमायाश्चाद्याप्यव्यवस्थापनादिति शङ्कान्तराणि चात्रातःपराणि याथार्थ्यविशेषणदूषणदूषितान्येवोपनिपतन्तीति द्विरभिधानभयान्नोक्तानि। किञ्च तर्कज्ञानमाहार्य्यौ च संशयविपर्य्ययौ परिदृश्यमान एव विशेषे भवन्ति तैरतिप्रसङ्गः स्यात् नचाहार्य्यौ तौ नाभ्युपगन्तव्याविति युक्तं विप्रलम्भकस्य वाक्यप्रयोगमूलतयाहार्य्यभ्रमस्य ज्ञाततत्त्वस्य च गुरोः शिष्यप्रबोधार्थं विचारं प्रवर्त्तयतश्चाहार्य्यसंशयानां भवत एव शङ्के-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनुमतत्वात्परिच्छेदः शब्दस्यानुभूतिपर्य्यायोऽनुभूतिदूषणं नातिक्रामतीत्यलम्।

नाप्यव्यभिचार्य्यनुभवः प्रमेति युक्तम् अव्यभिचारिपदस्य यदि तत्त्वविषयाद्यन्यत्वं तदा दूषणान्युक्तान्येवानुवर्त्तन्ते। अथेदमुच्यते अव्यभिचारित्वमर्थाविनाभूतत्वं तदा प्रष्टव्यं कोऽस्यार्थः किं यदैवार्थस्तदैव ज्ञानम् उत यत्रार्थस्तत्रैव देशे ज्ञानम् अथ यादृगर्थस्तादृगेव ज्ञानं यत्तत्प्रमितिरिति। नाद्यः अतीतानागतानुमित्याद्यव्यापनात्। न द्वितीयः ज्ञानासमानदेशार्थप्रमितीनामव्यापनात् ज्ञानसमानदेशमर्थमन्यत्रारोपयतोऽप्यनुभवस्य प्रमात्वापत्तेः। नापि तृतीयः ज्ञानार्थभेदवादे सर्वाकारेण तत्साम्यानुपपत्तेः। अभेदवादे तु भ्रमस्यापि तथाभ्युपगन्तव्यत्वप्रसङ्गेन विशेषणवैयर्थ्यापातात् तैस्तैश्च विशेषैः सादृश्यस्य विवक्षितत्वे यथार्थताप्रस्तावोक्तान्येव दूषणान्यावर्त्तन्त इत्यलम्। अविसम्वाद्यनुभवः प्रमेत्यपि न युक्तम् अविसंवादित्वं हि ज्ञानान्तरेण तथैवोल्लिख्यमानार्थत्वं वा ज्ञानान्तरेण विपरीत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा अप्रतीयमानार्थत्वं वा अप्रतीयमान व्याप्यविषयत्वं वा अन्यदेव वा किञ्चित्। न प्रथमः धारावाहिनो भ्रमस्य प्रमात्वप्रसङ्गात्। नच प्रमाभूतं ज्ञानान्तरं विवक्षितमिति वाच्यं प्रमाया एव लक्ष्यमाणत्वात् नापि द्वितीयः अजातबाधभ्रमव्यापनात् सुखदशोत्पन्न शुक्लशङ्खज्ञानादेर्दुष्टेन्द्रियदशोत्पन्न तत्पीतिमज्ञानाद्युल्लिखित विषयवैपरीत्यस्याप्रमात्वप्रसङ्गाच्च। प्रमित्यानुल्लिखितार्थवैपरीत्यभावविवक्षायां तु प्रमाया एव लक्ष्यमाणत्वादित्युक्तमनुषजति। अदुष्टकरणकज्ञानेनाबाधितत्वं विवक्षितमिति चेत्तदेव तर्हि प्रमालक्षणमस्तु। किञ्च दुष्टत्वनिरूपणमन्तरेणादुष्टत्वस्य दुर्निरूपत्वात्। ननु किमेतावता दुष्टत्वं विपरीतज्ञानप्रयोजकस्तद्धेतुगतो विशेष इति सुवचमेवेति न विपरीतपदव्यवच्छेद्यायाः प्रमाया अप्रमितौ सत्यां प्रमितौ तदुपादानवैयर्थ्यात्। तदनुपादाने च ज्ञानजनकत्वमात्रं दुष्टत्वमित्यदुष्टकारणजं ज्ञानं नास्त्येवेति स्यात्। विपरीतव्यवच्छेद्या प्रमैवेति चेन्न तस्या एव लक्ष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणत्वात् तदीयस्वरूपस्येतरव्यावृत्तस्याद्याप्रतीतेः कुतो व्यवच्छेदः प्रत्येतव्य इति व्यवच्छिन्नतज्ज्ञानमन्तरेण व्यवच्छिन्नतज्ज्ञानमशक्यमित्यात्माश्रयान्योन्याश्रयौ अनवस्था वा "एकोऽनेकविशेषेऽर्थे विशेषो यत्र लभ्यते तद्विशेषान्तरान्यत्वाद्दोष स्तत्रैव धावति।" नापि तृतीयः व्याप्यशब्देन व्याप्यमात्रं तद्विशेषो वा कश्चिदभिप्रेतः स्यात्। आद्ये सधूमाग्निविषयस्य स्वप्नज्ञानस्यानाप्तवाक्यजबोधस्य वा नाप्रमात्वं स्यात्, नापि द्वितीयः ह्यर्थक्रिया वा सामग्री वा उभयथापि पूर्वदोषानिवृत्तेः। एकदा च सर्व्वत्र प्रमाणासम्भवेन क्रमाश्रयणे तत्तदर्थक्रिया तत्सामग्रीपरम्परावगमनियमाभ्युपगमे एकस्मिन्नेव विषये पुरुषायुषः पर्य्यवसानप्रसङ्गात् विच्छेदाभ्युपगमेत्वन्तिमावगमस्याप्रामाण्यादाप्रथमप्रमात्वापत्तेः। वास्तवतदर्थक्रियार्थत्वस्य च दुर्निरूपत्वेन व्यवहारानर्हत्वात् तथाप्रतीतिमात्रस्य प्रमासाधारण्यात्। नन्वेवं चतुर्थः पंचमो वा तथा हि अर्थक्रियाकारिविषयत्वं वा विसंवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्वमिति यथाह प्रमाणमविसम्वादि ज्ञानमर्थक्रिया स्थितिश्चाविसम्वाद इति न सामान्यतो विवक्षायां भ्रान्तावपि प्रसङ्गात्। प्रतीयमानरूपेणार्थक्रियाकारित्वमर्थस्य विवक्षितमिति चेन्न दुरवधारणत्वात्। तदर्थक्रियादर्शनात्तदवधारणमिति चेन्न विनाप्यर्थक्रियां तद्दर्शनसम्भवात्। अर्थक्रियाप्रमितिरभिधित्सितेति दूषितमेव प्रमाया एव निरूप्यमाणत्वात् अभिप्रायाविसम्वादात्प्रमाणं सर्व्वमुच्यत इति चेन्न तदा अभिप्रायाविसम्वादस्य स्वप्नादिष्वपि सम्भवात् कालान्तराविसम्वादस्य च दुरवधारणत्वात्। एतेन प्रामाण्यादियोग्यताविसंवादार्थ इत्यपि निरस्तं दुराबाध इव चायं धर्मकीर्त्तेः पन्था इत्यवहितेन भाव्यमिहेति। अबाधितानुभूतिः प्रमेत्यपि निरस्तं तदानीं बाधविरहस्यातिप्रसञ्जकत्वात् कालान्तरेपि च बाधविरहस्य दुर्निरूपत्वात् स्वतो बाधविरहस्यातिप्रसञ्जकत्वात् सर्व्वजनबाधविरहस्य च दुरवधारणत्वादिति। तर्कसंशयविपर्य्यय स्मृतिव्यतिरिक्ता प्रतीतिः प्रमेत्यपि न, स्मृति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यतिरिक्तखण्डनन्यायेन निरस्तत्वादिति
जातिसङ्करमिच्छतस्तु प्रमात्वलक्षणजात्यभि
सम्बन्धात् प्रमेत्यपि दुर्लक्षणम् अस्याज्ञातत्
तद्व्यवहारजनकत्वे प्रमायामप्रमात्वभ्रमसंशयौ
स्यातां दोषाभावसहकृतस्य तथात्वे चानाश्
मान भ्रमसंशयप्रमादिव्यवहारे ज्ञानमात्राश्र
ग्रमोदाहरणेऽपि तदापत्तेः। ज्ञातेन लक्षणेन
व्यवहारे च कथमिदमेव ज्ञातव्यमिति वक्त
न तावत्प्रत्यक्षेण मानसेन तथा सति क्वचिज्ज्ञा
तायां प्रमायामप्रमाविपर्य्ययसंशयानवकाशा
स्याद्धर्म्मिवत् मनसैव निर्णीतत्वात् चिह्नान्त
रापेक्षेण च मनसा सम्वेदनं चिह्नेनैव वा
गतेन लक्षणीभूय ज्ञापनमित्यपि प्रत्याशास्य
तच्चिह्नेनैव प्रमात्वजातिकल्पनाप्रतिक्षेपापत्ते
तेषां नानात्वे च कानि तानीति वक्तव्यं स्या
तच्चिह्नानां यथोपन्यासं सर्व्वेषामेव दूषितत्वा
प्रामाण्यपरतस्त्वव्युत्पत्तिप्रस्तावे तु विस्तरे
दूषयिष्यामः। एतेन शक्तिविशेषः प्रमात्वं
दोषः प्रमात्वलक्षणमित्यपास्तं दुरवधारणत्वात्
यच्च किञ्चित्प्रमाया लक्षणमुच्यते तदप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातमात्रं वा यदि तत्त्वव्यवहारकं तदा भ्राद्यापत्तिः प्रमितश्चेत्प्रमानवधारणे तदनवधारणता । माऽवधारि वस्तुतस्तु तथेति चेन्न वस्तुतो न तथैव किन्त्वेति वादिन्यनुत्तरापत्तेः प्रमात्वनिरूपण वैयर्थ्यापाताच्च । वस्तुतस्तु प्रमेय एव घटादितत्त्वव्यवहारोऽपि तद्धीस्त्वित्यास्तां विस्तरः ।

एवं प्रमितेरनिरुक्त्या प्रमाकरणं प्रमाणमित्यप्ययुक्तं करणार्थो निरुक्तश्च । ननु कारकान्तरेऽचरितार्थस्य हेतुत्वं करणत्वं कर्त्तुं हि करणं निष्पादयतः कारकान्तरे चरितार्थत्वं स्वरूपतोऽनिष्पादनेऽपि व्यापारवत्तया निष्पादनात् तादृशस्य च तस्य करणत्वात् एवं कर्मोपि करणनिष्पादने चरितार्थं करणव्यापारो हि कर्मविषयो भवति कर्माभावे विषयाभावात् करणव्यापार एव न निष्पद्येत इति तन्निर्वाहे तस्यापि चरितार्थत्वमिति । एवमधिकरणस्यापि करणव्यापारनिर्वाहकत्वं सम्प्रदानापादानयोस्त्वसार्व्वत्रिकत्वम् । करणन्तु सार्व्वत्रिकमेवेति कारकान्तरेऽचरितार्थः सार्व्वत्रिको-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतुः करणमिति। नैवम्। अस्तु तावदविचारितरमणीयमिदं व्याख्यानम् अन्तरशब्दो यदि विशेषमात्रवचनस्तदा न व्यवच्छेदकः न हि विशेषमपास्य कारकमात्रं केनचित् जन्यते यद्व्यवच्छिद्येत। नापि चान्तरशब्दोऽन्यवचनः तथा सति कस्मादन्यदिति विशेषानिर्देशे करणादिति समभिव्याहाराल्लभ्येत् यथान्य आत्मा शरीरमन्यदित्यादौ तथा सति करणव्यतिरिक्तकारकाभिप्रायेण प्रयुक्तः स्यात्। तच्च नाकरणस्यैवाद्यापि निरूप्यमाणत्वादतिव्याप्तेश्च। नापि कर्तृकर्मणोः स्वरूपोपादानपरोऽयमन्तरशब्दः ताभ्यामेवातिव्याप्त्यापत्तेः। नापि कर्तृकर्मणी अपेक्ष्यान्यदन्तरशब्दार्थः वैयर्थ्यापातात् कारके चरितार्थत्वमेवोच्यताम्। नाप्यनधिकार्थ एवायमिति न प्रयोक्तव्योऽन्तरशब्दः तथा सति करणजनकं हस्तादि न करणं स्यात् व्यापारवद्धि कारणं करणमुच्यते। अस्ति च स्थालीसंयोगादिव्यापारवतोऽन्यादेस्तथात्वम् अस्ति च हस्तादेस्तज्जनकत्वम्। नच हस्तादः करणमेवाभ्युपेयं व्यापारवतः कारणत्वेन तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारकत्वस्यावश्याभ्युपेयत्वात् कर्त्रादिषु दुरन्त-भावत्वात् सप्तमकारकस्वीकारापत्तेः। नच व्यवधानात्तत्ता हेतुत्वमेतेषां किं नाम हेतुहेतु-त्वमिति कर्त्तुरप्येवम्प्रसङ्गात्। पुंव्यापाराद्धेह-सन्दादि स्तेन कुठारक्रियादि स्ततश्छिदेति परम्पराव्यवधानात्। सर्व्वेयं कर्तृव्यापारपर-म्परा न तस्य हेतुतां हन्तीति चेत् तुल्यं त-स्मात् करणत्वेनावश्याभ्युपगन्तव्यहस्तादिव्या-पकत्वादलक्षणमिदम्। एतेनापि कारकान्तर-शब्दः कर्तृकर्म्मव्यतिरिक्तवचन इति पक्षोव्यु-दासः। कर्तृव्यापारविषयः करणमित्यपि न शरीरचालनाय प्रयतमानस्य निष्पाद्या शरीर-क्रिया क्रियाविशिष्टं वा शरीरं प्रयत्नलक्षण-कर्तृव्यापारविषयीभवतीति तस्यां क्रियायां करणं स्यात्। नचैतत् शक्याङ्गीकारं, भविष्यतः सम्प्रति कारकत्वानुपपत्तेः। नच साक्षात्कर्तृ-व्यापारविषय इति विशेषोपादानेऽप्यस्य परि-हारः साक्षाद्व्याप्यमनः प्रभृतिक्रियायां प्रस-ङ्गतादवस्थ्यात् अव्यापकत्वाच्च। अथ तत्क्रिया हेतुस्तत्क्रियाकर्तृव्यापारस्य विषयस्तत्क्रिया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणमिति मन्यसे न अनीश्वरवादे अङ्कुरा
दीनामकरणत्वप्रसङ्गवत् सुषुप्त्यनन्तरभाविन्य
प्रमायाः परिगणितकरणोपाधिभेदपरिसंख्या
तेषु प्रमाणाभिषु वहिर्भावप्रसङ्गात् अचेतन
स्यापि कर्तृत्वे चातिप्रसङ्गात्। ईश्वरवादे
ऽपीश्वरव्यापारविषयः सर्व्वं करणमिति नाक
रणं कारणं स्यात् ओमित्यभिधाने च कारण
मात्रं व्यवच्छेद्यमिति कारणं करणमित्येव
च्यतां वृथा विशेषणपूरणप्रयासः। अथ मन्यसे
न धर्म्मान्तरव्यवच्छेदाय विशेषणानि किन्त्वे
स्यापि धर्म्मिणोरूपभेदेन करणपदाभिधे
तोपदर्शनायेति एवं तस्यैतद्रूपालिङ्गित
करणत्वाल्लक्षणोक्तिप्रवृत्तेन त्वया लक्ष्यमात्र
मुक्तं भवेत्। नच लक्ष्यपदप्रवृत्तिनिमित्तमे
लक्षणार्थः गन्धवत्त्वादेः पृथिव्याद्यलक्षणत्व
पत्तेः। अपि चैवं वस्तुमात्रं करणमित्यभि
धायैव किन्न करणपदप्रवृत्तिनिमित्तमुप
दर्शि। स्यादेवं यदि सर्व्वत्र वस्तुनि कर
व्यवहारः स्यादिति चेत् तर्हि त्वदुक्तलक्षणम
भवेत्। यदि सर्व्वत्र कारणे करणव्यवहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादित्यपि पश्य न हि कर्त्तरि कर्मणि वा कस्यचित्करणव्यवहारः कर्त्तरि तावदस्ति लोके प्रमाणमिह देवदत्त इति शास्त्रेऽपि मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यादितीति चेन्न किमयं माणवकेऽग्निव्यवहार इव गौणो मुख्य एव वेति संशये यदि त्वत्परिकल्पितान्निमित्तान्न मुख्यः स्यात्ततः कर्मण्यपि स्यात्तत एव निमित्तादिति बाधकदर्शनेन पारिशेष्यात् गौणतयैव तद्व्यवस्थापनाया युक्तत्वात् । अस्त्येव कर्मण्यपि तेन रूपेणेति चेन्न तावदयं शक्योपदर्शनोदाहरणः शास्त्रलोकयोः । क्व दृश्यते घटं पश्यतीत्यर्थे घटेन पश्यतीति यदि तु त्वच्चेतसि केवलं स्यात् तत्र च नादरं विधातुमुत्सहामहे । प्रमेयमात्रं करणमिति वदतो वामबुद्धेर्मनसि विपरिवर्त्तमानं प्रमेयमात्र एव करणव्यवहारास्तित्वमेवमनुरोद्धव्यं स्यादिति । घटेन पश्यतीत्याद्यनभिधानवशात्तत्प्रयोगो न हि सर्वं लाक्षणिकं प्रयुज्यत इति चेत् मास्तु तदभावे कोऽन्योऽस्ति तेषु करणव्यवहार इति वक्तव्यः स्यात् न चासौ शक्यदर्शन इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रियया अयोगव्यवच्छेदेन सम्बन्धि कार
मित्यपि न, तथा हि अयोगव्यवच्छेदो योग ए
पर्य्यवस्येदिति सम्बन्धेन सम्बन्धीत्युक्तं स्यादि
पौनरुक्त्यं, यदासम्बन्धीत्यनेन कालविशेषनि
यतसम्बन्धवत्तयाभिधीयते ततोऽन्यस्मिन्नपि
काले सम्बन्धिताऽयोगव्यवच्छेदपदेन विवक्षि
तेति चेन्न सम्बन्धीत्यनेन किं कालविशेषनि
यता सम्बन्धिताभिहिता येन कालान्तरेऽलब्ध
सम्बन्धिताभिधानाय पदान्तरमुपादीयते
अथोच्यते सम्बन्धीत्यस्य सामान्यतोऽभिधायिन
कालविशेषनियतं सम्बन्धमादायापि पर्य्यव
साने सार्थकत्वं भवत्येवेति कालान्तरेऽसम्ब
न्धितया व्यवतिष्ठमानं कर्त्तृत्वापि कारणं प्रस
ज्येत तद्व्यवच्छेदाय कालान्तरे सम्बन्धित
पदान्तरेणाभिधीयत इति मैवं तर्हि तेनापि
क्वचिदेव कालान्तरे यदि सम्बन्धिताभिधी
यते तदापि तस्य सार्थकता सम्बन्धि पदन्या
येन सामान्याभिधायिनो भवेदिति अतोऽपि
कालान्तरे सम्बन्धव्यवच्छेदाय विशेषणान्तर
मपि निवेशनीयं स्यात्। अथ यदा कदाचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दपि यो योगस्तस्य सर्व्वस्य व्यवच्छेदो विवक्षित इति तर्हि सम्बन्धिपद एवैषा विवक्षास्तु, क्षत-मधिकमुपादाय तद्विवक्षया। निषेधव्यवच्छेदेन सार्व्वत्रिकत्वलाभ इति चेन्न, निषेधव्यवच्छेदस्य विध्यनतिरेकार्थत्वेनाविशेषात्। तद्धर्मिकं सम्बन्धस्यासम्बन्ध्यसामानाधिकरण्यमयोगव्यवच्छेदेनेत्यनेनोच्यत इति चेन्न, तस्यापि तत्त्वकाले तत्तासत्त्वोपगमात्। सर्व्वदेति चेन्न, यद्येवं तत् किं करणासत्त्वकालेऽपि योग एव करणेन क्रियायाः, यावत्सत्त्वमिति चेत्तर्हि सम्बन्धीति व्यर्थं, यावत् सत्त्वमयोगव्यवच्छेदेन यद्विशिष्टमुपलक्षितं वा तत्करणमित्येवास्तु सम्बन्धीत्येव वा तया विवक्षितमित्युक्तमेव। अयमेवार्थः कयापि कुसृष्ट्या सम्बन्धिपदसार्थकता-मुपपाद्य यदि विवक्षितस्तदाप्युच्यते क्षत्तिकोदयक्रियाया रोहिण्यासत्तिरप्येवं करणं स्यात् अनन्तरभाविनस्तत्तुर्दशस्य नक्षत्रस्योदयं प्रति पूर्व्वभाविचतुर्दशसंख्यनक्षत्रास्तमयस्य च करणत्वं स्यात्। नचैवमेव युक्तं, यौगपद्येन कारणत्वानुपपत्त्या कारकत्वस्य दूरनिरस्तत्वेन करण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वस्य सम्भावनानारोहात्, नच तत्र सम्बन्धएव नास्ति व्याप्तेः स्वभावसम्बन्धात्मिकाया दूरपहतत्वात्। अथ कार्य्यकारणभावः सम्बन्धो विवक्षितः, न असामग्र्याः करणत्वापत्तेः। ओमिति चेत्, तत्किमोमित्यभिधायैव निवृत्तो भवान्, आकलितं किलास्माभिः सामग्र्यमपि करणमित्यत्र न श्रद्दधतः प्रणवपूर्व्विकां श्रुतिमेव काञ्चित्पठित्वा श्रद्धापयिष्यति भवानस्मानिति। इह न सामग्री कारणं किन्तु तदेकदेशोनानाभूतः प्रत्येकं तथा सामग्री तु यदनन्तरं कार्य्यं भवत्येवेत्येतावन्मात्ररूपेति चेन्न एतादृशस्य सामग्रीलक्षणस्य करणेपि सत्त्वात् करणस्यापि सामग्रीत्वाघातात् क्रियाविभागादौ च विभागसंयोगनाशादि प्रति तथात्वापत्तेः। यच्च प्रतिसामग्र्येकदेशं नियतप्रागभावादिकारणलक्षणमिष्यते तत्सामग्र्यमपीति कथं तदकारणता, प्राक्कालमन्तर्भाव्य सामग्री तादृश्यास्तु तस्याः प्राक्सत्त्वमेव नास्तीति चेन्न तत एव प्राक्कालस्याकारणत्वात्कारणसामग्र्यां तदनिवेशात्। अपि चैवं विवक्षितमपि करणं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यात् न हि यावत्सत्त्वं व्यापारवतोपि तस्य क्रियाजनकत्वं, क्रियाकाले क्षणमपि तदनुवृत्ति निषेधे प्रमाणस्य दुरुपन्यासतया संशयेनापि लक्षणसिद्धेः प्रत्युत चिरस्थिरकरसंयोगे स्पृश्ये स्पर्शप्रमाकरणस्पर्शनेन्द्रियसंयोगस्यैर्व्यस्य मन्तुमुचितत्वात्। यावत्सत्त्वञ्च करणमिति भाषायां सर्व्वस्मिन् तत्सत्त्वकाले कारणत्वमित्यर्थो, न च कारणत्वस्य नियतपूर्वकालसम्बन्धात्मकस्य क्वचित्काले सत्त्वं कालं प्रति कालान्तराभावादिति। अथ क्रियाया अयोगव्यवच्छेदेन सम्बन्धीत्यस्यायमर्थो यस्मिन् सति भवत्येव क्रियेति, कोऽस्यार्थः किं यस्मादनन्तरं क्रियोत्पद्यत एव, उत यस्मिन् वर्त्तमाने क्रियोत्पद्यत एव, उत यस्मादनन्तरं क्रिया तिष्ठत्येव, उत यस्मिन् वर्त्तमाने क्रिया तिष्ठत्येव। नाद्यः, सामग्र्याः करणत्व प्रसङ्गात्, हस्तादीनामकरणत्वप्रसङ्गात्, सुखदुःखादेः प्रमेयस्यापि प्रमाकरणत्वप्रसङ्गाच्च। नच प्रमेयमपि प्रमायाः करणं स्यादेवेति वाच्यं, तत्र तथा व्यवहारस्य कस्यचिदप्यसिद्धेः। नापि द्वितीयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पृश्येन सह स्थिरसंयोगस्य स्पर्शनेन्द्रियस्या-व्यापनात् तत्सत्त्वेऽपि व्यासक्तौ तेन प्रमानुत्पा-दनात्। नापि तृतीयः सामग्र्यादेः करणत्व-प्रसङ्गात् उत्पत्तेः स्थिरे करणत्वप्रसङ्गाच्च। नापि चतुर्थः सहस्थायिनः करणत्वप्रसङ्गात्। अथ क्रियया अयोगव्यवच्छेदेन सम्बन्धित्वं करणत्वमित्यस्यायमर्थः व्यापारवतः फलाव्य-भिचारित्वमिति। मैवम्। हस्ताद्यव्यापनात् कस्यायं तद्व्यापारो नाम किं तज्जन्यं कारणम् उत तदाश्रयं कारणम्। नाद्यः लिङ्गपरामर्श तदसम्भवात्। पक्षे प्रथमधूमादिदर्शनस्य व्याप्तिस्मृतिद्वारा द्वितीयलिङ्गपरामर्शव्यापारं जनयतः करणत्वमेष्टव्यम्। एवञ्च परमार्थतो-व्याप्यस्य स्वरूपेण प्रमिति द्वितीयव्याप्तत्वपरा-मर्शव्यापारकानुमानमिष्यत इति चेन्न, अन्यतो ज्ञाताग्निधूमादिव्याप्तिस्मृतौ सत्यां पक्षगतप्र-थमधूमादिदर्शनस्य तद्व्यापारकत्वासिद्धेः। तता-प्युभयकर्मजसंयोगवत्तदपि कारणमिति चेन्न अभावादिसापेक्षविशिष्टप्रतिपत्तिवत् प्रागुप-जातवह्निव्याप्तधूमस्मृतेः प्रथममपि योऽसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वह्निव्याप्तः सोऽयं धूम इति परामर्शोपपत्तेः । नित्यसापेक्षेऽर्थेऽस्तु तथा, नान्यत्र प्रथमं तथेति चेन्न, प्राक्तनकारणोपपत्तौ नान्यत्रैवमिति नियमे प्रमाणस्याभावात् तस्य व्यापारभावान्नानुमित्युत्पादकत्वमेवेति चेत् स्यादप्येवं यदि व्यापारवतः करणमित्येव सिद्धं स्यात् तत्र धूमादिनिर्व्विकल्पकस्य तद्व्यापारकस्य करणत्वमिति चेन्न, नित्यसङ्घटितार्थवह्निनापि निर्विकल्पकं सविकल्पकोत्पत्तेरविरोधेन त्वदुक्तप्रक्रियानियमे प्रमाणाभावात् । नित्यसङ्घटितेपि निर्व्विकल्पकं संस्यत इति चेन्न, कारणान्तरादेव तदुपपत्तौ तत्र निर्व्विकल्पककल्पनायां प्रमाणाभावात्, प्रत्युत तत्सङ्घटनस्य स्वभावानतिरेकोपगमात् । तथापि यत्किञ्चित्तज्जनकं तदेव तत्रानुमितिकरणमास्तामिति चेन्न, तथेन्द्रियादेरनुमितिकरणत्वापत्तेरित्यलमतिप्रसरेणेति । शब्दश्रोत्रसन्निकर्षस्य च श्रोत्राव्यापारत्वप्रसङ्गात् । अन्यथा श्रोत्रस्य शब्दप्रतिपत्तावकरणत्वप्रसङ्गात् । सन्निकर्षो हीन्द्रियव्यापार उच्यत इति व्यापारान्तरञ्च तस्य क्षणिकमसिद्धं, स्थिरे चोक्त एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषः। शब्द एव तद्व्यापारः किन्न स्यादिति चेन्न, तस्य कर्मत्वेन करणकोटिबहिर्भावात्। क्वचित्तयोरेकत्वेऽपि कार्व्यातिरिति चेन्न, शब्दबुद्धौ कार्य्यायामुपधायकत्वेन प्रविष्टस्य शब्दस्य करणव्यापारतया करणकोटावपि प्रवेशनेऽशतोनियम्यनियामकत्वविरोधापत्तेः। घटादिबुद्धौ चक्षुरादेश्चक्षुर्घटादिसंसर्गव्यापारकत्वेन समसिद्धमिति चेत्, किन्नः स्यात् तथा च "बाधेऽदृढेऽन्यसाम्यात् किं दृढेऽन्यदपि बाध्यताम्। क्व समत्वं मुमुक्षूणामनिर्वचनवादिनाम्। तथा हि मिथिलानाथो मुमुक्षुर्निर्गमः पुरा। आहेदं मिथिलादाहे न मे किञ्चन दह्यत इति।" नापि द्वितीयः लिङ्गपरामर्शस्यानुमितावकरणत्वप्रसङ्गात्। निर्विकल्पकस्यापि तस्योपगमे सविकल्पकानाश्रयत्वात् अतद्धेत्वाश्रयस्य तद्धेतुव्यापारत्वे चात्यापत्तेः। किञ्च फलाव्यभिचारित्वं किन्तस्मिन्नेव काले फलसत्त्वनियमः, उत तदनन्तरं फलसत्त्वनियमः। नाद्यः, कारणस्य पूर्वभाविताया अवश्यवक्तव्यत्वात्। न द्वितीयः, आनन्तर्य्यं यद्यव्यवहिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्तर्य्यं विवक्षितं तदा यत्किञ्चिद्व्यापारवतः करणत्वपक्षे हस्तादेरकरणत्वापत्तेः। आफल-व्यापारवतस्तु तथात्वे कर्त्रादिष्वतिव्याप्तेः। अथ व्यवहितस्याप्यानन्तर्य्यं विवक्षितं तदापि यत्कि-ञ्चिद्व्यापाराभिप्रायेऽन्तरायसम्भवात् हस्ताद्य-व्याप्तिः आफलव्यापाराभिप्राये च व्यवधाना-सम्भवात् कारकमात्रं करणमित्युक्तं स्यात्। व्यापारवतश्च फलाव्यभिचार इति किन्तद्व्या-पारस्य फलाव्यभिचारित्वं व्यापारविशिष्टस्य वा। नाद्यः हस्ताद्यकरणत्वापातात्, अतएव न द्वितीयः यागादेः स्वर्गाद्यकरणत्वापाताच्च। अपूर्व्ववाक्यार्थत्ववादिनापि चरमयागस्य फल-करणत्वाभ्युपगमादिति। अथोच्यते यद्वानेव करोति तत् करणं, यद्वानेव प्रमिमीते तत् प्रमाणं, नैवम् आत्मधर्मप्रध्वंसादीनामकरणानां प्रमाणत्वप्रसङ्गात्। येन क्रियाकारणेन युक्त एव प्रमिमीत इति चेन्न सुखादिप्रमितौ क-रणव्यापारस्यापि करणत्वप्रसङ्गात्। ओमिति चेन्न, अव्यापारतया अकारकत्वेन तद्विशेष-करणभावानुपपत्तेः। व्यापारवतापीति चेन्न,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं हि व्यापारवतएव करणत्वं न स्यात् न हि व्यापारवतस्तस्य व्यापारान्तरवत्त्वास्ति। अथ व्यापारवतो व्यापारांशमपहाय करणत्वं, तत्र चास्येदं लक्षणं यस्य करणत्वमस्ति तस्य व्यापारवत्त्वमप्यस्तीति व्यापारवत् करणमुच्यत इति, न, पटमुद्दिश्य निपात्य च प्रक्षालयतः स्वकर्मैव हि करणं स्यात्। किञ्च किन्तस्य करणत्वमिति लक्ष्यीभूतस्यावश्यवक्तव्यत्वात्, यदुक्तलक्षणवत्त्वमेव तत् स्यात् तदात्माश्रयापातः स्यात् स्वरूपमिति चेन्न, स्वरूपस्य प्रतिकरणं भिन्नतया एकपरित्यागेनापरत्र लक्षणं गतमित्यतिव्यापकं स्यात्, न हि चक्षुषा स्वरूपं श्रोत्रस्येति। किञ्चैवमिन्द्रियादेः प्रमाणत्वं न स्यात्, अतद्वतोऽप्यनुमानादेः प्रमात्वात्। नासौ प्रत्यक्षप्रमेति चेन्न, नेदमपि हि प्रत्यक्षमात्रस्य लक्षणं भवता क्रियते। ननु यद्यपीन्द्रियादेर्विशेषतोव्याप्तिस्तदपि तज्जातीयकरणमात्रतया तन्मात्रस्याव्याप्तिरेव। नह्यनुमित्यादावप्यकरणजातीयवान् प्रमिमीत इति, न करणतया साधारणभावस्याद्यापि निर्णेतुमशक्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात्। अथ यां प्रमां यद्वानेव जनयति तस्यां तत्करणं, नैवं, कौपीनाच्छादनादेरपि करणत्वप्रसङ्गात्। यज्जाति कामिति चेत्, नैवं, परोक्षत्वजातिकां प्रमां लिङ्गवानेव शब्दवानेव वा जनयतीति नियमाभावात् तस्या, करणत्वप्रसङ्गात्। साक्षात्कारित्वानुमितित्वादयोजातिभेदा विवक्षिता इति चेन्न, प्रत्येकमुपादानेऽंशाव्याप्तेः, समूयोपादाने सर्व्वाव्याप्तेः, अनियमेनोपादाने च लक्षणाननुगमापातादिति। यदभावात् कर्तृकर्मणी क्रियां न जनयतः तत् करणं, तेन तदभावात्, प्रमातृप्रमेये प्रमां न जनयतः तत्प्रमाणमिति लक्षणमित्यपि न युक्तं, किं प्रमातृप्रमेये सती यत्र न जनयतः उत, सती अपि। आद्ये अतीतानागतानुमानादिकरणाव्याप्तिः। नापि द्वितीयः प्रमातृप्रमेययोरपि प्रसङ्गात्। यथा हि तत्र चक्षुराद्यभावात् प्रमा न जायते तथा प्रमातृप्रमेयोरप्यभावात्, अन्यथा तयोः करणत्वमेव न स्यात्। एतेन सामान्यतोऽभिधानं प्रत्युक्तम् अस्मादिकर्तृसापेक्षेश्वरकर्तृके चास्मदादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाने अस्मदादिकर्तृकरणतापत्तेः। एवञ्च सति प्रकारभेदेनापि प्रमाणप्रमात्रादिव्यवस्था-समर्थना छता न स्यात् येनैव रूपेण कर्त्तृत्वा-दिना तस्य प्रमायाऽत्वयस्तेनैव तद्व्यतिरेकस्य प्रमानुत्पत्तौ प्रयोजकत्वादिति। चरमव्यापा-रवत्त्वं करणत्वमित्यपि न, व्यापाराभावात् लिङ्गपरामर्शस्याकरणत्वापातात्। नच सवि-कल्पकव्यापारवतो निर्व्विकल्पकस्य तत्र प्रा-माण्यं, केवलविकल्पनीयलिङ्गविषये तदनुप-पत्तेः। संस्कारादिपर्य्यन्तानुसरणे चानुमिते-स्तज्जन्यत्वे प्रमाणाभावात् कार्य्यहेतोः कारका-व्यापारत्वात्। अपि चाज्ञातकरणत्वापातात् नच लिङ्गमेव परामर्शं व्यापारवत्तया करण-मिति युक्तम्, अनुमितानुमानादौ परामर्श-स्यालिङ्गत्वेन तद्व्यापारत्वानुपपत्तेः। आप्तो-क्त्यादिभिस्तत्रासीद्धूम इति प्रतीत्य तदा तत्र वह्निरप्यासीदिति यदनुमानं तत्रासत्त्वात् धू-मस्य परामर्शव्यापारवत्तया करणतायादूर-निरस्तत्वात्। किञ्च यत्किञ्चिदपेक्षया चरम-व्यापारत्वस्य सर्व्वकारकसाधारण्यात्तकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कापेक्षया चरमव्यापारत्वस्य स्वापेक्षया चरमत्वानुपपत्त्या सर्व्वत्रासिद्धेः । कर्त्रपेक्षयेति चेन्न, कर्तृधर्म्मिमात्रापेक्षया विवक्षितत्वे कर्त्तरि प्रसङ्गतादवस्थ्यात् । व्यापारवत्कर्त्रपेक्षाभिप्राये च कर्त्तरि स एव प्रसङ्गः । एकव्यापारवत्कर्त्रपेक्षया परापरकर्तृव्यापारस्य चरमभावित्वात् । यावद्व्यापारवत्कर्त्रपेक्षापक्षे तु विवक्षितमपि करणं न स्यात्, आफलसिद्धेः कर्तृव्यापाराविरामात् । व्यापारस्य विच्छेद तद्धेतुलक्षणक्षीणतापत्तेः । यद्व्यापारानन्तरं कारकान्तरं न व्याप्रियते चरमव्यापारमिष्टमिति चेन्न सेश्वरपक्षे कर्तृव्यापाराविरमात् तदानन्तर्य्यासिद्धेस्तत्करणत्वापातात् । अनीश्वरपक्षे चाक्षुषयोगादिभिरेव सव्यापारकर्म्मण्यपि प्रसङ्गात्, छेद्यादेर्हि करणसंयोगादिभिरेव सव्यापारे कर्म्मण्यपि प्रसङ्गात् । छेद्यादेर्हि करणसंयोगादिव्यापारश्चरम एवेति कुतस्तद्व्यवच्छेदः, हस्ताद्यव्याप्तेश्चेति । अनन्तरफलं करणमित्यपि न, अविशेषितानन्तर्य्यस्य सर्व्वकारणसाधारण्यात्, अव्यवहितानन्तर्य्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यापार्य्यपेक्षया यागाद्यव्यापनात्। व्यापारा-
पेक्षस्य च हस्ताद्यव्यापनात्, व्यापारपरम्परा-
पेक्षस्य सर्व्वकारकव्यापनात्। किञ्च तत्कार्य्ये
यदि क्रियाहेतुस्तद्व्यापार इष्टस्तदेन्द्रियकार्य्ये
लिङ्गपरामर्शोऽनुमिति क्रियाहेतुरितीन्द्रिय-
करणिकानुमितिः प्राप्ता। अथ हेतोः सतः
कार्य्यः क्रियाहेतुस्तद्व्यापारस्तथा सत्यनुमित्य-
हेतोरिन्द्रियस्य कुतः करणत्वं स्यादिति।
नैवम्। किं तद्धेतुत्वं यन्नास्त्यनुमिताविन्द्रि-
यस्य नियतपूर्व्वभावित्वमिति चेत् अस्ति तावत्
पूर्व्वभावित्वं नियतत्वमपि, यदि कारणतायां
प्रयोजकमिच्छसि तदा भवतैव पतितव्यं केन-
चिद्रूपेणेन्द्रियादेर्नियतत्वं प्रति, अन्यथा लिङ्गे-
न्द्रियादेः परस्परव्यभिचारादकरणिकैव
प्रमा स्यात्। मनःसंयोगादेरेव तथात्वे च प्रमा
साधारण्यम्, अपि चाज्ञादेरकरणत्वापातः।
यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषस्यैव
तद्विशेषप्रयोजकत्वनियमदर्शनात्, ततो येन
केनापि रूपेणेन्द्रियस्य प्रमायां नियतत्वमुप-
पद्यते, तेनैव रूपेण प्रसङ्गोपपत्तिः। अथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमात्वे तत् प्रयोजकं नत्वनुमितित्वादाविति चेन्न, निरुपाधित्वाविशेषेणोक्तार्थानाधिक्यात्, सामान्यप्रयोजकत्वेन विशेष त्यागानवकाशादिति अन्यथा व्यक्तेरकारणकत्वापत्तेः। अथान्यतरास्तु यद्वा तद्वा करणं, प्रमाविवक्षितजातिविशेषव्यपदेशकं प्रमाणं चतस्रः खल्विमाः प्रत्यक्षादिप्रमितयो भिन्नव्यपदेशभाजः। नच प्रमाता प्रमेयं वा तद्भेदहेतुः प्रमाणानि तु यथायथं चतसृषु साधारणानीति भिन्नबुद्धिव्यपदेशनिबन्धनानीति। मैवम्। विवक्षितपदं तावल्लक्षणे भण्डालेख्यमिव, पुरुषेच्छानामनियतविषयत्वात्। अर्थजत्वस्य च साक्षात्कारित्वं प्रतीन्द्रियजत्वाविशिष्टतयार्थस्यापि करणत्वप्रसङ्गात्। आप्तोक्तौ तु कर्त्तुरपि शाब्दप्रमाजातिविशेषकत्वेनातिप्रसङ्गात्, ओमित्युत्तरे च पूर्व्वमेवोक्तमिति विवक्षितजातिभेदौपयिकत्वेन प्रमित्यसमवायिकारणविशेषकं प्रमाणमित्यप्यतएव प्रत्युक्तमिति प्रमाकरणनिरुक्ति दूषणानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं विशेषतोपि प्रमाणलक्षणानि प्रतिवक्तव्यानि तथा हि प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीत्याहुः। किमर्थमिदमुच्यते किं सजातीयविजातीयव्यवच्छिन्नतत्प्रतीत्यर्थम्, उत साक्षात्कारित्वप्रतीतये, तद्विशेषोपदर्शनमिदम् उत व्यवहारार्थम्, उत प्रत्यक्षादि शब्दप्रवृत्तिनिमित्तावधारणार्थम्, उतान्यत्किञ्चिदर्थमेव। तत्र नाद्यः। तथा हि किं सजातीये हि प्रत्यक्षत्वेन साजात्यमपेक्षितं रूपान्तरेण वा। नाद्यः तस्माद्यवच्छेदावधेः सजातीयादव्यावृत्तत्वेन व्यवच्छेदकत्वानुपपत्त्या व्यावृत्तत्वस्वीकारेणाव्यापकत्वात्। नापि द्वितीयः विजातीयपदोपादानवैयर्थ्यात्, अस्ति हि प्रमेयत्वादिना सर्व्वसाजात्यम्। अथ प्रमाणत्वादिना विशेषेण साजात्यं विवक्षित्वेदमुच्यते, तर्हि लक्ष्यस्यापि प्रमाणत्वेन साजात्याद्यवच्छेद्यकोटिप्रविष्टतया संग्राह्याभावप्रसङ्गः। लक्ष्यस्य यत्प्रमाणत्वादिभिः सजातीयं तद्व्यवच्छेद्यम्, नच लक्ष्यस्य लक्ष्यं सजातीयं, षष्ठ्यर्थस्य भेदव्यवस्थितत्वादिति चेत्, एवं तर्हि लक्ष्यापेक्षया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भिन्नात् व्यवच्छेद इत्येवोच्यतां कृतं प्रमाणत्वा-
दिना साजात्येन प्रकृतानुयोगिना वर्णितेन ।
यदा च लक्ष्यादन्यत्वं परेषामवगतं तदा पर-
स्मादन्यत्वमपि लक्ष्यस्यार्थादवगम्यत इति
सिद्धमग्रतएव लक्षणप्रयोजनमिति वैयर्थ्यमेव
स्याल्लक्षणाख्यानस्येति । अस्तु वा विवक्षावैचि-
त्रीवशात् कथमपीदृशमभिधानं, तथापि न
तावदनेन लक्षणेनानवगतेनैव व्यवच्छिन्नप्र-
तीतिसम्भवोऽतिप्रसङ्गात् । नापि ज्ञातेन दुरव-
धारणत्वात्, तथा हि न तावदिन्द्रियार्थसन्नि-
कर्षोत्पत्तिः प्रत्यक्षाप्रत्यक्षविशेषणात्, नापि का-
र्य्येण लिङ्गेन तदनुपपत्त्या वा तदवगमः, ताभ्यां
सामान्यतः कारणमात्राक्षेपेण कारणगतानु-
गतरूपाऽसिद्धावेकरूपलक्षणासिद्धेः, कार्य्यस्यैक-
जात्यादेकजातीयकारणसिद्धिरिति चेत्, तर्हि
कार्य्यगतैकजात्यस्य पूर्व्वमवश्यप्रत्येतव्यत्वाङ्गी-
कारे ततएव सजातीयविजातीयव्यवच्छेदप्रति-
पत्तिरस्तु, कृतमनया पारम्पर्य्यकुसृष्ट्या ।
नन्वेतावतापि न प्रकृतलक्षणखण्डनं भवत्य-
व्याप्तेरव्याप्तेर्वानुद्भावनात् । मैवम् । प्रथम-

CC-0. In Public Domain. Digitization by eGangotri

भावितयावश्यानुष्ठेयतया च लघोरुपायात्साध्य
सिद्धौ सम्भवन्त्याञ्चरमभावितयावश्यानुष्ठे
त्वाभावेन च गुरूपाये प्रवर्त्तमानस्य तवैवे
दोषोद्भावनं प्रदीपे प्रदीपान्तरं प्रज्ज्वाल
तमोनिरासाय यतमानस्येव पुंसः। न हि
तस्य दीपान्तरस्य कश्चिद्दीपदोषः, किन्तु तथा
कारी पुरुष एव पर्य्यनुयोज्यः, सर्व्वसाधनसाधा
रणोऽयं वा दोषो यत्सम्भवदेवम्विधलघूपाय
नाम, स्वरूपासिद्धिरिव सर्व्वप्रमाणानां, त
स्थान्या नाम भूदतिव्याप्त्यादिदोषः, सामान्य
दोषादेवेदं दुष्टं लक्षणमिति। एतेन द्वितीयो
ऽपि निरस्तः साक्षात्कारित्वावगममन्तरेण त
दवगमानुपपत्तेः, तदवगमाद्वास्य प्रतीतावन्यो
न्याश्रयप्रसङ्गः। अस्तु वान्यदपि किञ्चिदिन्द्रि
यजत्वे लिङ्गं, तथापि तदेव साक्षात्कारित्वा
विनाभूततया प्रत्यक्षलक्षणमुपन्यस्यतां, सन्नि
हितप्रतिपत्तिकत्वात्। नच तदवश्यं व्यापक
वक्तव्यं लिङ्गत्वस्य तद्व्याप्यत्वेनैवोपपत्तेरिति चेत्
यत्र लिङ्गमव्यापकत्वान्नास्ति, तत्रेन्द्रियजत्वस्य
प्रमाणाभावात् प्रत्येतुमशक्यत्वेन कथं तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षात्कारित्वावगमः, यदा च क्वचित्प्रत्यक्षजातीय एव प्रमाणाभावादिन्द्रियजत्वमनवधारणीयतया साक्षात्कारित्वव्यापकतानवगतमपि लक्षणं, तदा किमपराद्धं लिङ्गान्तरेणाव्यापकेन। अथ यत्रेन्द्रियजत्वे तल्लिङ्गं नास्ति, तत्र लिङ्गान्तरात्तत्प्रत्येतव्यं, तथापि तदेवास्तां साक्षात्कारित्वे लिङ्गं, कृतमिन्द्रियजत्वानुमानपूर्वकतदनुमानकल्पनया। अथ तथा लिङ्गद्वयं तत् प्रत्येकमव्यापकतया न लक्षणम् इन्द्रियजत्वन्तु तथा त्वात् लक्षणमिति चेन्न, साक्षात्कारित्वानुमानस्य लक्षणप्रयोजनस्योभाभ्यामेव सिद्धेः कृतं व्यापकेन तेन। नापि द्वितीयः, स ह्येवंरूपो यदिन्द्रियार्थसन्निकर्षजादि तत्प्रत्यक्षमिति व्यवहर्त्तव्यमिति। अयमप्यनुपपन्नो, लक्षणस्य ज्ञातुमशक्यत्वात्, साक्षात्कारित्वात्तदवगमे साक्षात्कारित्वमेवास्तु व्यवहारनियमव्यवहितप्रतिपत्तिकत्वादित्यावेदितम्। अतएव न चतुर्थः, कल्पनागौरवदोषस्याधिकः। नापि पञ्चमः, तादृशस्य दर्शयितुमशक्यत्वात्, एतेन भासमानाकारेन्द्रियसंयोगजं प्रत्यक्षमित्यपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरस्तम्। किञ्च प्रमाणविशेषलक्षणे
प्रमाणलक्षणोपसंगृहीतस्य कियतः संग्राह्य
कियतश्च प्रतिक्षेपकं वक्तव्यं, प्रमाणलक्षणेन
व्यभिचारिणो निवृत्तिः प्रदर्श्यते, तथा च स
यथाश्रुतमिदमलक्षणं, व्यभिचार्य्यपि भासमा
नस्य सत्तादेराकारस्येन्द्रियसंयोगादुत्पद्यते
अथ विशेषाभिप्रायेणेदं लक्षणवाक्यं, ततोऽ
सङ्गतिः, तथा हि किं कियन्मात्रभासमाने
न्द्रिययोगजत्वं विवक्षितम्, उत यावद्भासमाने
न्द्रिययोगजत्वम्। आद्ये व्यभिचार्य्यव्यवच्छेदः
निर्विकल्पकासंग्रहश्च। नापि द्वितीयः विक
ल्पासहत्वात्, तथा हि किम्भासमानता विशिष्ट
स्येन्द्रियसंयोगः, उत भासमानोपलक्षितस्य
नाद्यः पूर्वं भासमानत्वाभावात्, कारणस्य
पूर्व्वभावित्वात्, द्वितीये लटोऽविवक्षितार्थत
विवक्षितार्थत्वं वा। नाद्यः, तथा हि यावद्भास
मानाकारेन्द्रियसंयोगजमपि भवति घटोऽय
मिति विज्ञानं, नच तदात्मनि प्रत्यक्षम्, आत्मन
स्तदीयाविषयत्वात् प्रामाण्यस्य च विषयनि
यतत्वात्। यत्र प्रामाण्यं तत्रैव विषये तद्विशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पस्य प्रत्यक्षत्वस्य वक्तव्यत्वात्, अन्यथा पटास्तित्वे घटोयमिति प्रत्यक्षं प्रमाणयतः किमुत्तरम् । नन्विदमुत्तरं घटविज्ञानं पटे न प्रत्यक्षम् । न हि तत्तदिन्द्रियसन्निकर्षेणोत्पन्नमिति, तत् किमात्मेन्द्रियसन्निकर्षजं घटज्ञानमात्मनि प्रत्यक्षमेव, कथमेवं स्यादात्मेन्द्रियसन्निकर्षाद्घटज्ञानस्योत्पादेऽप्यात्मनोऽनवभासमानत्वादिति चेन्न, भासमानेत्यत्र लटोऽविवक्षितार्थत्वपक्षमाश्रित्येदं भवतोच्यत इति मन्तव्यम् । अस्ति ह्यात्मनोभासमानत्वं कदाचित् केनचिदन्यथा अप्रमेयत्वप्रसङ्गात् उक्तलक्षणकं स्वविषये प्रत्यक्षं न त्वन्यत्रापीति चेन्न, स्वशब्देन यदि ज्ञानमात्रं विवक्षितं, तदा स दोषस्तदवस्थः । अथ ज्ञानव्यक्तिरपेक्षिता, तदा लक्ष्यस्वरूपस्यासाधारणतया तत्परित्यागेन लक्षणस्यान्यत्र गतत्वादतिव्याप्तिः, व्यक्त्यन्तरस्य लक्षणाश्रयस्य एकव्यक्त्यभिहितलक्ष्यीभूतासाधारणरूपत्वाभावात् । व्यक्त्यन्तरमपि लक्ष्यमेव, अलक्ष्ये च लक्षणस्य गमनादतिव्याप्तिरिति चेन्न, यदेकत्र साधारणस्वरूपं लक्ष्यत्वेन निरुच्यते भवता,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न तदन्यस्वरूपमतः कथं तदपि लक्ष्यमित्यो शब्देनानेकं साधारणीकृत्य समुच्छेत्तुं शक्यम् यदपि साधारणं रूपम् एतद्व्यक्त्यन्तरव्यवच्छेदकं स्वविषयपदं विशेषणं प्रक्षिपता भवतैवा साधारणीकृतं, स्वशब्दस्य ज्ञानमात्रार्थत्वे दोषस्योक्तत्वात् स्वत्वस्य चानुगतस्य रूपस्य निर्वक्तुमशक्यत्वात्। अन्य व्यक्तिविषयस्यान्यत्र तथात्वापत्तेः। नापि द्वितीयः पक्षः, विकल्पासहत्वात्, किं सम्प्रयोगापेक्षया वर्त्तमानत्वमथ यत् किञ्चिदपेक्षया। प्रथमे विशेषणत्वपक्षान्न विशेष इत्युक्तदोषापत्तिः। द्वितीये तु लटोऽविवक्षितार्थत्वमेव स्यात्, व्यवच्छेद्ययोर्भासितभासिष्यमाणयोरपि तदा भासमानत्वस्वीकारात्। इन्द्रियसंयोगानन्तरं भासमानत्वमपेक्षितमतोऽविवक्षितार्थमिति चेन्न, आत्मनोऽपीन्द्रियसंयोगानन्तरं भासमानत्वमस्ति। न हि पक्षः स यदा मनसा गृह्यते तदा नेन्द्रियसंयोगानन्तरं नेन्द्रियसंयोगमात्रं विवक्षितं किं नाम यदनन्तरं भासनोत्पत्तिरिति चेन्न, तदनन्तरमपि भासनोत्पत्तेः। भासनान्तरं तत् न त्विदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भासनमिति चेन्न, अव्याप्तिप्रसङ्गात् एकभासन-मात्रव्यवस्थितत्वात् लक्षणस्य। अथ मन्यसे यद्भासनं यस्य विषयस्येन्द्रियसंयोगादुत्पन्नं तत् तत्र प्रत्यक्षं प्रमाणमिति निरुक्तौ नच दोष इति। नैवम्। यद्भासनं घटोऽयमिति यस्य विषयस्यात्मन इन्द्रियेण सह सन्निकर्षादुत्पन्नं तद्भासनं तस्मिन्नात्मनि प्रमाणं स्यात् नात्मा तस्य विषयः तत् कथमेवं स्यादिति चेन्न, न हि भवता तदीयविषयस्येत्युक्तं किन्तु सामान्यतो विषयस्येति तेनेदमभिहितं यदि तु तदीयतां विशेषणमुपादत्ते भवान् तदा यदि यच्छब्देन ज्ञानजातीयमात्रपरामर्शस्तदा स दोषस्तद-वस्थः। यदि तु ज्ञानव्यक्तिविशेषपरामर्शस्तदा अव्यापकत्वं प्रतिज्ञानं तच्छब्दार्थस्य भेदात्। न हि यत्त्वं तत्त्वं वा किञ्चिदनुगतं रूपमस्ति, अतएवात्मविषयत्वानुयोगवत् त्रिपुटीप्रत्यक्ष-वादिन्यपि पटज्ञानस्य घटादौ प्रत्यक्षतया प्रा-माण्यानुयोगो द्रष्टव्यः। यदिन्द्रिय सन्निकर्षो-त्पन्नमिति विशेषणप्रक्षेपे यत्तच्छब्दार्थस्यासा-धारण्यादव्याप्त्यापत्तेः। यदि तु यत्तच्छब्दार्थो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनुगतः स्यात्, पुनरप्यन्यत्र घटोऽयमिति ज्ञानस्य प्रत्यक्षत्वेन प्रमाणता प्रसज्येत। अथात्मव्यतिरिक्त इति विशेषणं प्रक्षिपसि, तदा आत्मविषयस्य प्रत्यक्षता न स्यात्, तच्छब्देनानुगतार्थाभिधाने व्यवच्छेदकत्वाभावात्, घटज्ञानस्य च पटे प्रत्यक्षतया प्रामाण्यं प्रसज्येत। एतेनेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि प्रत्यक्षमित्यत्रापि दोषोऽयमुक्तो द्रष्टव्यः, तादृशस्यापि ज्ञानस्य विषयान्तरे प्रत्यक्षत्वेन प्रामाण्यप्रसङ्गात्। यस्यार्थस्य सन्निकर्षात् यदुत्पद्यते ज्ञानं, तत्तत्र प्रत्यक्षतया प्रमाणमित्यभिधाने तु, यच्छब्दतच्छब्दसाधारणासाधारणार्थाभिधानविकल्पोक्तदोषप्रसङ्गः, अव्यभिचारिपदञ्च व्यर्थम्। न हि शुक्तौ रजतज्ञानं रजतेन्द्रियसन्निकर्षादुत्पन्नं, संस्कारलक्षणा प्रत्यासत्ती रजतत्वेऽप्यस्तीति चेन्न, पूर्व्वानुभूतरजततादात्म्यसंस्काराभावादुक्तदोषतादवस्थ्यात्, गुरुमतानुसारेण सुतरां विशेषणवैयर्थ्यात्तेन व्यभिचारानङ्गीकारात्। रजतत्ववैशिष्ट्ये पुरोवर्त्तिन स्तदभावात् तस्मिन्नेवांशेऽप्रामाण्यं न तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजतत्वमात्रे तस्यान्यत्र सत्त्वात् । अथ साक्षात्कारित्वं प्रत्यक्षलक्षणमुच्यते तदा साक्षात्कारिभ्रमेऽपि प्रसङ्गः, अव्यभिचारित्वेन विशेषितं तल्लक्षणमिति वा भेदाग्रहव्यतिरिक्तविभ्रमाभावो वेति चेन्न, विकल्पासहत्वात् । किमवगतमिदं लक्षणं फलहेतुः अनवगतं वा । न तावच्चरमः, तदभिधानवैयर्थ्यप्रसङ्गात् । अभिधानस्य ज्ञानोत्पादोपयोगित्वात् तस्य चानवगतस्यैव फलसाधकत्वाभ्युपगमात् । आद्ये किमन्यस्मात्तदवगमः उत त्वदीयाल्लक्षणवाक्यात्, यद्यन्यस्मात्, कृतममुना लक्षणाभिधानप्रयासेन, अभिधानस्य ज्ञानोत्पादातिरिक्तप्रयोजनाभावात् तस्य चान्यत एव सिद्धेः । अन्त्ये किमिदं त्वदभिधानमाप्तोपदेशतया साक्षात्कारित्वं बोधयति, उत लिङ्गादिभावेन । न तावच्चरमः, त्वद्वचनं साक्षात्कारित्वाविनाभावाद्दर्शयितुमशक्यत्वात्, नापि प्रथमः वादिनं प्रति भवत आप्तत्वासिद्धेः, सिद्धौ हि प्रतिज्ञामात्रादेव साध्यसिद्धौ हेत्वाद्यभिधानमनर्थकं स्यात् । अथ मन्यसे यः साक्षात्कारित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्यतो जानाति, प्रत्यक्षव्यवहारनिदानतया च न जानाति, तं प्रति प्रत्यक्षव्यवहारनिदानत्वमस्य ज्ञाप्यते लक्षणवादिना, तच्चानुमानभावे नैवम्नाप्तोपदेशतया। अतएव लक्षणं केवलव्यतिरेक्यनुमानमाचक्ष्महे, यद्यथा श्रावणादिप्रमितयः साक्षात्कारिप्रमितयो वा प्रत्यक्षत्वेन व्यवहर्त्तव्याः, साक्षात्कारिप्रमितित्वात् न यत्प्रत्यक्षतया व्यवह्रियते न तत्साक्षात्कारिप्रमितिः यथानुमितिः तथाचैता स्तस्मात्तथा एतदनुमानप्रतिपादकञ्च वाक्यं नाप्तवाक्यत्वेन प्रयुज्यते वादिना, किन्तु व्याप्त्यादेः प्रतिपन्नस्यैव स्मारकं, पूर्व्वाप्रतिपन्नस्य वा जिज्ञासोत्पादन द्वारेणेदानीमेव वादिनि प्रमाणोत्पादकमित्युक्तदोषानवकाश इति, न, प्रत्यक्षतया व्यवहर्त्तव्या इति व्यवहारस्य किं विषयभेदो विशेषः, उत शब्दभेदः। आद्ये यद्यसौ विषयविशिष्टं तं व्यवहारं नाज्ञासीत्कथं साक्षात्कारिणि तस्य स्वकर्त्तव्यतां लक्षणवाक्यादप्यवगच्छेत्, नह्यविदिताग्निरनुमानादप्यग्निसम्बन्धी बोधयितुं शक्यः। अथाज्ञासीत् तदा ज्ञात-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञापनवैयर्थ्याल्लिङ्गस्वरूपमनुमानं निष्प्रयोजनम्। अथ सामान्यतो जानाति अस्ति कश्चिद्विषयः प्रत्यक्षव्यवहारस्येति, विशेषतस्तु न जानाति तं प्रतीदमुच्यते, न। किं सामान्यतो निमित्तवत्तां व्यवहारमात्रस्य जानाति, उत व्यवहारविशेषस्य। आद्ये प्रकृतानुपयोगः, व्यवहारविशेषस्य चिन्त्यमानत्वात्, द्वितीये किं कृतोऽसौ व्यवहारस्य विशेष इति विकल्पित पक्षानुप्रवेशमन्तरेण न निस्तारः। एतेन सर्व्वस्यैव लक्ष्यस्य स्वीकारः परास्तनीयः। तथा हि "नात्यापत्त्या प्रमा मात्राश्चेतेऽर्थाः स्वीक्रियोचिताः। तद्विषय स्तदुरीकारे स्वाश्रयं कश्चित्कित्वतु। अथान्यः सविशेषश्चेत् तद्धीत्वं कैश्चिदिष्यते। इतः साकारवादाय विस्तरः स्पष्टमेव तत्। अर्थादुर्थोद्भवो धर्मानानुमात्वादयो यथा। तद्धीत्वमपि तद्वत्स्यादित्यर्थोऽनर्थमाविशेत्। सोऽपि वा धी विशेषः किं स्वीकार्य्यं स्तद्वियं विना। एवञ्च सोऽपि सोऽपीति नान्तः सोपानधावने। समस्तलोकशास्त्रैकसत्यमाश्रित्य नृत्यतः। का तदस्तु गति स्तत्तद्वस्तुधी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवहारयोः। उपपादयितुं तैस्तैर्मतैरशक-
नीययोः। अनिर्वचनीयतावादपादसेवागति-
स्तयोः।,,

[2]नापि द्वितीयः। तथा हि अयमनुमानार्थः
स्यात् श्रावणादि प्रतिपत्तयः प्रत्यक्षशब्दाभि-
धेयाः साक्षात्कारित्वादित्यादि, सोऽपि न, यद्य
साक्षात्कारिण्यनुमानादौ तच्छब्दाप्रयोगसा-
नात्साक्षात्कारिणि तच्छब्दप्रयोगः क्रियते
तर्हि शशविषाणजरगडदशादिशब्दप्रयोगोऽपि
साक्षात्कारिणि कर्त्तव्य एवाविशेषात्। अथ
जरगडदशादिशब्दाः सामान्यतोऽर्थवत्तया न
प्रसिद्धाः, क्वचिदप्यप्रयोगात्, शशविषाणादि
शब्दाश्चासद्विषया एवेति सिद्धाः, प्रत्यक्षादि-
शब्दास्तु सद्विषयवत्तया सामान्यतः सिद्धाः
प्रत्यक्षमस्तीत्यादिप्रयोगदर्शनादित्यस्ति विशेष
इति चेत्। नैवम्, एतेनापि विशेषेण चाक्षु-
षादिशब्दानामव्यवच्छेदात् तेषामपि साक्षा-
त्कारिमात्रे प्रयोगप्रसङ्गः। साक्षात्कारित्वे
सत्यपि श्रावणादौ चाक्षुषादिशब्दानामप्रयोगो,
नत्वेवं प्रत्यक्षादिशब्दानामिति विशेष इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेत् । एवं तर्हि यत्र साक्षात्कारित्वं नास्ति तत्र प्रत्यक्षशब्दयोगो नास्ति, यत्र साक्षात्कारित्वमस्ति तत्र सर्व्वत्रास्तीति यो जानीते तं प्रति लक्षणाभिधानमिति स्यात्, स च व्यवहारान्तरवदन्वयव्यतिरेकाभ्यामेव वाच्यवाचकभावमवधारितवानिति व्यर्थं लक्षणम् । एतेनानुमित्यादि व्यवच्छिन्नतया व्यवहर्त्तव्यमित्यप्युक्तानुमानसाध्यतयाभिधानमपास्तं वेदितव्यं पूर्व्वप्रतिपन्नमेव वाच्यवाचकभावं लक्षणाभिधानेन स्मर्य्यत इति चेन्न, अवगतसमयस्य प्रत्यक्षशब्दादेव तत् स्मरणसम्भवात् व्यर्थता लक्षणाभिधानस्य स्यात्, अवगतशब्दार्थसम्बन्धः शब्दादेव स्मरन् यदि लक्षणेन स्मार्य्यते, तदा लक्षण वाक्यगत पदकदम्बार्थस्मरणार्थमपि तल्लक्षणमभिधानीयमविशेषादेवं तल्लक्षणवाक्येऽपीत्यपर्य्यवसानं स्यात्। ननु प्रतिवादिनं प्रति लक्षणाभिधानं नार्थवत्, तेन वाद्याप्तभावानङ्गीकारात्, किन्तु शिष्यार्थं लक्षणमुच्यते, शास्त्रे, स हि शास्त्रस्य कर्त्तारमाप्तमेव मन्यते, तस्मात् शिष्यं प्रत्याप्तवचनतयैव लक्षणवाक्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मर्थं प्रतिपादयिष्यति शुकया गीयमानम्,
त्वया साक्षात्कारिशब्दार्थः प्रतीतः स ए
प्रत्यक्षशब्दार्थ इति। मैवं, यदि वादिनं प्रति
न शास्त्रं किन्तु शिष्यं प्रति, तदा प्रतिज्ञामा
त्रादेवाप्तवचनात् शिष्यस्यार्थनिश्चयोत्पत्तेः हे
त्वाद्यभिधानमनर्थकमापन्नं शास्त्रे। अथ भव
तत्प्रतिवादिनमपि प्रति शास्त्रे वाक्यं, यत्र हेत्वा
द्युपात्तं, लक्षणवाक्यन्तु शिष्यमेव प्रति प्रयोज
प्रतिपन्नशास्त्रकाराप्तभावमिति मन्यसे, तदाप
नुपपन्नं, शास्त्रान्तरसाध्यत्वादस्यार्थस्य। अ
समयग्राहकं शास्त्रं मुनिभिः प्रणीतं नामलि
ङ्गानुशासनव्याकरणादि। यदि च शास्त्रान्तर
साध्योऽप्यर्थो भवदीयशास्त्रस्य विषय स्त
प्रकृतिप्रत्ययविभागेन न साधनमपि शब्दान
कुतो न व्युत्पाद्यते, लिङ्गं वा शब्दानां कुतो
नाभिधीयते, तदज्ञानेऽपि पराजयो जायत एव
अथवास्तु व्याकरणादिविषयं विहाय नामव्यु
त्पादनं कथमपि भवच्छास्त्रस्य विषयः, तथापि
न्यूनतरत्वमस्मिन् विषये भवदीयशास्त्रस्य
बहूनि नामानि विद्यन्ते कोषान्तरवर्त्तिनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतो न व्युत्पादितानि तानीति । अथास्मिन् शास्त्रे येषां शब्दानामुपयोग स्तेषामनेन व्युत्पादनं न सर्व्वेषामित्युच्यते, तथापि यथैकवाक्यगतस्य पदस्य लक्षणव्युत्पादनमेवं तल्लक्षणवाक्यगतपदस्यापीत्यपर्य्यवसानमापतितं शास्त्रस्य, तत्तल्लक्षणवाक्यप्रयोग एव तेषां तेषां पदानां शास्त्रे जातोपयोगत्वात् । अथ नानालक्षणप्रणेतॄणां वादिनां विप्रतिपत्तेः प्रत्यक्षादिशब्दार्थ एव व्युत्पाद्यते संशयनिरासाय नान्योऽसंशयत्वादिति मन्यसे, तथाप्यनुपपत्तिः। अस्ति हि वादिनामर्थे वाच्यताद्योत्यताविवादः अस्ति च छिदूरादिपदानामर्थे कर्मकर्तृत्वाकर्मकर्तृत्वे विवादः अस्ति च भाव शब्दस्य स्वरूपसत्त्वसत्तासामान्याद्यर्थत्वे अस्ति चाधिकरणशब्दार्थस्य पतनप्रतिबन्धकत्वसमवायित्वादौ, एवमन्यस्मिन्नपि बहौ पदार्थे जाग्रति विप्रतिपत्तय स्तल्लक्षणानि कस्मान्नोक्तानि तदास्तामेकत्र विस्तराभिनिवेशः । किञ्च किं तत्साक्षात्कारित्वं सविशेषार्थप्रकाशत्वमिति चेत्, सविशेषत्वस्योपलक्षणत्वेऽनुमानादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिः, विशेषणत्वे च यदि विशेषणशृङ्खला
विश्रान्तिस्तदाशेषविशेषणस्य बोधे प्रत्यक्षत्व
क्षीणत्वेनासूक्ष्मप्रत्यक्षतापातः, यद्यविश्रान्ति
स्तदा तादृशस्यैव व्याप्तेः ग्रहादनुमायाम
तादृशसिद्धिरिति साक्षात्कारित्वापत्तिः। अ
ननुगमात्तत्र न तदनुमा, तर्हि तदनुगतप्र
त्याद्यनुपपत्तिः, व्यक्तेरनुमानादसिद्ध्यापत्तेश्च
यथा हि व्यक्तिं विना सामान्यस्य, तथा ता
तं विशेषं विना व्यक्तेरप्यनुपपत्तावविशेष
यदि च प्रतीत्यपर्य्यवसानाभावात्प्रत्यक्षधर्मत
नानन्तविशेषसिद्धिरिति मन्यसे, तदा प्रतीति
पर्य्यवसानात्तद्बुद्धिः साक्षात्प्रकाशः स्यात्
अप्रतिपद्यमानानन्तविशेषप्रकाशकल्पनाऽ
कारिसाक्षात्त्वनामकविशेषकल्पत्वात् अथ
तदा साक्षात्त्वव्यवहारान्यथानुपपत्तेः कल्प
बीजस्य तावतापि चरितार्थत्वादिति कृत्वा त
कल्पनादिना, तएव विस्तरस्तत्र वक्ष्यते। वि
षस्य यदि व्यवच्छेदस्तदा निर्विकल्पकाव्याप्ति
यदि च विश्वव्यावृत्तस्वरूपप्रकाशात् सो
तथा, तदा दूरे सामान्यप्रत्यक्षस्याप्रत्यक्षत्वापात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्र जगद्वैलक्षण्यप्रकाशे संशयाद्यनुपपत्तेः। यदि तत्रापि प्रतिपन्नादिव्यवच्छेदमात्रप्रकाशादिविशेषप्रकाशत्वमेव तदानुमित्यादिव्याप्तिः। अथ इन्द्रियकरणकानुभूतित्वं, तत्र साक्षात्कारिधीकरणस्यैवेन्द्रियत्वेनान्योऽन्याश्रयत्वापत्तेरिति केचित्, तत्र अज्ञातप्रमाकरणत्वस्य भावत्व विशेषितस्येन्द्रियनिरुक्तौ सम्भवात्, विना कार्य्यगतविशेषसिद्धिं किं प्रति, करणत्वमेव ज्ञेयमिति तु बाधः साधीयान्। एतेन ज्ञातता काचिद्विलक्षणा तज्जनकत्वं ज्ञानस्य साक्षात्त्वमिति निरस्तम्, ऐकरूप्याव्यवस्थितौ कारणत्वानवधारणात्। न च ज्ञाततावैलक्षण्यान्यथानुपपत्तेरेव तत्सिद्धिः, कारणान्तरवैलक्षण्यादेव तदुपपत्तेः। नापि मेयजनितत्वमतिप्रसङ्गात्। प्रमेयजत्वे च स्वार्थव्यावृत्त्यननुगमात्, पूर्वदोषानिवृत्तेश्च। अथ येन प्रमिते सति न प्रमित्सा पुनर्भवति तज्ज्ञानं साक्षात्कारीति, तन्न, प्रत्यक्षावगतेऽपीष्टे तनयादौ प्रमित्सादर्शनात्। अथ यदनन्तरं न विजातीयप्रमित्सा तद्भावस्थायित्वं, तन्न, तत्साजात्यानवगतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्विजातीयानवगतेः, अरिसम्पद्यनुमादिवि-
यायां प्रत्यक्षयितुमनिष्टेश्च। प्रत्यक्षावगतेः
दहने रक्ताशोकस्तवकसन्देहे धूमदर्शनेन व-
रनुमीयमानत्वादित्यप्येके। अज्ञायमानासाधा-
रण कारणकानुभवत्वं कारणविशेषणीकृ-
भावत्वं वा साक्षात्कारित्वमिति चेन्न, दीर्घा-
प्रत्यक्षाव्यापनात्, तत्रावधिप्रभृतेः प्रतीयमान-
स्यापेक्षणात्। नावधिस्तत्र ज्ञायमान स्त-
अवधिज्ञानं तु स्यात् अतीतादाववधौ तथ-
प्रत्ययादिति चेत्, तुल्यं लिङ्गे धूमादावपि धू-
दर्शनात्तत्राग्निरासीदिति पश्चादप्यनुमाना-
ज्ञानविशेषणतया ज्ञेयहेतुता तुल्यैवेति। अस-
धारणकारणगिरा करणमभिमतमिति चे-
अनुमितभाविलिङ्गकभाविलिङ्गैरनुमितावसत-
लिङ्गस्य करणत्वासम्भवेन ज्ञायमानकरण-
त्वाभावात्। लिङ्गज्ञानं तावत्करणं यच्च
प्रकाशवादिनो मम ज्ञायमानमेव तत्रेति चे-
तस्यापि ज्ञायमानतया करणकोटिप्रवे-
प्रमाणाभावात्, उक्तप्रत्ययानां तथात्वाभावात्
अन्यथासिद्धस्यापि ज्ञायमानत्वस्यावर्जने चक्षु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राद्यनुमित्यनन्तरं दैवोपजातघटादिप्रत्यक्षा-
व्यापनात्, नियमेनेति चेन्न, विधौ वैयर्थ्यात्।
नियमेनेति निषेधस्य विशेषणे दैवागतेन्द्रिय-
ज्ञानानन्तरजप्रत्यक्षसम्भवादसिद्धिः। विधौ
कारणप्रविष्ट एवायं नियमो निरुच्यत इति
चेन्न, तथापि वैयर्थ्यादेव। अन्यथातिप्रसक्तेर-
वैयर्थ्यमिति चेन्न, तथाप्यतिप्रसक्तेरेव, न हि
रसादिसाक्षात्कारे रूपादिर्हेतुः। अन्यथा-
सिद्धेर्नेति चेन्न, तुल्यत्वात्। किञ्च यत्र निषेधः
तद्गतमैकरूप्यं निरूप्यमन्यथा किमादाय नि-
यमो निरूप्य इति कार्य्यगतैकरूप्यमनभि-
धाय न निस्तारः। विनापि च नियमपदप्र-
वेशं कार्य्यगतैकरूप्यंनिरूप्य न निस्तार एव
जायमानं नात्र कारणमिति हि यदि कार्य्य-
व्यक्तिमभिसन्धाय, तदा तत्पूर्व्वं प्रतीतानां तत्रा-
कारणत्वं दुरवधारणं ततस्तज्जातीये तज्जा-
तीयव्यभिचारप्रतिसन्धानेऽवश्यं पतनीयमिति।
अथाव्यवहितार्थप्रमात्वं तथात्वं, तर्हि किम-
पेक्ष्य व्यवधानं किं वेति वाच्यम्, इन्द्रियमपेक्ष्य
तदसन्निकर्षश्च तदिति चेत्, तर्हीन्द्रियसन्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दृष्टप्रकाशत्वमिति कुटिलिकार्थः, स चानुप
पन्नः स्वविलोचनगोलकानुमानव्याप्तेः। ज्ञान
जन्यज्ञानत्वं तदिति चेन्न, सविकल्पकविशेष
व्यापनात्। एतेन विषयान्तरज्ञानाजन्य
तदिति प्रत्युक्तं, सविकल्पकस्याधिकव्यवच्छे
रूपविषयत्वात् तदवधिज्ञानजन्यत्वात् स्वा
षयानन्तर्गतार्थज्ञानाजन्यधीत्वं तत्। नच
प्रतियोगिकार्थप्रत्यक्षाव्याप्तिः, प्रतियोगिनोऽ
विशिष्टार्थप्रविष्टस्य तत्ताया इव प्रत्यभिज्ञा
प्रत्यक्षविषयत्वोपगमात्। स्वप्रतियोगित्व
विशेषणादिति चेन्न, स्वपदेनैव ज्ञारीकृतत
कार्य्यव्यक्तावजन्यताया दुरवधारणत्वाच्च।
जातीये तज्जातीयव्यभिचारशङ्काग्रहे च
र्थ्यैकजात्ये पूर्ववत्पतनमिति, स्वकालावच्छि
न्नार्थबोधकत्वं साक्षात्त्वमित्यपि न, स्वार्थावि
चनात्। कथञ्चानुमानादिव्यवच्छेदः,
व्याप्त्यादिप्रविष्टकालानियतार्थत्वं, यत्रापि च
दयसमुद्रदृष्ट्यादौ स्वकालार्थत्वं तत्रापि व्या
प्रविष्टतैव तादृशत्वस्य प्रयोजकेति चेन्न,
मप्यस्तु, तथापि स्वकालावच्छिन्नार्थत्वस्य स

त्। नच यज्जातीयस्यैवमेवेति विशेषः, साक्षा-
त्त्वस्य वैलक्षण्यस्याग्रतः सिद्धौ किमनेन नच
तदपीति वक्ष्यते। व्यवसायादिकमन्तरेणेति चेन्न,
तस्यैव समर्थत्वेन स्वकालकथावैयर्थ्यात्। यदा
न तदपि तथा वक्ष्यते। यत्तु कश्चिदाह स्वप्र-
काशनिषेधात् स्वप्रकालावच्छिन्नार्थप्रकाशत्वास-
व इति तदप्ययुक्तं वस्तुतो यः स्वकालस्तस्य
विवक्षितत्वात्। वर्त्तमानप्रकाशस्तथेति नि-
क्तिपर्य्यवसानात् वर्त्तमानार्थस्य च सर्व्वनि-
चनीयत्वात्। तथा चोक्तम् "सम्बद्धं वर्त्त-
मानञ्च गृह्यते चक्षुरादिना।" तस्मादस्मदुक्त-
मेव युक्तम्।

षोढासन्निकर्षेतरायुक्तविषयनियमं ज्ञानं
चेति चेन्न, दोषवशाज्ज्ञातसाक्षाद्बोधे तद-
भावात्। प्रमासाक्षात्कारस्यावक्तथेति चेन्न,
त्वेन प्रमेतरयोरविशिष्टतया साक्षात्त्वस्य
साधारणस्यैव निर्व्वक्तव्यत्वात्। अनिष्टप्रस-
ङ्गमते षोढासन्निकर्षस्य प्रत्येकमिलित नि-
यमानुपपत्तेः। साक्षाद्धीः स्वरूपधीः स्वेन
ण वस्तुनोभानमिति चेन्न, अनुमानादिव्याप्त-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्। अनुमानादौ लिङ्गाद्यपेक्षत्वात्तद्वच्छि
कालसम्बद्धबोधत्वं न त्वध्यक्ष इति चेन्न, व्यभि
चारात्, यत्र लिङ्गादिभाव्यादिबोधकं तत्र त
कालताव्यभिचारात्। एतेन यदि न लि
कालावच्छिन्नव्यापकप्रतिभासोऽनुमा, त
कूटव्याप्यानुमितस्य व्यापकस्य दैववशात् स
व्याप्यव्यक्त्यन्तरवतः प्राप्तौ व्यक्तिकालावच्छि
व्यापकप्राप्त्या तावत्यंशे प्रमात्वं प्रमाविशेषान
भिधानिर्व्वाह्यमापद्येतेति निरस्तम्। भूतादि
व्यापकानुमाने व्याप्यकालत्वासम्भवात् तथा
चाग्न्यादिमदंशमाने प्रमात्वापातदुष्परिह
त्वस्योक्तत्वात्। अनुपहितप्रतीतिः साक्षा
दिति चेन्न, विशिष्टप्रविष्टविशेष्यप्रत्यक्षाव्या
नात्। करणानुपहितत्वं विवक्षितमिति
परकरणोपहितव्यापनात्। स्वकरणोपहित
त्वस्य च स्वपदकुक्षिनिक्षिप्तत्वात्। व्याप्त्यनु
पहितत्वादीनां व्यतिरेकस्य यत्र समुच्चयः
धीः साक्षाद्धीरिति चेन्न, व्याप्त्यादि प्रत्यक्ष
व्यापनात् असिद्धत्वाच्च, पर्व्वतोऽग्निमानि
प्रतिज्ञानात्, शब्देन च स्वाप्रतिपाद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाब्दादिमितेश्च प्रत्यक्षत्वापादनात्। अव्यवहितधीत्वं साक्षाद्धीत्वमिति चेन्न, व्यवधानविकल्पानुपपत्तेः। यदि द्रव्यविशेषान्तरव्यवस्थितिर्व्यवधिः, तदानीमप्रत्यक्षविभुधियां साक्षात्त्वापत्तिः। अथ ज्ञापकज्ञानपूर्व्वसत्ता व्यवधानं, तदा परत्वाद्यप्रत्यक्षतापत्तिरिति। विशिष्टवैशिष्ट्यं व्यवधानमिति चेन्न, धूमविशिष्टे वह्निवैशिष्ट्यमिति स्वरूपस्थितौ तथात्वे कार्य्यकारणभावविरोधः, प्रतीतौ धूमवैशिष्ट्यस्य धर्म्मिविशेषणत्वे हेतोरंशतः स्ववृत्तिः। साध्यविशेषणत्वे व्याप्तिग्राहिप्रत्यक्षे व्यवधानाभावात् न साक्षात्त्वं स्यात्। अथ ज्ञानस्य जातिभेदः स्मृतिसाक्षात्त्वं, तत्रानुभवत्वेन परापरभावानुपपत्तिः, स्मृतेरपि साक्षात्कारित्वादिति केचित् तन्न, स्मृतेस्तथात्वानभ्युपगमात्, स्वप्नस्य वत् स्मृतित्वासिद्धेः, सिद्धौ वा तत्र साक्षादारोपोपगमात्, भावनाबलजस्य च क्वचिदालोकादिधर्म्मिकक्रियाद्याश्रयधर्म्मारोपत्वं शुक्तिरजतभ्रमवत् निमीलितनयनादेश्च स्वप्नवदेव तिरवगन्तव्येति। इदन्तु स्यात् परमाण्वादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धावनुव्यवसीयमानायां परमानुप्रतीत्यंशेऽपि
साक्षात्त्वमनुभूयत इत्यत्र न नः सम्प्रतिपत्तिः
अन्यथा लिङ्गबुद्धिलक्षणया प्रत्यासत्त्या वह्नि
रपि मानसप्रत्यक्ष एव न लैङ्गिक इति परे
सुवचत्वात्। एवं प्रत्यभिज्ञायां पूर्व्वदेशकाल
स्थितमस्य पश्यामीति कस्यानुभवो यदबला
त्तथाप्युपेयं तस्मात्प्रतीति कलहोऽयम्। यदि
च साक्षात्त्वं जातिरध्यक्षमात्रिका, तदा प्रतीतौ
कस्याञ्चिदध्यक्षानध्यक्षविवादो न स्यात्, न हि
घटादिप्रत्यक्षत्वे विवदन्ते। क्वचिदस्फुटत्वा
द्विवाद इति चेत् मैवम्। निरंशे वस्तुनि व
स्फुटावभासः। यदेकार्थसमवायिभिर्भूयोभिः
रुपलम्भः स, ज्ञानत्वादिवत्साक्षात्त्वेऽपि तत्
जातिज्ञानादित्वेन. विवादः साक्षात्त्वे त्वि
विशेषो वाच्यः। दर्शनकृतो हि विवादो
साहचर्य्येण वाऽज्ञानात् किन्तु तत्त्वाभिमाना
प्रत्यक्षार्थधर्मिकायाञ्चानुमायां साक्षात्त्वप
क्षत्व सङ्करो दुर्वारः। परोक्षत्वं न जाति
किन्तु साक्षात्त्वमेव, तथा केवलन्तु साक्षात्त्व
भावः परोक्षत्वमिति चेन्न, अस्यार्थस्य वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्तव्यत्वापत्तेः। सार्व्वज्ञमनुमन्यमानस्य च मते दृष्टलिङ्गादपीश्वरस्य लिङ्गादिनद्वारप्रयोज्यत्वेनापि विरोधः, लिङ्गादिधीजन्यत्वमनुमितित्वादौ प्रयोजकमिति चेत्, साक्षात्त्वेऽपि तहीन्द्रियसन्निकर्षादिजत्वमिति साक्षादपि सा न स्यात्। व्यञ्जकोपाधिनियता च जातिरिष्यते, नच तदत्र, उक्तप्रकारबाधात्। नच व्यञ्जकनियमानभ्युपगत्या न तदत्रोपगम्यमिति वाच्यं, किं मया दृष्टं तथा किं वा केनचित्कथितमिति संशयानुपपत्तेः। प्रागभूतायां स्मर्यमाणायां तद्‌बुद्धौ त्वन्मते मनसा ज्ञानरूपया प्रत्यासत्त्या प्रत्यक्षीक्रियमाणायां साक्षात्त्वाग्रहो विना व्यञ्जकाभावं कथं स्यात्। अर्थधर्मश्च साक्षात्त्वमिति स्वप्रकाशवादे निरस्तं, तथाप्यबाधितसाक्षात्त्वबुद्धिव्यवहारबलादन्ततः पदार्थान्तरमपि साक्षात्त्वमनुमत्य न निस्तारोऽस्ति, भ्रान्तेरप्यभ्रान्तिपूर्व्वकत्वादिति चेन्न, तस्यापि साक्षाद्‌ग्रहे क्वचित्तु विवादो न स्यादित्यादिदोषसाम्यात्। अनुमानादिवेद्यत्वे च लिङ्गाद्यनुपपत्तेः, क्व च व्याप्त्यादिग्रह इत्यादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुरन्तपरम्परैव स्यात् सप्तपदार्थीनियमसाधनानि च न कथं परिपन्थीनि स्युरिति। लिङ्गादिजत्वाभावसमुदायवती धीः साक्षादिति चेन्न, परोक्षविषयसंशयादावतिव्याप्तेः। तादृशी प्रमा तथेति चेन्न, प्रत्यक्षभ्रमाव्याप्तेः। अनुमानादि व्यवच्छेद्यतत्तदसाधारणकारणाजनिता धीः साक्षादिति चेन्न, एवं हि प्रत्यक्षतत्तदपरव्यतिरिक्ता धीरनुमानादिरिति वैपरीत्यमेव कुतो न स्यादित्यविनिगम्यत्वं स्यात्। तेषु व्यवच्छेद्येष्वेकाद्यादि परिहाय व्यवच्छेद्यहेत्वजनितत्वेनापि साक्षात्वक्तव्ये तत्रानुगतबुद्ध्याद्यन्तरापत्तेः, व्यवहारे सति निमित्तानुसरणं न तु निमित्तानुसरणेन व्यवहार इति चेन्न, निमित्तस्यात्यन्तापत्तिद्वारस्यैव कल्प्यत्वात्, तत्तज्जनितत्वाभावो हि तेनैव रूपेणानुगत व्यवहारप्रत्यया वाढ्यान्न त्वन्येनापि, तथात्वे यावत्परिदृष्टव्यक्तिविशेषान्यत्वेन व्यवहारोपपत्तौ गोत्वाद्युच्छेदप्रसङ्गः। तस्मात् "त्रिविजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थिनः। नैव ज्ञेदपराङ्गत्ते किमन्यापोह वादिना।," शब्दानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानोपमानजप्रमितिव्यतिरिक्तत्वे सति प्रमितित्वं प्रत्यक्षलक्षणमभिप्राय यः कोपि न वदते स प्रष्टव्यः, किं प्रत्येकमिदं लक्षणमुत मिलितम्। नाद्यः, प्रत्येकं व्यभिचारात्। द्वितीये किं मिलितानां निषेधः, उत निषेधानां मिलितत्वम्। नाद्यः, प्रत्येकमेव व्यभिचारात्, न हि प्रत्येकमनुमित्यादौ मिलिततद्रूपसम्भवः। नापि द्वितीयः, मिलितास्वनुमित्यादिषु निषेधमेलकसम्भवेऽपि प्रत्यक्षत्वानभ्युपगमात्, न बह्वाश्रयाणामुक्तनिषेधानां लक्षणत्वमपि त्वेकाश्रयाणामिति चेन्न, समुदायिभेदेऽपि समुदायस्यानुमित्यादिवदेकतोपचारः बीजाविशेषाभ्युपगम इति हि वक्ष्यते। असमुदायत्वे सतीत्यपि विवक्षितमिति चेन्न, समुदायत्वविशिष्ट एवांशतः स्वात्मनि वृत्तिविरोधश्च अयेनासमुदायत्वस्यैक्यत्वेन तद्वृत्ति प्रसङ्गो दुर्वारः। ज्ञानस्यैवं विवक्षितमिति चेन्न, विशिष्टस्यापि ज्ञानस्य ज्ञानत्वादेव। एकेति च किमाश्रयव्यक्त्यभेदो विवक्षितः, उताभिन्नजातीयता, उतैकोपाधिकता, उतैकसंख्यायोगिता, उत द्व्यादिसंख्यः-

CC-0. In Public Domain. Digitization by eGangotri

योगाभावः। आद्ये तद्विशिष्टव्यापकतादोषः, व्यक्त्यात्मनोऽभेदस्य व्यावृत्तत्वात्, धर्मिणा च लक्षणविशेषणे अलक्ष्यधर्मत्वं लक्षणस्य स्यात्, स्वस्यैव स्वधर्मत्वानुपपत्तेः। आश्रयाभेदोपलक्षणत्वे प्रागुक्तदोषः। द्वितीये तदेवाभिन्नजातीयत्वं लक्षणमस्तु, अवश्यन्तया प्राथम्येन प्रतीयमानत्वात्। न तृतीयः, परोक्षप्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावात्। नापि चतुर्थः, वैशेषिकपक्षे गुणतया तदभावात्, भावे वानुमित्यादित्रयवृत्तीनां तयाणामप्यभावाना मेकत्वसंख्यासामानाधिकरण्यसम्भवात्। मिलितानामप्येकसमुदायापेक्षया तथात्वात्। नापि पञ्चमः, वैशेषिकमतानुसारेणानुमित्यादित्रयेऽपि तदभावस्य तुल्यत्वात्। अतदनुसारेण प्रत्यक्षव्यक्तिष्वपि द्व्यादिसंख्यायोगात्, तत्रापि नैकस्यां प्रत्यक्ष व्यक्तौ द्व्यादिपरिसमाप्तिः। द्व्यादिसंख्यापरिसमाप्त्यभावश्च तदभाव शब्देन विवक्षित इति चेन्न, का हि परिसमाप्तिर्यैकस्यां व्यक्तौ नास्तीत्युच्यते। तत्रैव वृत्तिर्द्व्यादेः परिसमाप्तिः, सैकस्यां व्यक्तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्तीति चेन्न, एवमेकत्वस्यापि न क्वचित्परिसमाप्तिः स्यात्, न हि तस्य तत्रैव वृत्तिरन्यस्यैकत्वाभावप्रसङ्गात्। अत एकत्वसंख्यावत्त्वामेव व्यक्तौ द्व्यादिपरिसमाप्तिरित्यविशेष एव। एकव्यक्तिगता एकत्वसंख्याव्यक्तिर्नान्यत्रेति चेन्न, सत्ताव्यक्तेरप्येवम्भावप्रसङ्गात्, अननुगतत्वापत्तेश्च। सत्तैकैव जातिरूपा एकत्वन्तु प्रतिव्यक्तिभिन्नं गुणपदार्थ इति चेत्, नूनं वैशेषिकैर्विप्रलब्धोऽसि, कथमन्यथा सदेकप्रत्यययोरनुभवव्यवहारविशेषमपश्यन्नपि कानिचित्कानिचिदसम्बद्धान्यक्षराणि प्रलपसि। सत्त्वैकत्वयोः परापरत्वानुपपत्तेरेवं स्यादिति चेन्न, साम्यात् जातिपरापरत्वभौव्यमेव च क्वाप्येकन्यूनवृत्तित्वे प्रमाणं स्यात्। क्व तथेति चेन्न, शैलेऽनलस्यानुमायां क्व हस्तवितस्त्यादौ तदंश इत्यनिश्चयवद्दोषत्वात्, नत्वन्वस्तु मा वासीदेकत्वमनुगतं किमनेनात्र निरूपितेन, द्वित्वादि यत्र न समाप्यते अभिहिताभावत्रयं चास्ति तत्प्रत्यक्षमिति। मैवम्। अनुमित्यादित्रयेपि न त्रित्वं परिसमाप्तम् एवं सत्यन्यानि त्रीणि न स्युः। अन्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा त्रित्वव्यक्ति र्यान्यत्रेति चेन्न, त्रित्वव्यक्ते: कस्याश्चिदनुमित्यादित्रये समाप्त्यभावात्। काचिदपि त्रित्वव्यक्ति र्यत्र न समाप्यत इति चेन्न, अव्यापकत्वात्, प्रत्यक्षत्वस्य च त्रित्वव्यक्ते-श्चावश्यं सामानाधिकरण्यस्य वैशेषिकमतव्युत्पित्तेन भवताभ्युपगम्यत्वात्। अन्यथा प्रत्यक्ष-व्यक्तय स्तिस्रो न स्युः, तदेव च्चिरभिधीयते यत्र त्रित्वं परिसमाप्यते। किञ्च तथापि स एवाति-व्यापकतादोषः, त्रित्वेनावच्छिन्नास्वनुमित्यादि व्यक्तिषु त्वभिहितमभावत्रयमस्तीति तत्र प्र-त्यक्षलक्षणं गतमित्यति-व्याप्तिरुक्ता, तद्व्यावर्त्त-नाय भवताभिधीयते काचिदपि त्रित्वव्यक्ति र्यत्र न समाप्यत इति। न चैवमुक्ते सातिव्याप्ति-र्निवर्त्तते, तत्राप्युक्तविशेषणस्य विद्यमानत्वात्। न हि त्रित्वावच्छिन्ने तस्मिन् त्रित्वव्यक्ति-काचिदपि समाप्यते, त्रित्वलक्षणैकोपाध्यव-च्छिन्ने तस्मिन् त्रित्वव्यक्त्यन्तरं भवदप्याश्रया-न्तरमादाय वर्त्तते, न तु यत्रैव परिसमाप्यते यत्र चोक्तमुपाधिभूतं त्रित्वं त्रिषु, यदि त्रित्व-समाप्तिर्धर्मिषु दृश्यते तदा तद्दर्शनेन तत्र धर्मि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मात्रे लक्षणव्यावृत्तिः सिद्ध्येत्, न तु त्रित्ववि- शिष्टे धर्म्मिणि तस्मादतिव्यापकं दुरवस्थमेव । अभावत्रयञ्च त्रित्वोपाध्यवच्छेदेन समुदित- तामुपगतवति विशिष्टे धर्म्मिणि वर्त्तते, न त्वविशिष्टे प्रत्येकमभावत्रयावस्थानस्य तेषु वक्तुमशक्यत्वात् । अथ मन्यसे तादृशस्य विशि- ष्टस्य प्रमितित्वेनैव व्यवच्छेदः, नह्यभावत्रयवत् त्रित्वविशेषणमाश्रयकोटावन्तर्भाव्य तासु धर्म्मि- व्यक्तिषु प्रमितित्वं वर्त्तते, किन्तु तेषां धर्म्मिणां स्वरूपमात्रे उक्ताभावत्रयं प्रमितित्वञ्चैतद्य- त्रास्ति तत्प्रत्यक्षमिति हि ब्रूम इति, न भवतापि भिन्नधर्मावच्छिन्नस्यैव धर्म्मिणः प्रमितित्वम- भावत्रयवत्त्वञ्चावश्यमभ्युपगन्तव्यम् । तथा हि यदि प्रमितित्वस्य क्वाचित्कत्वे नियामकं नो- च्यते, तदा सर्व्वा प्रमितिः स्यात्, न वा काचि- दपि । "सर्व्वत्र सत्तासत्ता वा नियमेऽन्या- नपेक्षया । नियामकाद्धि भावानां क्वाचित्- कत्वस्य सम्भवः ।,, तन्नियामकाश्रये विशेषणी- भूतं वा वक्तव्यम् उपलक्षणीभूतं वा । आद्ये यदेव प्रमितित्वस्याश्रयविशेषणं तदेव वद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावत्वयस्यापि, तदा नित्वावच्छिन्नेऽनुमित्यादावभावत्वयस्य दर्शितत्वात्तत्र च प्रमितित्वेनापि नित्वावच्छिन्ने भवितव्यमिति प्रमितित्वान्न तद्व्यवच्छेदः। अथान्यावच्छिन्ने प्रमितित्वमन्यधर्मावच्छिन्ने चाभावत्वयसम्बन्धः, तदा नास्तित्वत्वेऽपि प्रमितित्वस्यैक धर्मविशिष्टाश्रयत्वलक्षणमेकाश्रयत्वं, विशिष्टे धर्मिण्याश्रितो धर्म्याश्रित एवेति कृत्वा च प्रमितित्वस्याभावत्वयसमानाश्रयत्वेऽनुमित्यादि नयेऽपि प्रसङ्गस्तदवस्थः। नापि द्वितीयः, उक्तलक्षणीभूतेन केनचिद्धर्मेण योऽसावुपलक्षितो धर्मो स एव खलु नित्वविशिष्टोऽपि विशेषणवतोऽपि यावद्विशेष्यवस्तुनो विशेष्यवस्त्वात्मकत्वात्। यथा दण्ड्यपि पुरुषः पुरुष एव, एवञ्च सत्युपलक्षितादनन्यभूते नित्वविशिष्टेऽप्यनुमित्यादौ प्रमितित्वमाश्रितं नियामकेनोपलक्षणेनोपलब्ध्याभेदव्यवस्थिततया तस्याव्यवच्छिन्नत्वात्। तथा चातिव्याप्तिर्लक्षणपायिता। तथाप्युपलक्षणेन नित्वविशिष्टतया नोपलक्षितोऽसौ धर्मो किन्तु स्वरूपेणेति चेन्न उक्तमत यदेव तदुपलक्षितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेव विशिष्टमपि, तथापि विशिष्टेन रूपेण तावन्नोपलब्धिगम्यमिति चेत्, सोपलब्धिः अविशिष्टेनापि तन्नोपलब्धितमेव, अन्यथा प्रकृतेपि वैयधिकरण्यापत्तिः। तदास्तामुल्लसत् पल्लववचनविलसितेनेति। तद्वेवं लक्षणान्तरेऽपि प्रतिवादितोऽयं दूषणसमूहः स्वयमूहनीयः। "एतदेव परामृश्य भट्टैरिदमुदाहृतम्। लक्षणस्याभिधानन्तु केनांशेनोपयुज्यते।," अन्याभिप्रायोक्तमपि हि तत्सामान्यतोऽप्युपपद्यमानमेवेति।

अनुमानमपि किमुच्यते। करणपक्षे लिङ्गपरामर्शोऽनुमानमिति चेत्, किं लिङ्गत्वं, व्याप्तस्य पक्षधर्मत्वमिति चेन्न, संशयस्योपलक्षणत्वे तत्र दृष्टापि व्यापकं तत्परामर्शोतिप्रसङ्गात् अतएव न, तस्य वर्त्तमानस्यातत्कालेऽप्युपलक्षणत्वात्। विशेषणत्वे चानुमाय व्यापकं धर्मिणा नाशवदृष्टेऽपत्तेः, पक्षधर्माद्धेतोः पक्षांशे विशेष्ये साध्यासिद्धिरीदृशञ्च वैयधिकरण्यमिष्टमेवेत्यतो नैवमिति चेन्न, पक्षमादाय वैयधिकरण्ये नियतसामानाधिकरण्यलक्षण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिलोपापत्तेः। तथापि विशेष्यमादाय साध्येवेति चेन्न, साध्यविशेषसिद्धिरपि यत्र व्याप्तिबलायातं सामान्यं, तत्र सामान्यप्रतीत्य-पर्य्यवसानबलादेवेति सामान्यविशेषसिद्ध्यनुप-योगिनी पक्षधर्मता त्वदिष्टा केवलं सिद्धसा-धनपरिहारायानुमितिकारणत्वेनैष्टव्या। सिद्ध-साधनञ्च न स्वार्थानुमाने दोष इति नानु-मिति मात्रहेतुनिवेशिनी सा। मोक्षमार्गेहि "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रेधात्मनि प्रमाणानां संप्लवः स्वार्थमिष्यत इति।,, एतेन संशययोग्यतापि निरस्ता। व्याप्यत्वमिति चेत् किं वस्तुगत्या व्याप्यस्वरूपेण परामर्शोऽनुमानं व्याप्यतया वा। नाद्यः अगृ-हीत व्याप्तेरपि धूमादिपरामर्शस्यानुमानता-प्रसङ्गात्। नापि द्वितीयः व्याप्तुग्राहकेखिल-प्रमाणस्यानुमानत्वप्रसङ्गात् तस्यापि व्याप्य-ग्राहितया अवश्यवक्तव्यत्वात्। अतएव द्वितीय तृतीयविशेषणे अपि निरस्ते धारावाहिनि तत्राप्यापत्तेः। गृहीतव्याप्तिना च युगपदुभय-ग्रहणे द्वावेतौ व्याप्यव्यापकाविति परामर्श-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यानुमानत्वप्रसङ्गात् । नच तदनुमानमेव असन्दिग्धतया पक्षत्वाभावेन तद्धर्मस्य हेतोः सिद्धसाधनवद् पक्षधर्मत्वात् । स्वार्थानुमाने नायं दोष इति चेन्न प्रत्यक्षलक्षणोपपत्त्या साक्षात्त्वासाक्षात्त्वविरोधापत्तेः । अव्यापकविषयत्वे सतीति चेन्न व्याप्यविषयत्वाभावप्रसङ्गात् । व्याप्यत्वं हि सप्रतियोगिकग्रहणं तथा चैतस्य व्याप्यमिदमिति गृह्यते तथा च सति व्यापकस्यापि विशेषणस्य ग्रहणमवश्यं वक्तव्यम् अन्यथा विशिष्टग्रहणस्य वक्तुमशक्यत्वात् विशेषतोऽव्यापकाविषयत्वे सतीति चेन्न अग्निधूमौ व्याप्तावित्याप्तोपदेशात्पूर्वं भूयोगृहीतवह्निधूमसाहचर्य्यस्य वह्निधूमाग्रहणकाले विमर्शवशात् वा जायमानव्याप्तिग्रहणस्य व्याप्यपरामर्शोऽनुमानं स्यात् न परामर्शः प्रत्ययमात्रं येन प्रथमग्रहणे प्रसङ्गः स्यात् । किन्नाम प्रत्यभिज्ञानमिति चेन्न विचाराद्वाप्तोपदेशाद्वा प्रतीत्य व्याप्तिं पुनराप्तोपदेशाद्विचारान्तराद्वा यैव मया व्याप्तिर्गृहीता सैवेयमिति प्रत्यज्ञानानस्य व्याप्तिज्ञानमनुमानं स्यात् । विशेषतो व्याप्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विषयत्वे सतीति चेन्न अव्यापकत्वप्रसङ्गात्। एकव्यक्तिविषयत्वस्य व्यक्त्यन्तरेऽसम्भवात्सामान्यतो व्यक्तिविषयत्वस्य चातिप्रसञ्जकत्वात्। किञ्च धूमवत्त्वादेर्यदा कदाचिदग्निसत्त्वं वा प्रतीयते तदानीं वाग्निसत्त्वं पर्वतादेः नाद्यः तदानीमिवान्यदाप्यर्थिप्रवृत्तेस्तत्र प्रसङ्गात्। न द्वितीयः तदानीमग्निसत्तया व्याप्तत्वानवगमात्। तदेति धूमकालोपेक्षित इति चेन्न क्वचिद्धेतोऽन्यदापि धूमस्यावस्थानमस्तीति कालान्तरस्यापि धूमकालत्वात्। तद्गतधूमकालोपेक्षित इति चेन्न तच्छब्दस्य व्यक्तिविशेषवचनत्वेऽप्रतीतव्याप्तिकत्वं यत्किञ्चिद्व्यक्तिवचनत्वे चोक्तदोषापत्तिः हेतोः पक्षधर्मतयाऽपक्षधर्मतादिधर्मः साध्यो मास्तु तत्सदस्तु कालान्तरे किं न स्यात्। तं कालमन्तर्भाव्य पक्षत्वे कथमस्यान्विष्कम्भं प्रवर्त्तते। धूमकालमन्तर्भाव्य चेद्दृष्टान्तमावर्त्तते तद्धूमकालश्चेदं गतः स्वहत्तिः।

कश्च व्याप्तिशब्दार्थ इति वक्तव्यम्। अविनाभाव इति चेन्न किमेकस्याव्यतिरेकेऽपरस्याभावोऽविनाभावपदार्थः उत एकस्य व्यतिरेके

CC-0. In Public Domain. Digitization by eGangotri

ऽपरस्य व्यतिरेकः । यद्यादयस्तदा व्यतिरेको-ऽन्वयार्थ इत्येकस्यान्वयेऽपरस्यान्वय इत्युक्तं स्यात् एवञ्च सति पार्थिवत्वलोहलेख्यत्वयोरन्वयो व्याप्तिः स्यात् । न काचित्कः सम्बन्धो व्याप्तिः सार्व्वत्रिकस्य तथात्वेन विवक्षितत्वादिति चेत् । किमिदं सार्व्वत्रिकत्वं सम्बन्धस्य सर्व्वासु तत् जातीयव्यक्तिषु विद्यमानतेति चेत् । नैवं सर्व-तज्जातीयव्यक्त्यपरिज्ञाने तदवधारणा । न च सर्व्वास्ता व्यक्तयो विशेषतो ज्ञातुं शक्याः तत्तत्प्रमितिकरणासम्भवात् इन्द्रियेण सा-मान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्व्वास्तज्जातीयव्यक्तयो गृह्यन्ते । यदनभ्युपगमे पक्षकसुद्धाच्च स्मायाः पुनप्रायेनमिति वाध्यस्यातिव्यालम्भसवाष्टीदिति चेत् । नैवम् । सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्व्वतज्जातीयव्यक्तिग्रहणे प्रमेयत्वादिव्याप्तिं गृह्णतः सार्व्वज्ञ्यप्रसङ्गात् कथञ्चिदपज्ञानं तेन ज्ञातमिति च सार्व्वज्ञ्यापादनमिति न प्रत्यक्षादि प्रमेयतया सर्व्वं तदा ज्ञायत एव न तु रूपा-न्तरेणेति चेन्न यदि रूपान्तरेण तत् प्रमेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा रूपान्तरवतोऽपि प्रमेयत्वाधारतया ज्ञेयमग्रहणात् अथ न प्रमेयं नास्त्येव रूपान्तरे तत् येन तु रूपेणास्ति तेन सर्व्वेण प्रमेयमिति यावद्विद्यमानाकारेण ज्ञातत्वप्रसङ्गः। तथात्वस्वीकारे च ज्ञायतां प्रमेयत्वदर्शिना भवतामसकौ चित्तवृत्तिः ततः अज्ञासे। स्यादेतत् यथा भेदोऽन्योन्याभाववैधर्म्यादिः पृथक् तथैक्यमपि वस्तूनां ततः प्रमेयत्वाद्यपि धर्मिणामेकत्वमेव अतः प्रमेयत्वेन ज्ञायमानं तत् सर्वमपि तेनैक्येन प्रतीयमानैकव्यक्त्यात्मकमेव ज्ञायमानं भवतीति कथं तदेकत्ववेदिनः सार्व्वज्ञम्। नच वाच्यं नानात्वमपि व्यक्तीनां प्रमेयमिति तदपि धर्म्मितया ग्राह्यमेवेति यतस्तदपि प्रमेयत्वादिना गृह्यमाणमेकमेव गृहीतं भवतीति। तस्मात् "एको भावस्तत्त्वतोयेन दृष्टः सर्व्वे भावास्तत्त्वतस्तेन दृष्टाइति।" तत्त्वत स्ताद्रूप्येण एकीभूता इति। तदेतदपि नोपपन्नं नानैकमिति व्याहतप्रतीत्यापत्तेः। अथ रूपान्तरेण नानात्वम् प्रमेयत्वादिना चैक्यमिति व्यवस्थिता न व्याघातः स्यात् तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रमेयत्वाद्याधारस्य व्यक्तिभेदस्य कृत्स्न ग्रह-
णात् सार्वज्ञापत्तिस्ताद्दश्येवेति । किञ्च सा-
मान्यलक्षणया प्रत्यासत्त्या तज्जातीय विशेष-
ग्रहणे तासु सर्वासु व्यक्तिषु सम्बन्धास्तित्वे किं
प्रमाणम् । सर्वव्यक्तिवत्सम्बन्धग्रहेऽपि व्याप्ति-
ग्राहकमिन्द्रियमेव प्रमाणमिति चेत्तर्हि क्वचि-
देवमवधारितस्य यद्यभिचारो दृश्यते तन्न
स्यात् इन्द्रियेण तत्र सम्बन्धस्य प्रमितत्वात् ।
भ्रान्तिस्तत्र सम्बन्धप्रतीतिश्च पश्चाद्‌बाधादिति
चेन्न सामग्र्यभेदे काचिद्‌भ्रान्तिः काचिद्-
भ्रान्तिरिति विभागानुपपत्तेः दोषादोषवै-
चित्र्यविवेचनस्य च दुष्करत्वात् । कार्य्यभेदादेव
सामग्रीभेदोऽप्युन्नेय इति चेत् उन्नीयतांस्
स एव तु कीदृगुन्नेय इति वाच्यं न तावत्सार्व-
त्रिकसम्बन्धभावाभावात्मकस्तदानीं भाविनां
सम्बन्धानामसत्त्वेनाकारणत्वात् । सामान्यतश्च
तज्जातीययोः सम्बन्धस्य प्रतीतेः पूर्वं सत्त्वं
भ्रान्त्यभ्रान्तिसाधारणं क्वचिदपि सम्बन्धाभावे
भ्रान्तेरनुत्पादात् । किमेतावता अन्यएव
तर्हि कार्य्यभेदात्कारणभेदः कल्पयिष्यत इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चेत्। स किमिन्द्रियसहकारिभूतः करणा-
न्तरमेव वा कल्पनीय इति वाच्यम्। ना-
इन्द्रियस्य आविर्भूतसम्बन्धांशे प्रमाणत्वक-
नायां प्रमाणाभावात् प्रत्युत व्युपरतेन्द्रियव्या-
पारस्यापि विचारयतः पूर्व्वप्रतीतसम्बन्धधर्मि-
द्वयस्य व्याप्त्यवधारणाद्दर्शनात्। तदापि मनो-
ऽस्तीन्द्रियमिति चेत् अस्तु तस्मिन् कार्य्ये म-
नसः करणत्वे तु प्रमाणाभावः। अवश्यं प्रति-
कल्पनीयेनान्येनैव सर्व्वानुपपत्त्युपशान्तेः का-
रणत्वमात्रं चक्षुरादिजन्मज्ञानमनसस्तत्र स्या-
चक्षुरादिवत्कारणम् अन्यद्देव तत्कल्पनीयमि-
सप्तममिन्द्रियं प्रमाणान्तरं वा प्रसज्येत। अ-
न्यथा चाक्षुषादिप्रतीतावपि चक्षुरादेः कार-
णत्वं न स्यात्। शक्यते तत्रापि वक्तुं मन ए-
तत्र सुखादिप्रतीतिवत्कारणं चक्षुरादय-
सहकारिमात्रम्। नापि द्वितीयः इन्द्रिया-
न्तरप्रसङ्गात् प्रमाणान्तरप्रसङ्गाद्वा। ना-
विनाभाव एव एकस्य व्यतिरेकेणापरस्या-
व्यतिरेकस्तन्निषेधोऽविनाभाव इति द्वितीय-
पक्षः। एवं हि लोहलेख्यत्वव्यतिरेकस्य पार्थि-

CC-0. In Public Domain. Digitization by eGangotri

त्वव्यतिरेकश्च क्वचिदस्तीति पार्थिवत्वलोह-
लेख्यत्वयोरप्यविनाभावः प्रसज्येत। सार्व्वत्रि
व्यतिरेकयौगपद्यं विवक्षितं न तु क्वाचित्कम्
अत एवोच्यते। अविनाभावनियम इति चेन्न
सार्व्वत्रिकान्वयावधारणनिरासन्यायेन सार्व्व-
त्रिकव्यतिरेकावधारणस्याप्यशक्यत्वात् शक्य-
त्वेवान्वयावधारणमेवास्तु सार्वत्रिकं व्यतिरे-
कावधारणकुटिलिकया। यत्र विपक्षे वृत्तौ
बाधकमस्ति तयोरन्वयोर्व्याप्तिरिति केचित्
तन्न यत्तु विपक्षे वृत्तौ बाधकं तत्प्रमाणं वा तर्को
वा स्यात्। आद्ये न तावदिन्द्रियं तदसम्भवात्
अन्यथा व्यभिचाराव्यभिचारसंशयो न स्यात्
नाप्यनुमानम् अनवस्थाप्रसङ्गात् नाप्यर्थापत्तिः
अनुमानव्यतिरेकात् व्यतिरेके तु यदि लिङ्ग-
व्यतिरेकेण लिङ्गस्यानुपपत्तिस्तदा तत एव
लिङ्गिसिद्धेः कृतमनुमानेन। अनेवम्भावे च
तयोः किमायातम्। अस्तु वा कथमपि ताव-
दर्थापत्तिर्बाधिका तथापि कीदृगभ्युपगम इति
वक्तव्यं किं विपक्षवृत्तिबाधकसमीचीनो यत्र
क्वचिदन्वयोर्व्याप्तिः उत तत्सहितः सार्व्वत्रिको-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽन्वयः उत किन्नोविशेषणवैषयेन तत्सधी चीनः सामान्यतोऽन्वयोव्याप्तिः उत सार्वत्रिका न्वयः स च विपक्षे बाधकादवगम्यते। नाद्य विकल्पानुपपत्तेः तथा हि किं विपक्षे इति बाधकं सर्वव्यक्तिविषयम् उत सामान्यविष यम्। आद्ये यत्नाप्यनुमानं प्रवर्त्तनीयं तत्राव श्योपस्थाप्यया अन्यथाभावबाधकभूतयार्थाप त्त्यैव साध्यसिद्धेः व्यर्थमनुमानव्यसनेन। द्वि तीये क्वचिद्व्यभिचारेऽपि क्वचिदव्यभिचारसा म्यत्य बाधकस्य चरितार्थत्वं धूमवत्तामात्र मग्निमत्तामात्रव्यतिरेकीत्येवं रूपो हि सामा न्यतोविपक्षपक्षः तत्र च बाधकं तयोरविरो पर्यवस्यति। अविरोधश्च क्वचित्साहित्याद्भव त्येवेति पार्थिवत्वलोहलेख्यत्वयोरप्येवं भूत वत्राप्तत्वप्रसङ्गः। नापि द्वितीयः विशेषणवैय र्थ्यात्। सार्वत्रिकोन्वय इत्येवोच्यताम्। न सोऽपि सङ्गत इत्युक्तम्। नापि तृतीयः बाधकस्य सामान्यविशेषविषयताविकल्पोक्तयुक्त्यैव नि रस्तत्वात्। नापि चतुर्थः तथा हि यद्धूमवत् तदग्निमदित्यत्रेदमन्वयस्य सार्वत्रिकत्वं वाच्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्यं तत्सर्व्वासां धूमव्यक्तीनामग्निसम्बन्धित्वं तद्यदि व्याप्तिग्रहकाले गृहीतं तदा पक्षस्यापि धूमवद्यक्तेरग्निमत्त्वं प्राक् गृहीतं स्मर्यतएवेति गतमनुमानम्। सामान्यतोऽग्निसत्त्वं तस्यापि गृहीतमेव विशेषतस्त्वनुमीयत इति चेन्न विशेषत इति किमग्निसत्त्वस्य विशेषोव्यक्तिरूपोविवक्षितः उत कालदेशादिसम्बन्धस्तस्य। नाद्यः सर्व्वव्यक्तीनां व्याप्तौ प्रतीतत्वेन भवतैवाङ्गीकारात्। नापि द्वितीयः अग्निमद्रूपतया स्मृतस्य पक्षीभूतस्य धूमविशेषस्य चक्षुरादिभिरेव पर्वतत्वादिदेशकालविशेषादिमत्तया परिच्छेदात्। यथा प्राक् प्रत्ययाहितसंस्कारसध्रीचीनैश्चक्षुरादिभिः परिच्छिद्यमानेदानीं भावदेशविशेषावस्थानादेः स एवायमिति प्रत्यभिज्ञायमानताङ्गीक्रियते। तथैवाबाधस्तु कृतमनुमानेन। नाप्युपमानं बाधकं विपक्षे शक्यं वक्तुं तस्य नियतविषयत्वेनैतादृशे विषयेऽनुदयात्। नापि शब्दः आप्तस्योपदेष्टुरभावे व्याप्त्यनवगमप्रसङ्गात्। अभावस्तु कदाचित् स्यात् सोऽपि निरूप्यमाणो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटते एवं स वाच्यो यदि वह्निव्यतिरेकेण धूमः स्यात्तदा तथोपलभ्येत न चोपलभ्यतेऽतोऽनुपलब्धेर्नास्ति तद्व्यतिरेकेणेति। तच्च न तथा हि क्वचिद्व्यभिचारादर्शनाद्वाऽयमभाव: प्रवर्त्तते सर्वत्र व्यभिचारादर्शनाद्वा। नाद्यः पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गात् न द्वितीयः सर्वत्र योग्यानुपलम्भो वा अनुपलम्भमात्रं वा वाच्यम्। नाद्यः सर्वत्र योग्यानुपलम्भासम्भवात्। नापि द्वितीयः पार्थिवत्वलोहलेख्यत्वयोरपि सम्भवात्। तत्र वज्र एव व्यभिचार इति चेन्न तदीयादर्शनदशायां व्यभिचारानवगमात्। तद्दर्शनदशायां तावदस्ति व्यभिचारो यत्र तु न कदाचिदपि व्यभिचारदर्शनं तत्र व्याप्तिरिति चेत्। अत्रापि व्यभिचारो न दृश्यत इत्यत्रापि नियामकादर्शनात्। नापि विपक्षे बाधकस्तर्कोवाच्यः तर्कस्य व्याप्तिमूलत्वाभ्युपगमे अनवस्थाप्रसङ्गात्। तदनभ्युपगमे मूलशैथिल्येन तर्काभासत्वापातात्। अथ ब्रूषे न शक्यमिदं वक्तुं तथाह्यग्निधूमव्यभिचारशङ्कायां बाधकस्तर्कोऽयमभिधीयते यदि धूमो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽग्निं व्यभिचरेदकारणकः सन्नित्यः स्यात् न स्यादेव वा सदायमनुत्तरस्तर्कः तत्र शङ्कायां व्याघातापत्तेः । तदेवत्वाशङ्कते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातायोदोषा नावतरन्तीति लोकमर्य्यादा एवं सर्व्वत्रानुत्तरस्तर्को बाधकोऽभिधेय इति । नैवम् । किमित्येवं शङ्कितव्यं तद्धेतुफलभाव एव न भविष्यति । एवन्तु शङ्कितव्यम् अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति । न च वाच्यमेवं हि सति धूमस्यैकजातित्वं न स्यादिति क्वचिदिन्द्रियजन्यत्वे क्वचिदनुमानादिजन्यत्वेऽपि ज्ञानैकजातित्ववत्तदुपपत्तेः । तत्रेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं न ज्ञानतायामिति चेन्न ज्ञानत्वस्याकस्मिकत्वपरिहारार्थं तत्कारणस्यानुगतस्य भवतावश्यं वक्तव्यत्वात् । धूमेऽपि वह्नेर्व्विशेष एव प्रयोजकतस्य तद्वच्छङ्कितुं शक्यत्वात् । न दृश्यते तावदग्निप्रयोज्यो धूमे विशेष इति च न वाच्यम् एवं हि सति तद्दर्शनस्याघाततो हेत्वन्तरप्रयोज्यावान्तरजात्यदर्शनेनायोग्यतया विकल्पप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादुपपत्तेः । यदा तु हेत्वन्तरप्रयोज्यो धूमस्य विशेषो दृश्यते तदासौ विकल्पिष्यतइति सम्भावनाया दुर्निवारत्वात् । अस्त्यात्ममनोयोगोऽनुगतं कारणं ज्ञानोत्पत्ताविति चेन्न यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादितीच्छादयोऽपि ज्ञानं प्रसज्जेरन् । यदित्वदृष्टविशेषो वा शक्तिभेदो वा ज्ञानत्वजाति र्वा ज्ञानप्रागभावो वा तत्रानुगतं कारणमुच्यते तदा तदितरत्रापि वह्निव्यभिचारे धूमस्यैकजात्यप्रयोजकतया शक्यत एव शङ्कितुम् दृष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनमिति चेत् अस्तु दृष्टे तन्निश्चयः अत्रापि व्यभिचारो न दृश्यत इत्यत्र नियामकाभावात् शङ्क्यते एवं शङ्कमानस्य भवतो न क्वचिदनुमानं स्यादिति प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वोकर्त्तव्येष्वनुमानेष्वेवाप्रशङ्कानवगमात् स एव व्याघात इति चेन्न धूमवद्वह्नेरपि वह्निकारणविशेषानुमानस्यैवं सति सदनुमानत्वप्रसङ्गात् । सामग्रीसाम्येन प्रमाप्रमावैचित्र्यानुपपत्तेः । साधारण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मदर्शनविशेषादर्शनादौ सत्यपि शङ्काया-
श्चानुदये सामग्र्यां सत्यामपि कार्य्यानुदया-
त्परप्रतिपत्तुरुत्पादनार्थं वचनादिरूपां प्रतिपत्ति
सामग्रीमुत्पादयितुं यतमानस्य भवतोऽपि स्व-
क्रियाव्याघात स्तुल्यः। व्याघातस्यैव विशेष-
त्वात् तद्दर्शनेन शङ्कासाम्ग्र्येव नास्ति प्रत्यक्षे
कुतो व्याघातसाध्यमिति चेन्न तद्धि न तावत्
आहारादिकारणाज्जायमानमेष्टव्यं कूटविष०
यस्य तस्यातिप्रसञ्जकत्वात्। कूटभिन्नः प्रस-
ञ्जकः प्रमितस्यैव स्यादिति चेन्न तस्य तर्कावि-
सरे निरस्तत्वात्। तस्माद्यदैतद्व्याघातरूपस्य
विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते तत्
किं प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यम्
तर्काद्वा यदि प्रथमः शङ्कास्तित्वमपि तेनैव
प्रमाणेनोपेयं शङ्कायां सत्यां व्याघातात् यदि
न शङ्कां विनापि व्याघातः तदा शङ्कमाना०
शङ्कमानयोर्व्याघातस्य साध्यं सिद्धमेव भवतु
शङ्कायामपि तत्प्रमाणं किमेतावता प्रथमोप-
जातशङ्काप्रबलस्याविस्यतस्य व्याघातरूपस्य
विशेषस्य दर्शनात्तु शङ्कान्तरं नोत्पद्यत इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न व्याघातसत्ताकाले तदवलम्ब्यया शङ्कयैव शङ्काप्रवाहव्यभिचारता तस्याः शंकाया व्युपरमे च तदवलम्बिनो व्याघातरूपस्य विशेषस्याभावात् कः शङ्कान्तरोत्पत्तेर्व्वारयितेति वक्तव्यं मा नाभास्तु तदा व्याघातात्मा विशेषस्तदवगमस्तदाहितो वा संस्कारस्तावदस्ति। विशेषावगमतत्संस्कारौ च शङ्काविरोधिनौ। ननु स्वरूपेण काचिदपि विशेषस्यावस्थानं तथेति चेन्न यावदाश्रयभाविनो विशेषस्य पूर्व्वस्थितस्य यद्दर्शनं तदाहितो वा संस्कारः तस्य कालान्तरे तत्प्रतिधर्म्मसंशयविरोधित्वे अवयविपाकपक्षे कुम्भस्य परमाणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्व्वं श्यामं तया ज्ञातस्य कालान्तरे सम्भावितया कस्य पाकजन्यरूपविशेषवत्तायां संशयो न स्यात्। यदि च शङ्कायां व्याघातस्तदा शङ्काश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं माभूत्। यदि तु व्यभिचाराशयस्तदा व्यभिचारः स्यादेव व्याघाताश्रयस्य व्यभिचारस्यापि प्रसिद्ध्यापत्तेः। अनादिसिद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिकाले तर्कों इति चेन्न तद्बुद्धेः प्रमिति-त्वासिद्धेः शरीरे स्वात्मप्रत्ययस्य तादृशस्यार्थ-प्रमात्वोपगमात् अनादित्वासिद्धेश्चोभयत्वावि-शेषात् । नापि यत्र व्यभिचारः शङ्क्येत तदा व्याघातः स्यादित्येवंरूपात्तर्काद्व्याघातावगमः व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्का-भासत्वापातात् तादृशस्यापि व्याघातोपनाय-कत्वे व्याघातापत्तेश्च साध्यं शक्यत एव तर्का-भासाद्भवतोऽपि व्याघात उपनेतुम् । अथ त-र्कस्य व्याप्तिर्मूलभूताभ्युपगम्यते तत्रापि व्यभि-चारशङ्कायां पुनरनवस्थैव तत्रापि व्याघातापा-दने पुनरित्यनवस्थैव । "तस्मादस्माभिरप्य-स्मिन्नर्थे न खलु दुष्पठा । त्वद्गाथैवान्यथाकार-मक्षराणि कियन्त्यपि । व्याघातो यदि श-ङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधि-राशङ्का तर्कः शङ्कावधिः कुतः ।" अव्यभि-चारश्चैकपरित्यागव्यवच्छेदेनापरान्वयः सम-कालदृष्टे नष्टेऽदृष्टः शङ्क्येत इत्याहुः ।

स्वाभाविकः सम्बन्धो व्याप्तिरित्यपरः । स प्रष्टव्यः कस्य स्वाभाविकः किं सम्बन्धिनोस्तता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्य। न चरमः वैपरीत्यापत्तेः। आद्ये स्वाभाविकशब्दार्थ इति प्रष्टव्यं किं सम्बन्धिस्वभावाश्रितः अथ सम्बन्धिस्वभावजन्यः अथ सम्बन्धित्वविवर्जितस्वभावानतिरिक्तः अथ सम्बन्धिस्वभावव्याप्यः अथवा सम्बन्धिस्वभावादन्येन न प्रयुक्तः उतान्य एव कश्चिद्विवक्षितः आद्ये पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गः। न द्वितीयः अतिव्याप्तेरव्याप्तेश्च अत एव न तृतीयः। नापि चतुर्थः व्याप्तरनिरुक्त्या व्याप्यत्वनिरुक्तेः। सम्बन्धस्य व्याप्यत्वे च सम्बन्धिनोर्व्यापकयोः सम्भावितसम्बन्धाधिकदेशकालतया एकसम्बन्धिदर्शनेऽपरानुमानाय नियामकायोगात्। नापि पञ्चमः न प्रयुक्त इति यदि न जनितस्तदा सम्बन्धस्याकृतकत्वपक्षेऽन्येनेति विशेषणवैयर्थ्यमकृतकस्य सम्बन्धिस्वभावेनाजनितत्वात्। सम्बन्धस्य कृतकत्वपक्षे स्वरूपासिद्धिरेव स्यात्। सामग्र्याः सर्वसम्भवादन्ततः कालदेशादृष्टादिभिरपि तज्जन्यत्वस्यावश्यवक्तव्यत्वात्। नापि षष्ठः पक्षः तस्य निर्वक्तुमशक्यत्वात्। एवमेव विकल्पप्रायं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरमविकल्पः सर्व्वत्रोपन्यस्य दूष्यो न्यूनत्वशङ्का-भयादिति ।

अनौपाधिकः सम्बन्धो व्याप्तिरित्यपरः। स प्रष्टव्यः कोऽयमुपाधिर्नाम यच्छून्यत्वमनौ-पाधिकत्वम् उपाधिः साध्यव्यापकत्वे सति सा-धनाव्यापकः । अयञ्च "एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः । साध्याभावाविनाभावी स उपाधि र्यदत्ययः ।,, इत्यस्य व्यतिरेकमुखस्य यदत्ययः स उपाधिरिति योज्यमानस्य पर्य्यव-सितोऽर्थः । तद्वलम्भूता हि व्याप्ति र्जवाकुसुम-रक्ततेव स्फटिके साधनाभिमते च कास्तीत्यु-पाधिरसावुच्यते तदिदमाहुः । "अन्ये पर-प्रयुक्तानां व्याप्तीनामुपजीवकाः। तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा ।,, स चोपाधि-र्निश्चित इवाशङ्कितश्च यत्रेदमुच्यते । "याव-द्व्यतिरेकित्वं शतांशेनापि शङ्क्यते। विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबलम्,, मिति चेन्न साध्यव्यापके पक्षेतरत्वेऽपि प्रसङ्गात् । तद्व्यति-रिक्त इत्यपीति चेन्न बाधोन्नीतस्य तस्या-व्यापनात् अन्यथा निरुपाधिसम्बन्धित्वे बाधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धेः। यदाह बाधेन वोपाधिरुन्नीयते
न्येन वेति न कश्चिद्विशेषः। एतदर्थमपि वि
षणीयमिति चेन्न तथापि साधनाव्याप
सतीति तद्व्याप्त्यनवधारणे न शक्यावधार
एवं साध्यव्यापक इत्यपि। अथ मन्यसे अदृ
व्यभिचारसाध्यत्वं साध्यव्यापकत्वं न वस्तुग
व्यभिचारिसाध्यव्याप्यापाततोऽदृष्टव्यभिचार
साध्यत्वसम्भवात् तस्याप्युपाधित्वापत्तेः। न
च्यत इति च निरूपयितुमशक्यम्। व्याप्ति
ग्रहकाले च साध्यत्वाभावेन तदव्यभिचार
कथमवधार्य्यः साध्यं व्यापकमपेक्षितमि
चेन्न व्याप्त्यनवगमे व्यापकार्थानवगमात्
सम्भावितव्यापकभावो व्यापकोऽपेक्षित इति चे
व्यापकस्यानिरुक्तौ किंरूपतया सम्भावना
स्यात्। अथ साध्यव्यापक इत्येव भद्रं तदानी
साध्यत्वाभावेऽपि साधयितुमर्हत्वस्य विवक्षित
त्वात् न कथं ह्यवगन्तव्यासिद्धमेव साधयि
मर्हं सिद्धं नेति व्यापकत्वादीति वक्तुमशक्य
त्वात्। न च साधनाव्यापकत्वं सर्व्वत्र निय
शक्यम्। स श्यामो मैत्रतनयत्वादित्यत्र शाका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्याहारपरिणतिपरम्परया मैत्रतनयेऽआवश्य-
दुरधिगमत्वात्। यत्रोक्तलक्षणस्य निश्चायकं
प्रमाणमस्ति तत्र निश्चितोपाधित्वम् अन्यत्र
शङ्कितोपाधित्वं मैत्रतनयत्वव्याप्यशाकाद्या-
हारपरिणतिपरम्परया श्यामत्वग्राहित्वेन निया-
मकाभावादिति चेन्न मैत्रतनयत्वेनैव हेतुना
तस्यापि प्रसाधने तच्छङ्काया अपि छेत्तुं शक्य-
त्वात्। तत्रापि तत्तत्सामग्र्युपाधिपरम्परा-
भिधाने च तस्याः तस्या अपि मैत्रतनयत्वेनैव
साधनस्य कर्तुं शक्यत्वात्। अनवस्थैवं स्या-
दिति चेन्न उपाध्युपन्यास एव कुतोऽनवस्था न
स्यात् साध्यसामग्र्या उपाधित्वे धूमानुमान-
धाराख्यात्। एवञ्च साध्यसामग्र्युपाधित्व-
निरवच्छेदार्थमपि लक्षणं विशेषणीयं श्याम-
त्वादौ साध्ये शाकाद्याहारपरिणतिप्रारम्भ-
प्रापकत्वादि तस्मिन् साध्ये श्यामत्वादेरुपाधित्वसत्वा-
देन कथमुपाधिरपि साधयितुं शक्यत इति
चेत् नैवं प्रत्येकं द्वयोरपि मैत्रतनयत्वादिना
साधने साधनाव्यापकत्वस्य शङ्कितुमशक्यत्वात्।
अन्यथा सकर्तृकत्वे साध्ये अदृष्टजन्यत्वम् अदृष्ट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्यत्वे च सकर्तृकत्वमुपाधिरित्यसंचारसि
स्यादेवं बुद्धिमत्पूर्वकत्वे प्रयत्नवत्पूर्वकत्वं प्र
यत्नवत्पूर्वकत्वे च बुद्धिमत्पूर्वकत्वमेवं वह्नि
जात्याक्रान्तवत्त्वेऽपीश्वरजन्यतेजोवत्त्वं तत्र
वह्नित्वजात्याक्रान्तवत्त्वमुपाधिः स्यादित्या
दिश्च सनुमानव्याकुली स्यात्। अत एव साध्य
साधनसम्बन्धं प्रति व्यापकत्वं साध्यव्यापकत्व
मित्यपि प्रत्युक्तम्। यत्राप्युपाधिर्निश्चीयते
तत्राप्यतीन्द्रियोपाधिविषये तदभावस्य साध
नाव्याप्तत्वमनुमेयतायां सोपाधीक्रियमाणे
साधनेनैव सत्प्रतिपक्षस्य कर्तुं शक्यत्वात्
तथा सति तत्र शङ्कितोपाधित्वमेव निर्व्यू
स्यास्यतीति चेत्। एवं नु वाको नियतमर्यादा
परं मन्दमन्दत्वं न प्रतिपन्नं तथा हि लोकत
निश्चितोपाधिभाव आशङ्कितोपाधिकत्वमपि
तदनुकूलं मन्यते कोऽन्यो जितलज्जात्। नन्व
कचिन्निश्चितोपाध्यनभ्युपगमे तच्छङ्का प्रव
यत्र प्रत्यक्षेणोपाधिनिश्चयस्तदेव तद्दर्शनस्या
भविष्यतीति चेन्न ऐन्द्रियकबाधे तज्जातीय
स्यातीन्द्रियस्याप्रयोजकीक्रियमाणेन हेतुने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधयितुं शक्यत्वात् । नच यद्येकत्वैकजातीयमैन्द्रियकं तदन्यत्वैन्द्रियकबाधे हेतुबलादतीन्द्रियं न प्रसाध्येत पाकदर्शनात् जठरानलादि साधनाव्यापकत्वे सति साध्यव्यापक इति च शाकाद्याहारपरिणतिपरम्परासाध्यं न व्याप्नोतीत्यव्यापकतादोषः । न हि शाकादित्वं नाम किञ्चिदेकमस्ति यत्साध्यं व्याप्नुयात् । अस्तु वा कथमपि तथापि श्यामत्वं न व्याप्नोति इन्द्रनीलशिलादिश्यामत्वस्याहारजन्यत्वात् । शरीरश्यामत्वं साध्यं तच्च व्याप्नोत्येवेदमिति चेन्न व्याप्तावुपाधेरभिधेयत्वात् नच पुरुषश्यामत्वेन व्याप्तिः । हेतुपक्षधर्मतयैव हि साध्यं पक्षधर्मः सिद्ध्यति न व्याप्त्या अन्यथा पुरुषःपदस्य व्यवच्छेदकस्याविशेषणत्वापातात् । परम्परासम्बन्धिकज्जलादिलेपश्यामलत्वव्यवच्छेदकत्वे च संयुक्तश्यामपुरुषसमवेतश्यामत्वस्य परम्परासम्बन्धिनः कथं व्यवच्छेदः स्यात् । नच साध्यसाधनसम्बन्धादृष्टव्यभिचारत्वं साध्यव्यापकत्वं सा रूपसाक्षात्कृतिकरणादेस्तैजसादित्वे साध्ये भूतोद्भूतरूपवत्त्वादेरुपाधित्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधनेनापि च विशेषणतया निवेश्येन यदि केवलसाध्यव्यापकं व्यवच्छेद्यं तदा तस्य व्यभिचारे शङ्काधानक्षमस्याप्युपाधित्वं न स्यात् अथ न किञ्चिद्व्यवच्छेद्यं तदा विशेषणत्वासिद्धिरेव। न हि प्रयोजनमात्राद्विशेषणमर्थवद्भवति किन्तु किञ्चिद्व्यवच्छेदादिति। अन्यथा शरीरजन्यत्वमिवाकर्तृकत्वे व्यक्तमसिद्धौ पर्यवस्येदिति। किञ्च आभासे व्यतिरेकिणि पक्षधर्महेतौ जीवच्छरीरं पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत् प्राणादिमत्त्वादित्यादौ कस्मिंदनुपाधिलक्षणं व्यवस्थाप्यं नह्याभासे व्यतिरेक्यनुमानात्मनि यत्साध्यं तदुपाधिनाव्याप्तमिष्यते तस्य पराभिमतस्य क्वचित् सिद्ध्यापत्तेः। अतिरेकव्याप्तावुपाधिश्चेत् तर्हि व्यतिरेके यद्व्याप्यं तस्य व्याप्यउपाधिरवश्यं मन्तव्योऽन्वयोपाधेरन्वये साध्यान्वयापत्तिरिवोपाधेर्व्यतिरेक व्याप्तरवश्यम्भावस्याभ्युपगम्यत्वात् उपाधेर्यद्व्यापकं तद्व्यतिरेक उपाधिर्व्यतिरेकव्याप्यतया मन्तव्य इति परसाध्यापत्तिः। असमव्याप्तिकयोरन्वयव्याप्तिसाध्यसाधनभाव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैपरीत्येन व्यतिरेकव्याप्तेरिति । नच दोषान्तरमेव तर्हि वाच्यमिति वाच्यं हेतोः पक्षधर्म्मत्वस्थितौ व्याप्तिन्नत्यर्थं त्वयोपाध्युपगमध्रौव्यात् । भवतु वा या काचिद्व्याप्तिर्नाम तत्सत्त्वएवानुमितिभावात् तस्याश्चानुमितेश्च व्याप्तिरेष्टव्या ततश्चात्माश्रयः । तद्भेदे वाननुगमाविनिगमौ स्यातामिति व्याप्तिपक्षधर्म्मते अनुमितिं भावयत इति वदन्ति ।

तत्र केयं पक्षधर्म्मता । पक्षाश्रितत्वेति चेन्न नैयायिकादीन् प्रति प्रमेयत्वस्याहेतुत्वप्रसङ्गात् विषयविषयिभावस्य ज्ञेयज्ञानस्वरूपातिरिक्तस्यानङ्गीकारात् तयोश्च ज्ञेयाश्रितत्वायोगात् । कस्तायं पक्षोनाम यद्धर्म्मत्वं पक्षधर्मत्वं सिषाधयिषितधर्म्मधर्मीति चेन्न सिषाधयिषा हि प्रतिपिपादयिषा वा स्यात् प्रतिपित्सा वा । आद्ये स्वार्थानुमित्यनुदयप्रसङ्गः । द्वितीये वासुरभिगन्धानुमेयकुत्सितरसविषय स्वार्थानुमित्यनुदयप्रसङ्गः । न चानवधारितधर्म्मधर्मी पक्षः हेतुमत्तयाप्यनवधारणेऽनुमानोदयनिदानभावासम्भवात् । अवधारणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षानवधारितधर्मित्वानुपपत्तेः। न चानवधारितहेतुविषयधर्माधर्मीपक्षः। तथा हि केनानवधारितधर्मा न तावदनुमानप्रयोक्त्रा स्वयमज्ञाते परं प्रत्यप्रयोगात्। प्रतिवादिनेति चेत् प्रतिवादिविदितेऽप्यर्थे वादितया परस्परविद्योत्कर्षापकर्षनिरूपणार्थमनुमानदर्शनात्। तथानवधारणं यत्किञ्चिद्धेतुविषयधर्मगोचरं वाभिप्रयोक्तव्यहेतुविषयगोचरं वा। न तावदाद्यः अग्निमत्त्वनिश्चयदशायामपि तत्तद्धेतुविषयबहुतरापरधर्मानवधारणात् धूमं प्रति पर्वतस्य पक्षधर्मित्वप्रसङ्गात्। न द्वितीयः तथापि तत्र प्रसङ्गात् तद्धेतूनामपि वादिप्रयोज्यत्वात् असाधारणविवक्षायाञ्चाननुगमात् दूतरेतराश्रय दोषाच्च। पक्षधर्मत्वेन हेतुत्वनिरूपणात् व्याप्तपक्षधर्मत्वस्य हेतुत्वात् हेतुना च पक्षनिरूपणात् स्वार्थानुमाने च हेतोरप्रयोज्यत्वात् पक्षाभावेनानुमानानुदयप्रसङ्गात् विरुद्धहेतौ च पक्षत्वासत्त्वप्रसङ्गात् तत्र साध्यस्य तद्धेतुविषयत्वाभावात् हेतोरेव च साध्यविपरीतव्याप्तत्वा दुष्टत्वात्। एतेन सन्दिग्धसाध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धर्माधर्मौ पक्षः साध्यत्वञ्च स्वपरार्थानुमानसाधारणमुत्पाद्यज्ञानत्वमिति निरस्तम् प्रतीतिव्याप्तिबलेन सामान्यतोव्यापकावगाहनप्रवृत्तं विशेषमादाय परं पर्य्यवसाययि व्याप्यसामर्थ्यं सेति चेन्न तस्याः सामान्यविषयाया अनुपपत्तेरसिद्धेः व्याप्तिवत्सम्भवात् अनुपपत्तित्वे व्याप्त्यनुप्रवेशात् अधिकविषयाकाङ्क्षित्वे निरव्य व्यापारापत्तेः मानान्तरत्वापत्तेर्वा। विशेषविषयायाश्चानुपपत्तित्वेऽतिप्रसङ्गात्। पक्षधर्म्मतया च यदि साध्यव्यक्तिभेदः सिद्ध्येत् तर्ह्यनुमाय तां प्रत्यक्षेण पश्य न पुंशब्दात् पुरुषानुमायी प्रत्यक्षेण पुरुषद्वयदर्शने तद्विशेषासंशयी स्यात्। प्राग्विशेषादर्शनात्तथा स्यादिति चेन्न पश्चात्तत्र तद्दर्शितान्न संशयीतेति।

उपमानमपि किमुच्यते। सादृश्यज्ञानमुपमानमित्येके तन्न स्मृतावपि प्रसङ्गात्। अनुभव इत्यभिधाने च सदृशाविसावितेन्द्रियजेऽपि प्रसङ्गात्। सोऽपि गवयो गवा सदृशो गवयत्वात् गवयान्तरवदित्यनुमानस्यापि तत्त्वा-

CC-0. In Public Domain. Digitization by eGangotri

पत्तेः। एवमाप्तोक्तिनेऽपि। किञ्चोपमिति-
लक्षणमिदमुपमितिकरणलक्षणं वा स्यात्।
नाद्यः सादृश्यस्योपमेयत्वापत्तेः। सदृशे चोप-
मेयव्यवहारेऽस्ति चन्द्रोपमेयं मुखमित्यादि
सदृशमितिः सेति चेन्न अश्वादिकरणसम्भवे
तदुदाहरणासिद्धेः। नापि द्वितीयः सादृश्य-
ज्ञानस्य सर्वस्यासम्भवात् प्रमाणान्तरवत्प्रमा-
णान्तरव्यापारफलजनकताया दर्शयितुमशक्य-
त्वात्। नच सादृश्यमनुगतमस्ति मुखसादृश्यस्य
हस्तसादृश्यस्य च भेदेनैवोपलम्भात्। नच सा-
दृश्यरूपत्वमनुगतं तेष्वपीत्यदोषः। तथापि
सादृश्येन सह सादृश्येऽनेकस्यत्वादौ सादृश्य-
रूपत्वाश्रिते सादृश्यरूपत्वस्याश्रयणाभ्युपगमे
परस्पराश्रयभावोऽनभ्युपगमे वाननुगमः।
तयोः सादृश्यानभ्युपगमे वान्यत्रापि तथापत्तिः।
किञ्च वैधर्म्यप्रतीतेरपि प्रमाणान्तरत्वमेवं
स्यादविशेषात्। एवमेवाभ्युपगमे च परि-
गणितप्रमाणाधिक्यप्रसङ्गो वा सादृश्यबुद्धेरपि
वा परिगणितेष्वेवान्तर्भावः स्यादिति। अप्र-
तीयमानस्य प्रतीयमानेन सह सादृश्यप्रमिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुपमानमित्यपि न आप्तवाक्यादपि तथा प्र-
मितेः। यत्र तद्व्यापारो नास्तीति चेन्न सचा-
यञ्च अभिन्नावितिवत् सचायञ्च सदृशाविति
पूर्वप्रतीतस्य प्रतीयमानेन सहैवैन्द्रियकसा-
दृश्यप्रतीतावपि प्रसङ्गात्। इन्द्रियासम्पृक्तस्येति
चेन्न प्रत्यक्षतो गोगवयसादृश्यं प्रतीत्य सापि
च गौ र्गवयेन सदृशी गोत्वादियमित्येवमनु-
मितावपि प्रसङ्गात्। अलिङ्गजापीति चेन्न
नन्वेवं प्रत्यक्षानुमानशब्दानुत्पत्त्वे सतीत्युक्तं
स्यात्। तथा च विशेषणमेव समर्थमित्यप्रतीय-
मानस्येत्यादि व्यर्थम्। नोपादेयमेव पदान्तर-
मिति चेन्न अर्थापत्तेरवश्यं सम्भवात् तेन सादृ-
श्यतत्सादृश्यस्थानेन सादृं तत्सादृश्यव्यतिरेके-
णानुपपद्यमानत्वात्। अन्यथा अन्यथाप्रत्ययो-
त्पत्तिविषयं प्रमाणान्तरमापद्येत। तस्मादयं
ह्रस्व इति प्रतीते अस्मात् स दीर्घ इति चा-
न्यथा कतमा प्रमा स्यात्। अर्थापत्तिं प्रमा-
णान्तरमनिच्छतापीयमर्थापत्तिरनुमानेऽवान्त-
र्भाव्या पृथक्प्रमाणीकर्त्तव्या वा। एतेना-
प्रतीतगवयगवान्तरसामान्यस्यादृष्टान्तानुमाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सम्भवात् गवयेनानेन सदृशी सा गौरिति मितिरुपमितिरित्यपि व्युदस्तम्। तथैतता दृश्यस्यैतेन तत्सादृश्यं विनानुपपत्त्यैव सिद्धेरिति। अनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानमित्यपि न प्रसृतसङ्गतेरेवम्भूतोपमित्यव्यापनात्। अप्रसृतसङ्गतीत्यभिधेयमिति चेन्न अनुभूतकालान्तरप्रसृतसङ्गतेरव्यापनात्। अस्मर्य्यमाण इति चेन्न कदाचिदस्मर्य्यमाणताया स्वका सम्भवात् सर्व्वदा अस्मर्य्यमाणतायाः क्वचिदप सम्भवात्। उपमितिप्राक्काल इति चेत्यादेवैतद्यद्युपमिति र्विचिता स्यात् तदर्थमेव कान्दनमिदमवतः। किञ्च सर्व्वैरनवगतसङ्गतित्वस्य प्रकृतेऽप्यसिद्धेः केनाप्यनवगतसङ्गतित्वस्य वाक्यजेऽपि सम्भवात् उपमानेति च पू निरस्तम्। यस्याः प्रमितेर्येन प्रमाणेति चाभिधाने अनुगतरूपाभावात् व्यक्तौ प्रतेन लक्ष ऽननुगत्यापत्तेः। संज्ञेत्यप्याकुलं गोसदृशो गवयप्रायः कानने महति दृश्यत इति श्रुतवाक्य काननपदाविदितसङ्गते र्गवयपदाविदितसङ्गते

CC-0. In Public Domain. Digitization by eGangotri

श्चासंज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलायामीदृशप्र-
तिपत्तौ गतत्वेनातिव्यापकत्वात्। विनापि
वा प्रायः शब्दमभिहितस्य तस्यानुसन्धाने प्र-
सङ्गः। तत्र काननसंज्ञासंज्ञिसम्बन्धावधारणे-
ऽप्यन्यतैव पदान्तरसमभिव्याहारोत्थाया अन्य-
थानुपपत्तेः प्रमाणत्वात् न तूपमानस्य। उप-
मेयसंज्ञासमभिव्याहृतेति विशेषणे च पूर्व्वक
एव निरासः। वाक्यार्थेत्यपि तादृशेव प्रति-
पत्तिकालास्मृतातिदेशवाक्यगतकाननादिपदा-
र्थस्य तथाविधप्रत्ययाव्यापनात्। वाक्यैक-
देशस्यापि वाक्यत्वेन विवक्षितत्वे सदृशो गवय
इत्यादि स्मारिणोऽपि प्रत्यये प्रसङ्गात्। प्रती-
त्युत्पत्तिं प्रतिप्रयोजकीभूतं यावत्तावद्वाक्यं विव-
क्षितमिति चेन्न अन्तर्भावितवनाधिकरणता-
दृश्यप्रतिपत्तिं प्रति तस्य प्रयोजकत्वात्। उप-
मितिं प्रतीति तु पूर्व्ववन्निरस्तमिति। यावत्
संज्ञासंज्ञिबुद्ध्यौपयिकं तावद्विवक्षितमिति चेन्न
लक्षणसहचरितसंज्ञोपदेशार्थानुसन्धानेऽपि
प्रसङ्गात्। किञ्च यदा तदर्थानुसन्धानविरहिणः
प्रत्यर्थेवम्विधानुसन्धाने सदृशमेव गवयपद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवृत्तिनिमित्तमिति सति फलमुत्पद्यते। तदा
तस्याप्रमाकरणस्यापि उपमानत्वमापद्यते प्रमा.
फलकमितिविशेषणप्रक्षेपपक्षे चानुसंहित.
रूपव्यवहार्य्यतानुमित्युत्पादेनाप्यं तादृशानुस.
न्धानमुपमानं स्यात्। अव्याप्तविषयप्रमाफल
कमिति विशेषणीयमिति चेन्न वस्तुगत्या
अव्याप्तत्वस्योपमेयेऽप्यभावात्। व्याप्ततयाऽनव.
गम्यमानस्येति च क्षते यत्नति तल्लिङ्गं तेन स
व्याप्तत्वावगतमुपमितिकरणमपि न व्याप्
यात्। उपमेयेन सह व्याप्तत्वानवगतत्वो
वप्यनुमाने प्रसङ्गस्तदवस्थ:। अनुमेयेन स
हेति क्षते च तदनपायादव्याप्तिस्तदवस्थैव
संज्ञासंज्ञिसम्बन्धप्रमितिकरणमिति चेन्न तथ
त्वासिद्धेः अर्थापत्त्यादितस्तत्सिद्धे व्वैच्यमाण
त्वात्। अननुमितिजनकं तादृक् प्रतिसन्धान
मुपमानमिति चेन्न तज्जातीयस्यानुमिति
जनकत्वात् व्यक्त्यपेक्षायाञ्च जनकत्वस्य सामा
न्याकारपर्य्यवसायिनोनित्यं व्यक्तःवसम्भावित
तया अननुगमेन चायुक्तत्वादिति। किञ्च
गोसादृश्यं विहायागवयत्वजातौ गवयशब्दार्थता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतिः कल्पनालाघवं तर्कमपास्य न स्यादिति तदुपन्यासस्थितौ किमानुमानिक्येव तत्र गवयत्वस्य गवयपदवाच्यताप्रमितिरियं नेष्यते। सम्भवति हि प्रयोगः विमतिपदं गवयशब्दप्रवृत्तिनिमित्तं तथात्वे तर्केण विषयीक्रियमाणविपर्य्ययकत्वात् न यदेवं नतदेवं यथा गोत्वं तथा चेदं ततस्तथेति। नह्यस्ति सम्भवो-मूलशैथिल्यादिदोषविरहितनिर्वेदितविपर्य्ययस्यार्थो नच तथेति। अथवा गवयपदससम्बन्धप्रवृत्तिनिमित्तान्तरमनुपपद्यमाना प्रोक्त-गोसादृश्यसामानाधिकरण्यमर्थाद्गवयत्वप्रवृत्तिनिमित्तकतामाक्षिपतीत्यर्थापत्तिरेवात्र प्रमाणमस्तु। सा च त्वया व्यतिरेकोक्त्या परेण पृथगेवावश्यं प्रमाणनीयेति॥

शब्दोऽपि क उच्यते। आप्तवाक्यं शब्दः प्रमाणमिति हि न युक्तं, विकल्पानुपपत्तेः। तथा हि कोऽयमाप्तो नाम। यथादृष्टवादीति चेन्न, भ्रान्तिप्रतिपन्नवादिवाक्येऽपि प्रसङ्गात्। प्रमाणदृष्टेतिविशेषणे च तथा भूतस्यान्यथावादव्यापनात्। यथाप्रमाणेति करणे चांशे तथा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतवादिवाक्यस्यायथार्थस्यापि व्यापनात्। यावद्यथाप्रमाणदृष्टेति निरुक्तौ च प्रायेणातथाभूतत्वादेव लक्ष्याणां तदव्याप्तेः। न हि यावत्प्रमितं तावदभिधीयते, यथाप्रमितस्यैव च वस्तुनोऽप्रमितत्वाकारे च युधिष्ठिरवाक्यस्याप्यनेवम्भूतत्वेनाव्याप्त्यापत्तेः। तत्र विषय इति विशेषणे च विशेषरूपस्य विषयस्यासाधारण्येनाव्यापकत्वापातात्। अथ निर्दोषस्य वाक्यं तथेति चेन्न सदोषस्य नास्ति घट इत्यभिधित्सतोऽस्ति घट इति दैवान्निर्गतयथार्थवाक्याव्याप्तेः। तत्प्रमाणं न भवत्येवेति चेन्न, पूर्वमुक्तोत्तरत्वात्। धृष्टत्वसामर्थ्येन प्रामाण्यावधारणसम्भवादापाततः सन्देहेऽप्यदोषात् सामान्यतोनिर्दोषत्वस्य भीमाग्रजेऽप्यभावात् विशेषतस्तथात्वस्यासाधारण्यपर्य्यवसायित्वात्। यथार्थवाक्यं शब्दः प्रमाणमित्यत्र को दोष इति चेन्न पूर्व्वोक्तयाथार्थ्यदूषणानि तावत्प्रथमः। यथार्थत्वविशेषणस्य व्यवच्छेदकत्वाव्यवच्छेदकत्वयोः पूर्ववद्दोषश्च द्वितीयः। वाक्यत्वानिरुक्तिश्च तृतीयः।

तथा हि किमिदं वाक्यं नाम। एकार्थविं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छिन्नपदसमुदायो वाक्यमिति चेन्न, एकत्व-विषयत्वावच्छिन्नत्वानां वाच्यानि दूषणानि तावत्सन्तु पदपदार्थन्तु चिन्तयामः । सुप्तिङन्तं पदमिति केचित्, वर्णा विभक्त्यन्ताः पदमित्यन्ये । तत्र नाद्यः प्रत्येकं मिलितस्य चाव्यापकत्वात् पृथक्प्रवृत्तिनिमित्ततायाञ्च वाक्यलक्षणाव्यापकत्वापातात् । नापि द्वितीयः विभक्त्यर्थस्यानुगतस्यासम्भवात् विभक्तिरित्यनेन सुप्तिङा प्राग्दिशोऽविभक्तिरित्यनेन च तसिलादेः पृथक् पृथगेव विभक्तिसंज्ञा विधानात् शब्दसाम्येन च लक्षणायोगात् । किञ्च वर्णा इति बहुत्वस्य विवक्षितत्वे घटमित्यादेरपदत्वप्रसङ्गः । अविवक्षितत्वे देवदत्त इत्यन्ताकारस्य पदत्वापातः तस्य विभक्त्यन्तत्वात् । सार्थकस्येति चेत् भवतीत्यादौ भवकारादीनां पदत्वप्रसङ्गः शपः सार्थकत्वात् । यतो विहिता विभक्तिस्तदिति चेन्न भवकारं परित्यज्य पदत्वप्रसङ्गात् । तन्मध्य पतितत्वाच्छवकारोऽपि गृह्यत इति चेत् तर्हि यत्र विभक्तिर्विधीयते तच्च तद्विभक्तिमध्यपतितञ्च पद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मिति वा विवक्षितं यत्र विभक्तिर्विधीयते तत्त्
द्विभक्तिमध्यवर्त्तिसहितं पदमिति वा। आ
द्यवकारस्यापि पृथगेव पदत्वप्रसङ्गः लक्षणस्य
चाव्यापकता। द्वितीये देवदत्त इत्यस्यापद
त्वप्रसङ्गः मध्यवर्त्तिनोऽभावे मध्यवर्त्तिसहित
विशेषणाभावात्। क्वचिन्मध्यवर्त्तिसहितस्य
क्वचित्केवलस्य चेति यथासम्भवमिति चेन्न
एकानुगतस्वरूपानभिधाने लक्षणस्याव्यापकता
पत्तेर्दुर्निवारत्वात्। किञ्च देवदत्तश्चेत्यपि पद
स्यात्। अथापशब्दोऽयं पदत्वे सति कत्वादे
र्विधानस्यावश्यम्भावित्वादिति चेन्न यत एवाय
मपशब्दस्तत एव भवतो दोषः प्रसज्यते अप
शब्दोऽपि पदलक्षणं गतमिति। तस्मात्पाणिनि
नाचार्य्येण शब्दसिद्ध्यर्थं पदसंज्ञेयं कृत्वादि
विध्यनुरोधेनापशब्ददशायामन्यैव कृता नदी
संज्ञावत्। ननु लौकिकपदव्यवहारसिद्ध
साधु शब्दविशेषे ततश्च तस्यान्यदेव लक्ष
वाच्यमन्यथाप्राचीनन्दनोदीरित नदीसंज्ञा
प्रत्यभिज्ञायां पाथः प्रार्थयमानः काननस्थली
मलीकाभिमानी भवानीहेत। अथोच्यते विभ

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यन्तमेव सर्व्वलक्षणप्रवृत्त्या निष्पन्नं व्यावहारिकं पदमिति लक्षणमस्तु । मैवम् । सर्व्वलक्षणप्रवृत्तेः सर्व्वत्राभावात् । सम्भवत्सर्व्वलक्षणप्रवृत्तेरिति चेन्न सम्भवत्त्वं तत्काले कालान्तरे वा विवक्षितम् । आद्ये देवदत्तावित्यपि पदं स्यात् रुत्वविधानकाले विसर्गस्यासम्भावितत्वात् । कालान्तरेऽपीतिपक्षे देवदत्त इत्यपि पदं न स्यात् इत्यादिपदपूर्व्वकालभाविनो यद्वयलोपादेरकरणात् । प्रत्ययान्तरसन्निधिव्यतिरेकेण यद्भावि लक्षणं तद्विवक्षितमिति चेन्न जीविकाहृत्य व्याचष्ट इत्यत्र जीविकां हृत्वा व्याचष्ट इति प्रयुज्यमानं वाक्यं स्यात् । एकार्थावच्छिन्नपदसमुदायस्य तत्रापि गतत्वात् हृत्वेत्यनेन सम्बद्धस्य जीविकामित्यस्योक्तपदलक्षणेन संगृहीतत्वात् । यदुपाधिका यल्लक्षणप्रवृत्तिस्तदुपाधिसम्पत्तौ तेन निष्पन्नं तथेति चेन्न यत्र नास्त्युपाधिसम्पत्तिस्तत्र केवले तस्यां सत्यामित्यस्याभावादपदत्वापत्तेः । यस्यामवस्थायां यस्य लक्षणस्योपनिपातस्तत्सर्व्वसम्पत्तौ विभक्त्यन्तं पदमिति चेन्न यस्यामव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थायामित्यवस्थानां भिन्नभिन्नाकारेण परामर्शे लक्षणस्यानुगमादव्यापकतादोषः अवस्थानामैक्यन्त्वविवक्षितमसम्भावितञ्च। सर्व्वदा सर्व्वावस्थाविषये लक्षणप्रसङ्गादिति। स च भवति भवतो वा पटः पटाविति वा घटं घटाविति चेत्यतिव्याप्तिः। एतेनापौरुषेयं वाक्यं तदित्यपि निरस्तम्।

का पुनरर्थापत्तिः। अन्यथानुपपत्तिरिति चेन्न यतोऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेः। सिद्धेनानुपपत्तिरिति चेन्न विशेषणव्यवच्छेद्याप्रतीतौ तद्वैयर्थ्येन तदनुपादाने सर्व्वथानुपपत्त्यर्थतायां फलविरोधात् केनाप्यनुपपत्त्यर्थत्वे साध्यसिद्ध्यपर्य्यवसानात्। प्रमाणयोर्व्विरोधानुपपत्तिरिति चेन्न असिद्धत्वात् प्रमाणत्वेनाभिमन्यमानयोरिति चेत् अभिमतेर्भ्रमार्थत्वेऽतिप्रसङ्गात् ज्ञानार्थत्वेऽप्युक्तदोषानिवृत्तिरेव। अनिर्णीयमानप्रामाण्याप्रामाण्ययोरित्यत्रापि तथैव तथा हि सत्प्रतिपक्षेऽपि तस्य तदुपपादकप्रमाफलकत्वापत्तेः। तत्र विरोधेन व्याहत्यैवा प्रमाणत्वनिश्चयः अत्र तु नैवं तद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चितमिति चेन्न सत्प्रतिपक्षवदन्यत्रापि विरुद्धार्थत्वेनैवाभासत्वाविशेषात्। तर्कयोर्विरोधेऽपेक्षित इति चेन्न मिथोऽविरोधेन तर्कयोरप्याभासत्वात्। विशेषप्रवृत्तप्रमाणार्थे प्रतिक्षेपविषयत्वसंशयोऽविशेषप्रवृत्ततद्विपरीतार्थप्रमाणस्य विरोध इति चेन्न विशेषविषयप्रमाणबोधितवैपरीत्ये सति तद्विरुद्धार्थतांशे संशयस्य दुर्बलस्यानवकाशत्वेनाविशेषप्रवृत्तप्रमाणविषयतां तदीयां गोचरयितुमप्यसामर्थ्यादेव। अविशेषप्रवृत्तस्य प्रमाणस्य तद्विपरीतार्थविशेषविषयस्य च प्रमाणस्य विषयोस्तद्विपरीतत्वविशेषणाप्रतीत्यङ्गीकारलक्षणयोः परस्परविरुद्धत्वप्रतीतौ धर्मिणोर्विरुद्धधर्माध्यासस्य भेदस्य विरोधविवेचनस्फुटतद्धर्मप्रवेशतया तत्सहचरितस्य तन्नान्तरीयकस्य वान्यतोवान्यतएव प्राप्तेः। किञ्चाविशेषप्रवृत्तस्येन तस्य किंविशेषविषयत्वम्। अथ सामान्यतः प्रवृत्तस्य नान्तरीयकतया प्रागेव विशेषविषयस्य विशेषविषयत्वेनाज्ञातस्य विशेषविषयत्वं न सामान्यस्य तद्विषयस्य विशेषः उतः तद्विषयी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टातविशेषगतं किमपि धर्मान्तरमिदानीं प्रतीयते। नाद्यः अर्थापत्तेर्भ्रमकरणत्वापत्तेः। न द्वितीयस्तदनुव्यवसायोत्पत्तौ स्वविषयाप्रतीत्यसम्भवात्। न तृतीयः सामान्यस्यानन्तभाविताश्रयस्य प्रत्येतुमशक्यत्वात् प्रागेव तत्सिद्धेः। नापि चतुर्थः तद्धि प्रतीयमानविरोधिव्यतिरिक्तत्वमन्यद्वा स्यात्। नान्त्यः तत्प्रतीतौ साध्यानुपदर्शनेनानियमप्रसङ्गात्। न प्रथमः अनुगताननुगतजातिव्यक्ति चक्षुषाचाक्षुषादिव्यक्ति गन्धादितादात्म्यवादिनये तदुभयप्रमातादात्म्यविषयताव्युदासं विना विरोधासिद्धा तद्भमनिकावत्तस्यैवासिद्धेः तदुभयप्रतीतौ च तदवधारणे प्रागेव तत्प्रतीत्यर्थापत्तेरनुवादतापत्तेः।

योग्यानुपलब्धोऽभावप्रमाकरणमित्यप्ययुक्तं प्रमाणाभावस्य तथात्वे भ्रमानुदयप्रसङ्गात्। उपलब्ध्यभावमात्रस्य तथात्वे शङ्खधवलिमप्रतिसन्धानवतः पीतभ्रमानुदयप्रसङ्गात्। कालभेदात्तत्राविरोध इति चेन्न तथापि संसृष्टयोरन्योन्याभावाग्रहणप्रसङ्गात् तादा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मस्य स्वरूपमात्रानतिरेकात् अभावस्फुरणे च तत्प्रतिभासस्य ध्रौव्यात्। किञ्च योग्यता हि तत्तदविनाभूतान्यप्रतियोगिप्रमापकसाकल्यमिष्यते तथा सति च यत्र भावोपलम्भस्तत्राप्यभावप्रमा स्यात्। न हि तत्र हेतुव्यतिरेकेणैव वा सत्येव वा तदभावप्रमोत्पद्यते। तत्तदविनाभूतविरहसहितः स तथेति चेन्न तदविनाभूतव्यतिरेकस्य व्यतिरेकेणैवान्यथासिद्धसन्निधेरपि हेतुत्वाङ्गीकारे प्रमाणाभावात्। अतएवालोकस्याप्यवयवो आलोकान्तरवतावयवेनावयविना वा आलोकेनान्यथासिद्धसन्निधिरहेतुरित्यालोकाभावग्रहे सा नापेक्ष्यते। अर्थाद्धयोगस्तु नार्थप्राप्तोऽप्रतयैक्यात् तद्विरहसहितः स तथेति चेन्न इन्द्रियसन्निकर्षस्य हि प्रतियोग्यनुपलम्भे तावद्धेतुताङ्गीक्रियते तत्र किं सन्निकर्षव्यतिरेकान्वयोदाहरणमेष्टव्यं न वा न यदि तदा सन्निकर्षस्य हेतुतैव कुतोऽनन्तव्याऽन्यथैव कार्य्योत्पत्त्युपपत्तेः। एष्टव्यञ्चेत्तर्हि तत्रैवोदाहरणे व्यवधायकेनेन्द्रियसन्निकर्षशून्ये पर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मार्थतस्याभाववत्युक्तकारणसम्पत्तेरभाव प्रमा प्रसङ्गात्। अत्र व्यवधायकाभावः प्रतियोग्युपलम्भको नास्तीति चेन्न सन्निकर्षव्यतिरेकस्य प्रमाव्यतिरेकप्रयोजकत्वावधारणोदाहरणेषु तर्हि तन्न स्यात्। व्यवधायकस्य सन्निकर्षविरोधेनैव प्रमा विरोधित्वमिति चेत् तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं न त्वभावप्रमाविशेषोत्पत्ताविति स्थिते स प्रसङ्गस्तदवस्थ एव। नच सन्निकर्षाभावादेव तदानीमुक्तकारणासम्पत्तिः प्रतियोगिसन्निकर्षस्याभावप्रमोत्पादकत्वे नित्यं तदनुत्पत्त्यापत्तेः। अतएव नाव्यवधानमधिकं कारणमेष्टव्यमिन्द्रियसन्निकर्ष एव तदुपपत्तेः। न चायमसाक्षात्कारोऽपि प्राङ्नास्तिताग्रहादौ व्यभिचारात्। ननु व्यवधायकसद्भावेऽपि यत्र परमार्थतोऽस्त्यभाव स्तत्रोक्तकारणादभावावधारणमस्त्येव को विरोधो न तावद्भावयोगिन्यपि तावता तद्विरहप्रमा प्रसज्येत। तर्हि प्रतियोग्यभावसहितोऽनुपलम्भ एवाभावप्रमाणमस्तु तद्धीहि योग्यताविशेषणनिवेशनव्यसनम्।

CC-0. In Public Domain. Digitization by eGangotri

योग्यताविशेषणाप्रक्षेपेऽनुपलम्भमात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः कदाचित्तु संशयो जायते तत्कथं तयाङ्गीक्रियत इति चेत् तर्हि व्यवधानेष्वेवमेवेति योग्यताविशेषणप्रक्षेपेऽपि तुल्यम् । अपि च मेयस्य वास्तवं सत्त्वं प्रमाणकोटावनिवेशार्हमेव मेयवस्तुसत्त्वनिर्द्धारणार्थमेव हि प्रमाणा प्रमाणविवेचनं विचारकाणाम् । अन्यथानुमाने व्याप्तावुपाधिनिरासायासो व्यर्थः स्यात् व्याप्तपक्षधर्मताज्ञानमात्रस्यैव कारणत्वाङ्गीकारेण सौकर्यात् । प्राङ्नास्तिताप्रमितौ च यद्यभावप्रमाणतां मन्यसे तर्हि सा न स्यात् । तत्रेदानीं जायमानाभावप्रमोत्पत्तावभाववास्तवसत्ताविरहस्यापीदानीं क्वचित्सम्भवात् । फलविषयकालिकाभावोपलक्षिताश्रयादेः कारणकोटिनिवेशने विशेषाभावात् । तदुपलक्षितस्यैव विशेषणस्य विशेषत्वेऽतिप्रसङ्गात् । तथापि सामान्यतोविशेषाभावोऽसिद्ध इति चेन्न तस्य सत्त्वे निर्व्वचनापातात् ।

कश्चायमसिद्धो नाम । तथा हि व्याप्तत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्षधर्म्मताव्याप्तप्रमितोऽसिद्ध इत्यलक्षणं हेत्वाभासान्तराणामपि ह्यसिद्धप्रवेश एवं सति स्यात्। व्याप्तिं पक्षधर्म्मतां तत्प्रमितिं वा न विरुध्यतां हेतुदोषत्वाभावात्। ननु नेदमीदृशं तथा हि केचिद्दोषा व्याप्तिपक्षधर्म्मतातत्प्रमितिविरहात्मानः केचित्तु व्याप्त्यादिलिङ्गभङ्गभूताः प्रतिबन्धकतया प्रमित्युत्पत्तिं विरुन्धानाश्च केचिद्दोषभूयं भजन्ते। तत्र प्रथमे तावदसिद्धमध्यमध्यासते। तद्यथा व्याप्यत्वासिद्धः सोपाधिरूपः। अनौपाधिकसम्बन्धो हि व्याप्तिः सहोपाधिता वानुपाधितांविरहरूपैव एवमधिकरणासिद्धिरप्यसिद्धावेवान्तर्भविष्णुः। पक्षपदोपात्तस्याश्रयस्य व्यतिरेकरूपा हि सा सिद्धसाधनमपि तथैव सिषाधयिषितधर्म्मविशिष्टो हि धर्मी पक्ष उच्यते। यच्च सिद्धं न तत्र सिषाधयिषास्ति ततो विशेषणाभावापत्तौ विशिष्टस्य पक्षरूपस्य तदभावः। नच वाच्यं यथा सव्यभिचारत्वादभग्नव्याप्तिकमिति पृथगेव सव्यभिचारस्य दोषत्वं तथासिद्धत्वात्तत्र सिषाधयिषा नास्तीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति लिङ्गस्यदेशासिद्धिपर्य्यवसायित्वात्। अन्यथा व्याप्त्यादिविरहपर्य्यवसायितामात्रेण सव्यभिचारत्वादिनामप्यसिद्धावेवान्तर्भावः स्यादिति। यतः सिषाधयिषा भावो न प्रतिपन्नासिद्धत्वाल्लिङ्गाद्व्यते। किं नामेच्छाभावस्य तस्य तस्य यथादर्शनं प्रत्यक्षादेरेनाधिगम इच्छैव तु तत्र यत्रास्ति तत्र सिद्धत्वं प्रयोजकमित्येतावन्मात्रेण सिद्धत्वमुपन्यस्यते सिद्धसाधने नत्विच्छाभावमनुमातुं लिङ्गतयेति एवं स्वरूपासिद्धिरपि पक्षधर्म्मताविरहरूपैव। ये तु व्याप्तिपक्षधर्म्मताविरहलिङ्गभूतास्तेऽसिद्धतः पृथगेव हेत्वाभासाः। तद्यथा विरुद्धः साध्यविपरीतव्याप्तः तत्र साध्यव्यतिरेकव्याप्तता हेतोर्न साध्यव्याप्तताभावः। किन्नाम साध्यव्यतिरेकेण सहानौपाधिकासम्बन्धोऽन्यएवासौ इत्यमेव पक्षधर्म्मताविरहात्मापि नायम्। किन्नाम ततः साध्यव्यतिरेकेण सह निरुपाधित्वसम्बन्धात् तत्र साध्यव्याप्तिरस्य नास्तीत्यनुमीयते। तथासति च साध्यव्याप्तिव्यतिरेकलिङ्गं सद्विरुद्धः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथगेव हेत्वाभासो भवति। एवमनैकान्तिकोऽपि न व्याप्तिव्यतिरेकरूपः किन्तु तल्लिङ्गमेव। तथा हि हेतोरन्वयस्य व्यतिरेकस्य वा व्यभिचारो न साध्यसाधनव्याप्तिविरहात्मा किन्नाम व्यभिचारो हेतोः साध्यव्याप्तिविरहं विना न सम्भवतीति लिङ्गभावेन व्याप्तिभङ्गं बोधयति। यदि हि निरुपाधिः साध्येन सम्बन्धोऽस्य भवेत्कथं व्यभिचरितुं शक्नुयात्। तस्माद्व्याप्तिविरहलिङ्गं व्यभिचारो न तु व्याप्तिविरहः पक्षधर्म्मताविरहरूपता त्वनैकान्तिकस्यासम्भावितैव सत् प्रतिपक्षतायाञ्चानवगम्यमानविशेषप्रतिपक्षप्रतिरुद्धतया यत्साध्यनिश्चयाजनकत्वं हेतोः स प्रतिबन्धकसद्भावे कार्य्याजनकत्वमितरकारणसाधारणो वस्तुस्वभावः। तस्य व्याप्तिपक्षधर्म्मताविरहरूपा असम्भावितैव। बाधस्तु साधनवति पक्षे साध्याभावबोधनात्मा भवन्नपि न व्याप्तिविरहावगमरूपः। सामान्यतोऽनौपाधिकसम्बन्धरूपा हि व्याप्तिः। साधनवति च साध्यविरहो न सोपाधिता साध्याविरोधिस्वभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वात्तस्याः। नाप्यसौ सामान्यतः साध्यसाधनसम्बन्धस्य विरहरूपः बाधे सत्यपि सामान्येन साध्यसाधनयोः सम्बन्धस्य दृष्टान्तावगतस्यानपलापात् बाधस्य किञ्चिद्विशेषविषयत्वात् सामान्याकारपरिगृहीतस्य सम्बन्धस्य विशेषान्तरमादाय पर्य्यवसानाऽविरोधात्। तस्माद्विशेषबाधे न सामान्यतः सम्बन्धस्य सोपाधिता अनुमीयते निरुपाधित्वे बाधानुपपत्तेः। यथाह बाधाद्वोपाधिरुन्नीयतेऽन्यथा वेति न कश्चिद्विशेष इति। अन्यस्तु सत्प्रतिपक्षवद्बाधस्यापि प्रतिबन्धकत्वमेव तेन बाधे सति प्रतिबद्धत्वान्निश्चयं न करोति हेतुरिति व्याप्तिपक्षधर्म्मतादोषमनालोच्य अन्यथैव बाधस्य दोषत्वमित्याह। तस्माद्व्याप्तिपक्षधर्म्मताप्रमितत्वानां यत्र साक्षादेव विरहस्योद्भावनं तत्रासिद्धः। यत्र तु व्याप्त्यादिविरहलिङ्गोपन्यासः सत्प्रतिपक्षोपन्यासो वा तत्रान्यो हेत्वाभासः। ननु सोपाधित्वादयोऽपि यतोऽवगम्यन्ते तत् कुतः पृथक् दूषणं न भवत्यनैकान्तिकत्वादिवत्। नैवम्। अनैकान्तिकान्तिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादेर्व्याप्त्यादिविरहबोधने लिङ्गभावनियमात् पृथगुपन्यासः। सोपाधितादेस्तु प्रत्यक्षादपि प्रतीते र्न लिङ्गभावनियतं तत्र प्रतिपादकं किञ्चिदस्ति। नच वाच्यं यत्र लिङ्गात्सोपाधितादेः प्रतीतिरतीन्द्रियप्रभृतिविषये तत्र लिङ्गं पृथगेव दूषणतयाभिधीयताम्। नन्वनैकान्तिकत्वादिकमपि सार्व्वत्रिकं व्याप्तिविरहलिङ्गमिति हेत्वाभासाधिक्यमापन्नमिति। अनैकान्तिकत्वादिवत्तेषां लिङ्गानामैकरूप्येण निर्द्देष्टुमशक्यत्वात् पृथक् पृथगेव वाभिधानमशक्यमपरिसङ्ख्येयत्वादिति। वक्ष्यामश्चाग्रे हेतुं तदनभिधानस्य। नन्वनुचितमुच्यते व्याप्त्यादिविरहलिङ्गतयानैकान्तिकत्वादीनां पृथक् दूषणत्वमिति यतोव्याप्तिपक्षधर्म्मतेपेतलिङ्गप्रमितिसाध्यानुमिति स्वदैकल्यान्न भवेत्। यतश्च सा न भवति तदेव तस्यां दूषणं वक्तुमुचितमिदमनुमित्युत्पत्तिकारणमिह नास्तीति। नच व्याप्तिपक्षधर्म्मते तत्प्रमितिञ्च विहायान्यत्तदुत्पत्तिकारणमस्ति व्यतिरेकोपदर्शनयोग्यं तस्मादनुमितिदोषप्रतीतिकारणत्वमने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्तिकत्वादीनां न तु साक्षाद्दोषत्वं दोष-
प्रतिपादकतयापि, च दोषत्वं साक्षाद्दोषत्व-
मनुपजीव्याशक्याभिधानमिति प्रधानदोषस्यैव
दोषतयोद्भावनं युक्तं न सव्यभिचारत्वादीना-
मिति विभागस्तवमनर्थकमिति तात्पर्य्यं सत्य-
मेतत्। साक्षाद्दोषत्वं प्रतिबन्धकस्य व्याप्त्यादि-
विरहस्य वा विरुद्धत्वादीनान्तु तत्प्रमापक-
तया यद्यपि दोषपक्षनिक्षेपस्तथापि विरुद्ध-
त्वादयो यद्दोषप्रतिपादकतयोक्ता स्तदुद्भावन-
लाघवानुरोधात् व्याप्त्यादिविरहे ततोद्भाव्य-
माने न हेतुर्गन्तुं शक्यते । अनैकान्तिकत्वादौ
तद्भाविते व्याप्त्यादिविरहोऽर्थाल्लभ्यते । व्याप्त्या-
दिविरहव्यतिरेकेणानैकान्तिकत्वादेरनुपपन्न-
त्वात्। तथा तस्माद्भीतोऽयमित्युक्ते अस्मात् त्रस्तः
स इत्यर्थाल्लभ्यते न तु तत्र प्रतिपाद्यान्तरा-
पेक्षा तथेहापि निरग्नौ धूमोऽस्तीति प्रतिपा-
दिते अग्निनासौ न व्याप्त इत्यर्थाल्लभ्यते ।
न हि सम्भवत्यग्निना च व्याप्तोऽनग्नौ चा-
स्तीति । अतएवानन्यादतीन्द्रियोपाध्यादि-
लिङ्गानां येषां पूर्व्वमनभिधानं समर्थितं तेषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनभिधाने अयमपि हेतुः। तानि ह्युपाधिलिङ्गानि नार्थवशादुपाधिसमपेक्षाणि गमयन्ति येन तेषां व्याप्तिनीवश्यारिता तं प्रति तत्प्रतिपादनमन्तरेणाप्रतिपादकत्वस्यापि सम्भवात्। अनैकान्तिकत्वाद्यवगतौ च व्याप्त्यादिविरहबोधाय न प्रतिपादनीयान्तरापेक्षा कस्यचित्स्वचेतसः सम्भवतीति पूर्व्वपक्षसंक्षेपः। एवमसिद्धलक्षणे व्यवस्थिते बाधोऽयमभिधीयते। एतेन कीदृशमसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति। व्याप्तत्वपक्षधर्म्मत्वाभ्यामप्रमितोऽसिद्ध इति तावत् विरुद्धादिषु लक्षणं किन्नास्ति किं वास्ति। यदि नास्ति तदा व्याप्तिपक्षधर्म्मताभ्यां प्रमिता विरुद्धादयः प्राप्नुवन्ति। अथास्ति तदा तेऽप्यसिद्धभेदाः प्राप्ताः। अथैतस्मिल्लक्षणे सत्यपि तेनासिद्धान्तर्भूताः तर्हि लक्षणमिदमतिव्यापकमापन्नम्। अथ यत्र व्याप्तिपक्षधर्म्मत्वाप्रमितत्वं साक्षादुद्भाव्यते तदसिद्धमित्युच्यते तर्हि लक्षणान्तरमिदमुक्तं स्यात्। नचैतदपि युक्तं यत्र व्याप्यत्वासिद्धे व्याप्तिविरहमात्रं प्रतिपाद्यते तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्तिपक्षधर्म्मताप्रमितत्वानां ज्ञानं मिलितं नोद्भाव्यत इति नासावसिद्धः स्यात् । एवं सर्वासिद्धविशेषमुदाहृत्य प्रसङ्गो विधातव्यः । अथ प्रत्येकमिदं लक्षणं व्याप्त्यप्रमिततया साक्षादुद्भाव्योऽसिद्धः पक्षधर्म्मत्वाप्रमिततया वेति । तर्हि अन्योन्योदाहरणाव्याप्तेरव्यापकत्वमुभयोः । अथोभयोरप्यसिद्धविशेषलक्षणत्वादन्योन्यविषयाव्यापकता न दोषायेति मन्यसे न सामान्यलक्षणे निर्व्वक्तुमशक्ये कथमिदं विशेषलक्षणमपि घटते । अथानुमितेरसाधारणहेतुव्यतिरेकोद्भावनं सामान्यलक्षणमस्तु । नैवम् । सत्प्रतिपक्षोद्भावनं तथेत्यतिव्याप्तेः भावरूपतया हेतुविशेषणे च निरुपाधित्वव्यतिरेकोद्भावनाव्याप्तेः स्वरूपासिद्धिः सर्व्वप्रमाणसाधारणो दोष इत्यत्र तदुद्भावनाव्याप्तेश्च । अथोच्यते व्याप्तत्वपक्षधर्म्मताभ्यां प्रमितत्वव्यतिरेको यत्र साक्षादुपन्यस्यते सोऽसिद्ध इति इदमपलक्षणमव्यापकत्वात् । यत्र व्याप्त्यादिव्यतिरेक उपन्यस्यते तत्र वस्तुगत्या व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तु नाम नतूपन्यस्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेऽपि प्रयोजनाभावात्। व्याप्तिव्यतिरेकदर्शनादेवानुमानाङ्गवैकल्यात्तन्नो दोषस्योद्भावनपर्य्यवसानात्। तस्मात्तत्र प्रमितत्वव्यतिरेकोद्भावनं नास्तीत्यव्यापकत्वं दोषः। ननु विशेषणाद्यभावोऽपि वस्तुतो विशिष्टाभव एवेति नोक्तदोषः न यदि विशेषणाद्यधिकोऽविशिष्टस्तदा तदभावभेदोऽपि स्यात्। अथ नाधिकस्तदा विशेषणाभावत्वान्नान्या सा विशिष्टाभावतेति। विशिष्टाभावस्यापि तथात्वे पृथगेव विशिष्टाभावत्वार्थं तयोरित्यननुगम एव स्यायोऽनुमित्यसिद्धाव्याप्त्यस्यानुद्भावनादिति। अथ ब्रूषे यत्र व्याप्तत्वपक्षधर्म्मत्वप्रमिते व्यतिरेकः साक्षाच्छक्योपन्यास स्तदसिद्धं शक्योपन्यासत्वस्यानुपन्यस्तेऽपि सम्भवान्नास्त्यव्यापकतेति। नैतदपि युक्तं तथा हि शक्योपन्यासत्वं किं शक्यस्वरूपनिर्देशत्वमात्रम् उत शक्यप्रमापणत्वम्। आद्येऽनैकान्तिकादावपि व्याप्तिशून्यत्वं शक्यप्रतिज्ञम्भवत्येव। द्वितीयेऽपि यदि साक्षादिति प्रत्यक्षेणेत्यर्थः तदा प्रत्यक्षेण प्रमापणीयत्वं व्याप्तिपक्षधर्म्मताप्रमितिविरहस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षप्रतियोगिकाभावप्रत्यक्षतावादिमते विरु-
द्धादावप्यस्तीत्यतिव्याप्तिः । अन्यमते न क्वचि-
दपीति सर्वाव्याप्तिः । अथ व्याप्तिपक्षधर्मता-
विरहस्यापि प्रत्यक्षप्रमापणीयता विवक्षिता
सा न युक्ता उक्तलक्षणवाक्यस्य व्याप्तिपक्ष-
धर्मताविरहानभिधायित्वात् तद्विरहेऽपि तात्-
पर्याभ्युपगमे प्रत्येकसमुदितलक्षणताविकल्पे-
नाव्यापकत्वापातात् । अतीन्द्रियपक्षादिवि-
रहे च विषये तदभावादव्यापकत्वापत्तेः । ए-
तेन यदि लिङ्गानपेक्षत्वं साक्षादर्थः सोऽपि
निरस्तः । अथोच्यते यत्र व्याप्तत्वपक्षधर्मत्व-
प्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया
तत्प्रमापकस्य लिङ्गस्योपन्यासव्यतिरेकेण
शक्योद्भावनः तदसिद्धमिति नैतदप्युपपन्नम्
अतिव्यापकत्वात् तथा हि विरुद्धादौ शक्यते
तावद्विपक्षदृष्टिचिदसद्भूततर्काभावात् सोपाधि-
तावगन्तुम् । यदाह यत्रानुकूलस्तर्को नास्ति
सोऽप्रयोजक इति तस्याक्षेपासमप्येवं लक्षणा-
योगित्वादसिद्धत्वप्रसङ्गः नच तादृशतर्काविषय-
त्वमपि प्रतिपादनीयान्तरानपेक्षव्याप्तिपक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मताप्रमितिविरहप्रमापकलिङ्गभूतमेवेति वाच्यं तथा सति विरुद्धत्वादिवत्तस्य हेत्वाभासान्तरत्वप्रसङ्गात्। अथोच्यते तथोपन्यासानं तदसिद्धस्य भवतु साध्यविपरीतव्याप्तत्वादिना तु दूष्यमाणं विरुद्धाद्येव तत् उपन्यासप्रकारभेदाच्च भेदव्यवस्था हेत्वाभासानाम् नत्वत्र गोत्वाश्वत्वादिवदत्यन्तासङ्कर इष्यते किं नाम प्रमाणप्रमेयभाववत् प्रकारासङ्करमात्रमिति तदप्ययुक्ताभिधानं स्वव्यक्तौ हि केन प्रकारेणासिद्धत्वस्य भवति न तावदुक्तलक्षणेन तथा शक्योद्भावनत्वस्य विरुद्धोचितप्रकारेणोपन्यस्यमानस्य सम्भवात्। सर्वथा निष्प्रकारस्यासिद्धधर्मिणस्तदुद्भावनाशक्यत्वात्। नच तथा शक्योद्भावनत्वमप्युद्भाव्यते असिद्धे येन प्रकारभेदव्यवस्थितिरनेन भवेत्। नच शक्योद्भावनपदस्थाने उद्भाव्यमानत्वमिति कृते निस्तारः सोपाधित्वाद्युद्भावने प्रभित्यभावोद्भावनं व्यर्थत्वान्न क्रियत इति तदव्यापकत्वं प्रसज्यतेति प्रागेवोक्तत्वादिति। एतेनासिद्धः साध्यसम इति प्रत्युक्तं यथा कथञ्चित्साध्यसाम्यस्य सर्वसाधारणत्वात् साध्य-

CC-0. In Public Domain. Digitization by eGangotri

विशेषस्य चोक्तप्रकारपर्य्यवसानव्यतिरेकेणान्यथासम्भवात् लक्षणान्तरेषु चोक्तदूषणप्रकारा यथासम्भवमिह योजनीया इत्यलं विस्तरेणेति ।

अपि चासिद्धलक्षणविशेषणेन प्रमाणव्यवच्छेदकव्यतिरिक्तेन यद्यवच्छेद्यं तत् केनचिद्विरुद्धं केनचिदन्यदिति चेत् । विरुद्धमेव किमुच्यते तथा हि साध्यविपरीतव्याप्तो विरुद्ध इत्याद्यः तत्र साध्यव्यतिरेकेण हि व्याप्तिः कार्त्स्न्येन वा अनौपाधिको वा स्वाभाविको वा सम्बन्ध इत्याद्युक्तिभिः सविशेषणः सहभाव एव निरुच्यते । तथा सति च साध्यव्यतिरेकेण सामानाधिकरण्यमेव विशेषणविशेष्ययुक्तं विरुद्धमित्युक्तं स्यात् । यदा चैवं तदा साध्यव्यतिरेकसामानाधिकरण्यमेव हेतोरगमकत्वे समर्थमिति तन्मात्रमुद्भाव्यं वृथा विशेषणप्रक्षेपः । तथा चानैकान्तिक एवायं स्यात् । ननु साध्यव्यतिरेकसम्बन्धो यद्यपि विरुद्धानैकान्तिकयोर्द्वयोरप्यस्ति तथापि वस्तुगत्या स्वाभाविकोऽसौ विरुद्ध एवेत्येतावन्मात्रविशेषविवक्षया विरुद्धस्यानैकान्तिकाद्भेदोपन्यासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नैवम्। दत्तोत्तरत्वात् वस्तुगत्या सन्नप्ययं विशेषो नोद्भावनार्ह इत्युपेक्ष्य एव इत्युक्तम्। तथा हि नैतस्य साधकमेतत्साध्यं प्रति विरुद्धत्वादित्यभिधीयमाने विरुद्धशब्दार्थनिरुक्तौ विशेषणाधिक्यस्योक्तन्यायेन दुष्परिहरत्वात्। अत एवानैकान्तिके सन्देहेन प्रत्यवस्थानं विरुद्धे व्यतिरेकानिश्चयेनेति विशेषादनयोर्भेदेनोपन्यास इत्यप्यनवकाशम्। अनुमितिहेतुव्यतिरेको हि हेतुदोषोऽनुमितिहेतुश्चैकोऽव्याप्तिस्ततस्तदभावस्य दोषत्वात्तावन्मात्रं ज्ञाप्यं तच्च हेतुविपक्षसम्बन्धोद्भावनमात्रादेव गम्यते तस्मादनुमितिहेतुव्याप्तिप्रमितिव्यतिरेकबोधनाय संशये व्यतिरेकानिश्चये वोद्भाव्यमानेऽपि कुतस्तावेवेत्यत्र विपक्षसम्बन्धमात्रनियततत्सम्बन्धाववश्योपन्यासाविति तत्सम्बन्धमात्रमेवास्तु व्याप्तिस्तत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वादुद्भावं च कृतमितराभ्यामिति लकारभेदप्रयोगे तैस्तैर्लकारैः कालविषयविशेषप्रतिपादनवद्विभक्तिभिर्लिङ्गसंख्याज्ञापनवत् पर्वतोऽग्निमानित्यादौ धर्मादिप्रतिपादनवच्च नेदं घटते तत्र तेषाम-

CC-0. In Public Domain. Digitization by eGangotri

तात्पर्य्यविषयाणामपि पदप्रयोगे विशिष्ट-
बोधने वा अन्यथासिद्धानां यथाबोधनं तथा
वह्नावपि वह्नेर्व्विशेषणानामतात्पर्य्यविषयत्वं
तदनैकान्तिकसाधारणत्वादेव अन्यथोक्तदोषा-
परिहारादेवेति । अनैकान्तिकत्वाद्यनुद्भाव-
यता अनधिगच्छता वा विरुद्धमशक्योद्भावन-
मशक्याधिगमञ्चेति तदुपजीवित्वान्न पृथक्-
दूषणं विशेष्य प्रतिपादनं विशेष्यावगमञ्च
विना विशिष्टप्रतिपादनस्य विशिष्टावगमस्य वा
अशक्यत्वात् एवमन्यत्रापि विशेषणस्याप्रयो-
जकता विशेष्यस्य सामर्थ्ये स्वयमूहनीया ।
तद्यथा इदमसाधकं साधारणानैकान्तिकत्वादि-
त्यत्र साधारणेति विशेषणे सपक्षविपक्षगतत्वा-
दित्यत्र सपक्षगतत्वेऽप्युद्भाव्यमाने एवमसाधा-
रणेऽपीति इदमसाधकं जातित्वादिति जातित्व-
विवेचने स्वव्याघातकमुत्तरं जातिरिति स्वव्या-
घातकत्वस्यैव सर्व्वमसत् ज्ञेयत्वादित्याद्यजाति-
जातिसाधारणस्य दूषणसमर्थत्वेनोत्तरत्वाभि-
धान इति । किञ्च साध्यविपरीतेति साध्या-
भावेत्यर्थे यदा अभावात्मैव साध्यः क्वचिद्भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र तद्विपरीतस्य भावत्वात्तदव्यापकत्वं लक्षणस्य। नच विपरीतशब्दस्य विरोधिमात्रार्थत्वे भावाभावोभयव्याप्तिरिति वाच्यं महानवस्थाने हि भावाभावयोर्व्विरोधोऽभ्युपेयते अनवस्थानञ्च संसर्गनिषेधः सच भावाभावयोरन्योन्यस्यावस्थानमेव। परस्परप्रतिषेधरूपत्वात्तयोः तथा च सति भावाभावयोः स्वरूपस्यानुपसंग्रहे प्रत्येकमव्याप्तिर्मिलितस्यासत्त्वाद् एवेति वक्ष्यामश्च भावाभावयोर्व्विरोधनिरुक्तिनिराकरणमुपरिष्टादिति।

किञ्च व्याप्तपदेन लक्षणप्रविष्टेन किं व्यवच्छेद्यम् अनैकान्तिकमिति चेत् किं तदनैकान्तिकं तथा हि। अनैकान्तिकः सव्यभिचार इत्यलक्षणम् सव्यभिचारत्वं हि यदि विपक्षवर्त्तिता तदानीं विरुद्धेऽपि प्रसङ्गः असाधारणानैकान्तिकाव्याप्तिश्च। अथ सपक्षविपक्षगताभावता तदा साधारणोदाहरणाव्यापकत्वम्। अथोच्यते सव्यभिचारत्वं सपक्षविपक्षसाधारणता अभिप्रेता सा चान्वयेन साधारणस्य व्यतिरेकेणासाधारणस्यानैकान्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्य संग्राहिका सपक्षविपक्षसाधारणतामात्रं त्वन्वयेन व्यतिरेकेण वेति विशेषवत्तया न विवक्षिता अतः साधारणासाधारणानैकान्तिकयोरुभयोरपि संग्रहः। विवादाध्यासितं क्षणिकं सत्त्वादित्यादेरनुपसंहार्य्यस्यापि सपक्षविपक्षभूतत्वादेव सपक्षविपक्षगतत्वाभावेन साम्यमिति। विचार्य्यमेतद्व्याख्यानं परमस्तु तावदापाततः तथापि व्यतिरेकेण सपक्षसाधारणतायाः सपक्षव्यापके सद्धेतौ धूमविशेषादौ गतत्वेनातिव्यापकत्वं यदि त्वस्य दोषस्य परिहारार्थं सर्व्वविपक्षसपक्षसाधारणमनैकान्तिकमिति रूपे। तदा व्यतिरेकमात्रेण सर्व्वसपक्षविपक्षसाधारणता धूमानुमानादिगामिनी न भवतु नाम। अन्वयेन तु सर्व्वसपक्षविपक्षसाधारणता विपक्षसपक्षैकदेशगामिनं साधारणमनैकान्तिकं शब्दो न नित्यः प्रत्यक्षग्राह्यत्वादित्यादिकं न संगृह्णातीत्यव्याप्तिरित्येकं सन्दिग्धतोऽपरं प्रच्यवते। अपि चान्वयव्यतिरेकाभ्यां सर्व्वसपक्षविपक्षगतत्वाद्धूमानुमानादौ स एव प्रसङ्गः विशेषरूपेण तयोरविवक्षित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात्। किञ्च सर्व्वसपक्षविपक्षसाधारणमनैकान्तिकमिति वाक्ये यदि सर्व्वेति विपक्षस्यापि विशेषणं तदा विपक्षैकदेशवृत्तेः सपक्षव्यापिनः साधारणानैकान्तिकस्य नसङ्ग्रहः कार्य्यत्वयत्नकोमहत्त्वात् घटवदित्यादेरव्यापकं लक्षणमिदम्। अथ सर्व्वेति न विपक्षस्य विशेषणं तदा व्यतिरेकमादाय विपक्षसर्व्वसपक्षसाधारणमनैकान्तिकमिति एतद्विपक्षैकदेशमात्रवृत्तौ विरुद्धे क्षिति र्नित्या सावयवत्वादित्यादौ गतत्वादतिव्यापकमिति। का चेयं वाचोयुक्तिः सपक्षविपक्षसाधारणमनैकान्तिकमित्युक्ते सर्व्वं संगृह्यते अन्वयेन व्यतिरेकेण वेति कथमनुपसंहार्य्यस्यासत्सपक्षविपक्षस्य सपक्षे विपक्षे वा अन्वयेन व्यतिरेकेण वा साधारण्यं स्यात् तयोरेवाभावात्। यदि च सपक्षे च विपक्षे च साधारणत्वमुभयत्र स्वरूपानुगमोऽविवक्षित स्यादानीमसाधारणानैकान्तिकाव्याप्तिः। अथोभयस्मिंस्तस्मिन्नसत्त्वं तद्विवक्षितं तदा सर्व्वाव्याप्तिः तदसत्त्वस्यातद्धर्म्मत्वात्। अत्र तदुभयवर्त्तित्वाभावप्रतियोगित्वं तदुभयसम्बन्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽभावस्तदाश्रयत्वं वाभिप्रेतं तदापि साधा-
रणोदाहरणाव्याप्तिः । अथ मन्यसे तदुभय-
साधारणत्वं नाम एकस्मिंस्ताद्रूप्यं हेतोः सत्त्व-
मसत्त्वं वा ताद्रूप्यमपरस्मिन्नपि यत्तदुच्यते
तथा सति नाव्यापकतादोष इति । नैवम् ।
मुख्यस्तावद्वचनार्थो नोपपद्यते हेतोरेकरूपस्य
सपक्षविपक्षावाश्रय इति । किं नामैकरूप-
वतो हेतोस्तावाश्रयाविति स्यात्तदा वासाधा-
धारणाव्याप्तिः तत्र सपक्षे विपक्षे च हेतो-
रसत्त्वेन तदाश्रयत्वासम्भवात् । तस्मात् स-
पक्षे विपक्षे च साधारणत्वं हेतोरनैकान्ति-
कत्वमित्यनुपपन्नमेव असत्त्वपक्षे हेतोस्तदा-
श्रयकत्वानुपपत्त्या सपक्षे विपक्षे चेति सप्त-
मीनिर्देशस्यासङ्गतत्वात् । तदभावापेक्षया
वाश्रयत्वस्योपपत्तौ हेतोस्तदाश्रयत्वे किमा-
यातम् आयातु वा किञ्चित् तथापि साधार-
णोदाहरणेषु हेत्वभावापेक्षया सपक्षविपक्षयो
र्नाश्रयता सप्तम्यर्थः किन्तु हेत्वपेक्षयैवेति
एकार्थपर्य्यवसायित्वे वाक्यस्य लक्षणाव्यापक-
तापत्तिरेव । किञ्च सपक्षविपक्षसाधारणत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि सामान्यतोलक्षणं साधारणासाधारणानैकान्तिकभेदद्वयसंग्रहार्थमुच्यते तदा सपक्षविपक्षयोरन्यत्वादिभिर्हेतोः साधारण्यमस्त्यनवापीत्यतिव्याप्तिः । अथातिव्याप्तिपरिजिहीर्षयान्वयव्यतिरेकाभ्यां सपक्षविपक्षसाधारणमनैकान्तिकमित्युच्यते तदा अन्वयव्यतिरेकयोः प्रत्येकमभिहितविकल्पानुपपत्त्या अव्यापकत्वापातः । स्यादेतत् स्वस्वभावविरोधाश्रयाश्रितसपक्षविपक्षत्वं सपक्षविपक्षसाधारण्यं विवक्षितमेव नाव्याप्त्यतिव्याप्ती इति तदप्यसत् तथाह्यस्तु तावत्सर्वपदविशेषणोपादानानुपादानपक्षोक्तदोषापातः सर्वशब्दोपादाने धूमानुमानादौ प्रसङ्गश्च । स्वस्वाभावविरोधशब्दार्थस्याप्येकस्यानुगतस्यासम्भवेन लक्षणानुगमाभावो दोषः तत्तद्भावयोर्हि विरोधः सहानवस्थानम् अनवस्थानञ्चावस्थानप्रतिषेधो न च तच्चावस्थाभावस्वरूपादन्यत् । नचाभावस्याप्यनवस्थानं भावस्वरूपादन्यत् किन्तु तदेव भावस्य स्वरूपं तत्र स्वस्वाभावविरोधाश्रय इत्यस्य नार्थं किञ्चिन्मृग्यमाणमवाप्यते । स्वस्वाभावविरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घाश्रय इति वचनं विचारमर्हति। किञ्च स्व-
स्वाभावयोर्व्विरोधविशेषणतया आधेयकोटि-
निवेशात् विशेषणघटितमूर्त्तित्वाद्विशिष्टपदा-
र्थस्य तदाधारत्वानुपपत्तेः अतिव्यापकता च
स्यात् अन्वयमादाय सपक्षे व्यतिरेकमादाय
विपक्षे वर्त्तमानस्याप्यु,क्तलक्षणोपेतत्वात्। स्व-
स्वाभावाविशेषितस्य तु विरोधस्याश्रयेऽभिधीय-
माने सर्व्वानुमानव्यापकत्वमनैकान्तिकलक्षण-
स्यापतेत्। न च वाच्यं स्वस्वाभावोपलक्षितो-
ऽविरोधोऽभिमतः तेन विशेषणपक्षोक्तदोषस्य
नावकाश इति यतः स्वस्वाभावाभ्यां विरोध-
मात्रं वा लक्ष्यते तद्व्यक्तिर्वा काचित्। आद्ये
यदेव स्वस्वाभावाभ्यां लक्षितं विरोधमात्रं तदे-
वान्यदपीत्युक्तातिव्याप्तिः तदवस्थैव स्वस्वाभाव-
पदोपादानवैयर्थ्यञ्च। अथ द्वितीयस्तदा लक्षण-
स्याननुगमः एकस्य विरोधव्यक्तिविशेषस्यात्र-
परिगृहीतस्यापरविरोधव्यक्तेरन्यत्वात्। अथ
यावत्योऽपेक्षिता विरोधव्यक्तयस्ता उपलक्ष्यन्त
इत्युच्यते किन्नोपलक्ष्यन्ते किन्नु किं केनचि-
दनुगतेन रूपेण उत प्रतिस्वं व्यावृत्तेनात्मना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमे तदेवोच्यतां किमुपलक्षणोपन्यासेन। न
च तत्सम्भवति विरोधमात्रस्यातिप्रसञ्जक-
त्वात् प्रतिस्वं व्यावृत्तेन व्यक्तीनामात्मनो
लक्ष्यत्वे तथैव तासां लक्षणप्रवेश इति भिन्नि-
तानां लक्षणत्वे सर्वाव्याप्तिः प्रत्येकलक्षणत्वे
परस्परोदाहरणाव्याप्तिः। स्यादेतत् सपक्ष
एव विपक्ष एव वर्त्तते न यः सोऽनैकान्तिकइति
लक्षणमस्तु तेन साधारणासाधारणोदाहरण
व्याप्तिर्भवतीति एतदप्यलक्षणं सद्धेतौ धूमा-
दावपि गतत्वात् नह्यसौ विपक्ष एव वर्त्ते
सर्वदा तद्वावृत्तेः नापि सपक्ष एव पक्षेऽपि
वर्त्तमानत्वात्। अथ पक्षवृत्तिरिति विशेष
यसि तथापि सद्धेतोरपरित्यागः पक्षवृत्तित्वा-
देव सपक्ष एव वृत्तेरभावात् असिद्धानैकान्तिक
सङ्कराव्याप्तिश्च। अथ पक्षव्यतिरिक्त इति
विशेषणं प्रक्षिपसि तदानीमप्रसक्तव्यावर्त्तन
मनुपपन्नं न हि पक्षाव्यतिरिक्तः सपक्षोऽपि
पक्षो वा सम्भवतीति सपक्षस्य विपक्षस्य च
कुतश्चिदव्यावर्त्तकं विशेषणमेवेदं तयोः कथं
घटते। अथ पक्षव्यतिरिक्ते वर्त्तमान इति विशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि तदानीमसाधारणाव्याप्तिः नासौ पक्ष-
व्यतिरिक्ते वर्त्तमानः। अथ पक्षव्यतिरेके-
णेति विशेषणमुपादत्से तदापि पक्षव्यतिरेक
इति पक्षविरहरूपस्योपलक्षणत्वं हेतुत्वं वा
द्वयमपि पक्षमात्रवृत्तावसाधारणानैकान्तिकेन
सम्भवति पक्षविरहस्य तत्रासम्भवादेव। निषे-
ध्यविशेषणत्वे तस्य सद्धेतौ गमनं स्यात्। ए-
तेन पक्षं विना पक्षमन्तरेणेत्याद्यन्यैर्विशे-
षणाभिधानमपास्तम्। अथ यदि पक्षव्यतिरिक्ते
वर्त्तते तदा सपक्ष एव विपक्ष एव न वर्त्तते यः
सोऽनैकान्तिकः तथा सत्यसाधारणस्यापि
व्याप्तिः। सद्धेतौ चाप्रसक्तिरिति मन्यसे तदा
भ्रान्तोऽसितराम् एवं सति नोभयस्यापि सं-
ग्रहः। असाधारणे तावद्यदि पक्षव्यतिरिक्ते
वर्त्तत इत्येतन्न सम्भवति तस्य पक्षमात्रवृत्तेः
कदाचिदपि पक्षव्यतिरिक्तवृत्तिसम्भावनानुप-
पत्तेः साधारणेऽपि निश्चितसपक्षविपक्षवृत्तौ
यद्ययं न पश्यामो यदि पक्षव्यतिरिक्ते वर्त्तेत
इति न हि निश्चितवृक्षभावायां शिंशपायां
प्रयुज्यते यदि शिंशपावृक्षः स्यादिति तत्कस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतोः संशयोपस्थापितात् कोटिद्वयादेकस्यां कोटौ तदाश्रये किञ्चिद्धर्मोपदर्शनार्थमारोप्यमाणायां यदीति प्रयुज्यते। ननु निश्चित एव वस्तुनि तस्मादसाधारणानैकान्तिकसंग्रहाय यदीत्याद्युपात्तं यत्तन्न साधारणमपि समगृहीत्। अथ विपक्ष एव सपक्ष एव वर्त्तते न यो हेत्वाभासः सोऽनैकान्तिक इति लक्षणं मन्यसे तदप्यनुपपन्नम् अनैकान्तिकत्वमनिश्चित्याग्रत एव हेत्वाभासत्वावधारणे तत एव हेतोरसाधकत्वं सिद्धमिति कृतं तदुपजीविनानैकान्तिकत्वोपन्यासेन। अथाग्रे हेत्वाभासत्वं नावधार्य्यते तदा लक्षणस्य दुरवधारणत्वं विशेषणस्य हेत्वाभासत्वस्यानवधारणात् अथ ब्रूषे असिद्धविरुद्धप्रकरणसमकालात्ययापदिष्टादन्यो हेत्वाभासोऽनैकान्तिक इति तदाप्युक्तन्यायेनैव निरस्तम्। किञ्चैवमसिद्धादिसङ्कीर्णस्यानैकान्तिकस्य न संग्रहः स्यात्। न च तदसिद्धादित्वादेवाहेतुर्भविष्यतीति वाच्यम् इतरानैकान्तिकवद्विपक्षगतत्वादिनाप्युद्भावने दोषत्वसम्भवात्। अथ मन्यसे साधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपत्वासाधारणत्वयोर्व्यतिरेकाभ्यां मिलिताभ्यां विशिष्टादन्यत्वं साधारणासाधारणानैकान्तिकव्यापि सामान्यलक्षणमस्तु । मैवम् । यदि व्यतिरेकद्वयविशिष्टादन्यत्वं तर्हि तस्य विशिष्टस्य विशेष्ये विशेषणे च इदमस्तीत्यतिव्याप्तेः । यदि व्यतिरेकद्वयवत्तोपलक्षणं तदोपलक्ष्यस्वरूपाणां यदि भेदेनैवोपलक्ष्यता तदा व्यतिरेकाविशिष्टे तस्मिन्नास्ति । न हि यदेवाविशिष्टं तन्मात्रं विशिष्टम् एवमभेदेनापि भेदाभेदात्तदेवापि तदिति चेन्न अतदपीति प्रसङ्गतादवस्थ्यात्ततोऽत्यन्तान्यत्वं लक्षणमिति चेन्न असिद्ध्यादिसङ्कीर्णानैकान्तिकोदाहरणाव्यापनात् । स्वरूपाणाञ्चानन्त्ये तत्प्रतियोगिकान्यत्वावधारणस्याशक्यता तेषामानन्त्यात् तन्मध्यपतितकतिपयान्यत्वे चान्यत्र कतिपये प्रसङ्गतादवस्थ्यात् उपलक्षणत्वे चोभयव्यतिरेकस्यान्यत्वप्रतियोगिकोट्यप्रवेशेन तत्संगृहीतव्यतिरेकपक्षतापातात् । एवञ्चादृष्टत्वाद्यादिना गोत्वादेरभूताद्वाणादिविषाणित्वानुमानौचित्यापातात् हेत्वाभासान्तरमप्येवं किन्न समग्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णीति व्यासनायां यद्देवानयो नैयत्यं वा
तस्यैव लक्षणस्य निर्वचनतापत्तेरिति । असिद्ध
त्वादिप्रकारादन्येन प्रकारेण हेत्वाभासो
ऽनैकान्तिक इति चेत् वाच्य स्तर्हि सप्रकार
कस्यान्यता ततः ततोऽन्यत्वं ज्ञेयम् । किञ्चै
तर्हि असिद्धादन्यदनैकान्तिकमिति ज्ञात्व
विरुद्धादीनामनैकान्तिकत्वेनैव संग्रहे प्र
विरुद्धादिवद्रूपान्तरासंग्राह्ययोरेव यदनेन प्रका
रेण संग्रहमकार्षीस्तन्न नियतं क्वचिदेव भव
तानियन्त्री । यदा च त्वमसिद्धादिव्यतिरिक्त
तयानैकान्तिकं लक्षयसि तदा असिद्धादि
भेदकं प्रकारमनवगम्य तदन्यत्वमशक्याधि
गममिति तदभिधाने प्रसक्ते तदाश्रया ये दोष
दर्शिता स्तैः स्वकृतिव्यतिरिक्तत्वदोषैश्च निरा
कर्त्तव्योऽसि । साध्येनाव्याप्यत्वे सति तद
भावाव्याप्तोऽनैकान्तिक इत्यपि न साध्याविशि
ष्टेऽपि गतत्वात् विशेषणीभूतसाध्याव्याप्यत्वाव
गमाच्च प्राथमिकाद्व्याप्यत्वासिद्धिरेवोपजीव्या
दूषणं स्यात् विशेषणांशस्य चासाधकत्वसा
धनसामर्थ्याद्विशेष्यतापि वस्तुगतिव्याप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वापर्य्यवसायिनि तदभावव्याप्यपर्य्यवसा-
यिनि वा तत्कालसन्दिह्यमानान्यतरव्यापकत्वे
शब्दोऽनित्यः श्रोत्रविशेषगुणत्वादित्यादावसा-
धारणे व्याप्तत्वाच्च । वस्तुतः साध्याव्याप्ते
स्तत्कालेऽपि तत्प्रतिपक्षतया अनिर्द्धारितसाध्य-
व्याप्तिके प्रकरणसमे गतत्वाच्च । एतेनानै-
कान्तिकः सव्यभिचार इति प्रत्युक्तं वेदितव्यं
व्यभिचारस्योक्तप्रकाराधिकस्य निर्व्वक्तुम-
शक्यत्वादिति । अपि चोक्तलक्षणविशेषणेन
साध्यव्यवच्छेदकादन्येन किं व्यवच्छेद्यं केनचित्
प्रतिपक्षः केनचिदन्य इति चेत् ।

कः पुनः सत्प्रतिपक्षः । तथा हि सत्प्रति-
पक्षलक्षणमनुयुक्तो यद्याह समानबले बोधित-
साध्यविपर्य्ययको हेतुत्वेनाभिमतः सत्प्रति-
पक्ष इति तत्र तथा हि किमिह बलं विवक्षितं
सामर्थ्यमिति चेत् तत् कुत्र कार्य्येऽभिमतं न
तावत्सर्व्वस्मिन्नेव कार्य्ये सत्प्रतिपक्षहेत्वोरभिन्न-
विषयबुद्ध्यादिजनकतया सर्व्वकार्य्ये समप्र-
योजकतावा असम्भवात् । नापि यत्र क्वचित्
कार्य्ये प्रकृतसाध्यं प्रति प्रतीयमानासिद्धत्वादिः

CC-0. In Public Domain. Digitization by eGangotri

दोषेणापि प्रमेयत्वप्रतिपादनादौ समर्थेन प्रति-
हेतुना सत्प्रतिपक्षताप्रसक्त्या सर्व्वहेतूनां यक्ष-
प्रकरणसमहेत्वाभासत्वापत्तेः। नापि पूर्व्व-
हेतुसाध्याभाववोधनरूपे कार्य्ये उत्तरहेतो-
रेवसमसत्प्रतिपक्षत्वे स्वसाध्यसाधकतापत्तेः
प्रतिहेतोरिति चेन्न तत्र तत्प्रतिहेतोरसा-
मर्थ्यादेव समशक्तिकत्वानुपपत्तेः इत्थमेव न
हेतुसाध्यविपर्य्ययवोधनेऽपि। अथोच्यते स्वकीये
स्वकीये प्रकृतसाध्ये यत्र पक्षसपक्षसत्त्वविपक्षव्या-
वृत्तत्वाबाधितत्वलक्षणं सत्प्रतिपक्षहेत्वोस्तुल्यं
तदभिप्रायेणेदं समबलाभिधानं तेनेदमुक्तं भ-
वति पक्षसपक्षसत्वविपक्षव्यावृत्तत्वाबाधितविष-
यत्वै स्तुल्येन वोधितसाध्यव्यतिरेकः सत्प्रति-
पक्ष इति नैतदपि युक्तम्। प्रतीयमानभागा-
सिद्धत्वेनापि प्रतिहेतुना सत्प्रतिपक्षत्वप्रसङ्गात्।
कियत्यपि पक्षे सत्त्वेन तस्य पक्षसत्त्वभावात्।
नचैष्टव्यमेव भागासिद्धेनापि सत्प्रतिपक्षत्वं
प्रतीयमानदोषान्तरेणापि तथा सति सत्प्रति-
पक्षत्वस्यैष्टव्यत्वापत्तेः हेत्वाभासान्तरत्वाविशे-
षात्। न च सर्व्वपक्ष इति कृते नायं दोष इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साध्यं यत्रैकएव पक्षः प्रतिहेतौ तस्य सत्-प्रतिपक्षस्याव्यापनात्। तत्र पक्षस्य सर्व्व-पक्षसाध्यत्वाभावादेव सर्व्वपक्षसत्त्वाभावेनोक्त-लक्षणानुपपत्तेः एतेन यावदित्यपि पक्षविशे-षणे दोषउक्तप्रायः। किञ्चान्वयव्यतिरेकिणः केवलव्यतिरेकिणा केवलव्यतिरेकिणस्चान्वय-व्यतिरेकिणा सत्प्रतिपक्षे लक्षणमिदं नास्ति सपक्षसत्तया तुल्यतायास्तत्राभावात्। न च सपक्षसत्तया तुल्येनेति लक्षणे तदनुरोधान्न कर्त्तव्यमेव तथा सत्य साधारणानैकान्तिकतया निश्चितेनापि सत्प्रतिपक्षत्वप्रसङ्गात्। नचा-न्वयव्यतिरेकिणैवान्वयव्यतिरेकिणः केवल-व्यतिरेकिणैव केवलव्यतिरेकिणः सत्प्रतिपक्षता-नव्यत्यासेनापीति नियमोऽभ्युपगन्तुं शक्यः उ-भयोरप्यनवगम्यमानदोषान्तरवत्त्वदशायामे-कतरस्मिन्नो दोषस्यावश्यम्भावितया एकतर-व्याप्यत्वपक्षधर्म्मत्वावगमोऽमे भ्रान्तिरिति बुद्धि-मादाय प्रतिपक्षनिश्चयोत्पत्तिप्रतिबन्धसाधात्तुं केवलव्यतिरेकिणान्वयव्यतिरेकिणोऽन्वयव्यति-रेकिणा च केवलव्यतिरेकिणः प्रतिहेतोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सामर्थ्यस्य दुरपह्नवत्वात् एतदेव तु सत्प्रति-
पक्षत्वस्य दोषत्वाभ्युपगमे मूलं यन्नाम व्याप्ति-
पक्षधर्म्मताप्रमितिरस्मिन् सति न भवितुमर्ह-
तीति। अथाभिधत्से पक्षसपक्षसत्त्वविपक्ष-
व्यावृत्त्यबाधितविषयत्वयोगिना बोधितसाध्य-
विपर्य्ययः सत्प्रतिपक्ष इति न निरस्तप्राय-
त्वात्। पक्षपदे सर्व्वशब्दविशेषणप्रक्षेपाप्र-
क्षेपपक्षोक्तदोषस्य केवलव्यतिरेक्यव्यापकत्व-
स्यापि भावात्। किञ्च सोपाधिमसिद्धभेदं
वदतां मते सोपाधितया निश्चीयमानेऽपि स-
यथोक्तमिदं लक्षणमस्तीति तेनापि सत्प्रति-
पक्षता स्यात्। अथ ब्रूषे असिद्धविरुद्धानैका-
न्तिकबाधितविषयत्वहीनेन बोधितसाध्यासत्त्व-
प्रकरणसम इति नैतदपि सुस्थम् आपाततो-
ऽस्फुरद्दोषेण वस्तुगत्या वासिद्ध्यादिदोषवतः
सत्प्रतिपक्षतास्वीकारात् तदव्यापकत्वात्।
किञ्च विरुद्धार्थगोचरयोः सत्प्रतिपक्षहेत्वो-
र्मध्येऽवश्यमन्यतरासिद्ध्यादिदोषेण भवितव्यं
अन्यथा धर्म्मिणो विरुद्धधर्म्मसाध्यप्रसङ्गात्
तत्रैकस्य व्यवच्छेद्यदोषानिश्चयात्प्रतिहेतावथ-

सिद्ध्यादिदोषाशङ्कायामापतितायामसिद्ध्यादि हीनेनेति लक्षणांशस्यानिश्चयात् लक्षणस्य दुरवधारणत्वम् । न च वाच्यं किमर्थं सत्प्रतिपक्षहेत्वोरन्यतरासिद्ध्यादिकमवश्यमभ्युपेयं सत्प्रतिपक्षलक्षणदोषदुष्टत्वादेव तयोर्न धर्म्मिणो विरुद्धधर्म्माध्यस्तत्वमापत्स्यत इति यतोऽवश्यं दुष्टे हेतौ व्याप्तेः पक्षधर्म्मतया वाभावेन भवितव्यं तत्सत्ताभ्युपगमे साध्यसत्ताया अभ्युपगमप्रसङ्गात् । बाधादीनामप्युपाधिव्यापनद्वारा व्याप्त्यादिभङ्ग एव पर्य्यवसानात् । सत्प्रतिपक्षत्वादुन्नीयमानोऽपि व्याप्तिपक्षधर्मताभङ्गो न विशिष्यैकस्मिन् हेतौ निर्णेतुं शक्यः अन्यतरस्य व्याप्त्यादिभङ्गेनापि सत्प्रतिपक्षत्वस्योपपत्तेः अतोऽविशेषनिष्ठतया तदुन्नयने स्थिते यदि साक्षादवधार्य्यते तदानीमसिद्धिः । अथ लिङ्गतोऽनुमीयते तदानैकान्तिकादेरन्यतमदूषणं वस्तुगत्यास्ति सत्प्रतिपक्षे तत्कथमसिद्ध्याद्यन्यतमन्नाभ्युपेयं तत्र तस्मात्तस्य दोषस्य कुत्र द्वयोर्म्मध्येऽस्तित्वमस्त्विति अनिर्द्धारणे प्रतिहेतावपि तच्छङ्कायां सत्यामसिद्ध्यादिः

CC-0. In Public Domain. Digitization by eGangotri

हीनेनेति लक्षणांशस्य दुरवधारणत्वं दुष्परिहरमेव स्यादेतत्। अस्तु लक्षणांशस्यासिद्ध्यादिहीनत्वस्यानिश्चयः संशयोऽपि तावदस्ति तत् संशयेन शङ्कितसत् प्रतिपक्षतादोषग्रस्तत्वादेवासाधकत्वं दूष्यानुमानस्य शङ्कितोपाधाविवासिद्धिशङ्कया। न च यामसिद्ध्यादिशङ्कामुपजीव्य सत्प्रतिपक्षादिशङ्कादोषः स्यात् सैव तदा दोष इति वाच्यम् असिद्ध्यादिशङ्काया एव तादृशप्रतिहेतुदर्शनमूलकतया तदुपजीवकत्वादिति। नैवम्। यतः शङ्कितोपाधिनाऽसिद्धेनाप्येवं सत्प्रतिपक्षता प्रसज्येत। ननु भवत्येवमपि तेन किन्नाम भवेत् तस्यासिद्धतया हीनबलस्य सिद्ध्यादिमता पक्षबाधं विधूय न किञ्चिदन्यत्। बाधादेव तर्हि न तेन सत्प्रतिपक्षतेति चेन्न सन्दिग्धासिद्धतया सत्प्रतिपक्षहेतोरपि तर्हि कथं परहेत्वसाधकत्वप्रसाधकत्वं भविष्यति हेत्वाभासत्वाविशेषात् हेत्वाभासान्तरं न दोषसंशयापादकमतो नैवमिति चेन्न तर्हि। यन्नुपाधिसादाय न्यूनबलतया बाध्यता तस्मादायैव तथापि न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपाधेर्दोषसंशयक्षमत्वादेव। किञ्च क्वचित् सत्प्रतिपक्षत्वनिश्चयाभावे संशयानुपपत्तिः। अथान्यथाकारं लक्षणमभिधत्से असिद्धविरोधव्यभिचारकालात्ययापदेशविरहितया प्रतीयमानेन बोधितो यदीयसाध्यस्य विपर्ययः स प्रकरणसम इति एतदपि विचारासहं केन तथा प्रतीयमानत्वमभिमतं किं प्रत्यनुमानप्रयोक्त्रा अथ प्रथमानुमानवादिना द्वाभ्यामपि वा येन केनचिद्वा। न तावदाद्यः स्वयं दोषं जानतोऽपि दूषणान्तरापरिस्फूर्तौ यद्ययं दोषं न प्रतिसन्धास्यति तदाभीष्टमेव अथ प्रतिसन्धास्यति तदानीमन्यथापि ममास्फुरद्दोषान्तरस्य पराजये अनेन कक्षान्तरारूढायां कथायां शाखान्तरं वा सङ्क्रमितुमवकाशमासादयिष्यामीत्यभिप्रायवतोऽल्पप्रज्ञस्य मयि वदत्यसत्पक्षोऽपि निर्वहतीति लोके प्रकर्षदर्शनार्थं कथमपि ग्रन्थकाराभियुक्तस्य वा तथाविधप्रतिहेतौ निर्व्वाहार्थमन्यानुयुक्तस्य प्रौढप्रज्ञस्य स्फुरद्दोषेणापि प्रतिहेतुना सत्प्रतिपक्षीकरणदर्शनात्। तत्र परेण दोषामुद्भावेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयस्यापि भावात्। किञ्च प्रतीयमानता यदि निश्चीयमानता विवक्षिता तदानीमसम्भव एव यतोविरुद्धार्थयोरेकस्याववश्यं दोषः स च कस्यास्विति तदा निर्द्धारयितुमशक्यतया प्रतिहेतावपि तत्संशयात्। अथ सम्भावना प्रतीयमानता तत्सोद्भावनसम्भावनां दूषयन्तीयदृच्छामस्तदेव दूषणमतिदेष्टव्यम्। नापि द्वितीयतृतीयचतुर्थाः परबुद्धेरवधारणतया परस्यासिद्ध्यादिविरहिता बुद्धिरत्र भविष्यतीत्यग्रेऽवधारयितुं प्रमाणाभावेनाशक्यत्वात् कथं सत्प्रतिपक्षतां प्रतिज्ञाय व्युत्पादयेत्। शङ्कान्तरञ्चात्र निरसिष्यामः एतेनासिद्धिविरोधकालात्ययापदेशव्यभिचारवत्तया व्याप्तिपक्षधर्मताविरहवत्तया च गृह्यमाणेन बोधितसाध्यविपर्य्ययः सत्प्रतिपक्ष इति निरस्तम्। केनागृह्यमाणत्वमिति निर्व्वक्तुमशक्यत्वात्। किञ्च सर्व्वेषामेवैषां लक्षणानां धर्म्यादिग्राहकानुमानबाधितेऽपि गतत्वादतिव्यापकत्वम् एतेन स्वार्थानुमाने तदाभासे वा सत्प्रतिपक्षस्य दोषत्वमपोढम्। अथोच्यते अगृह्यमाणविशेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोधितसाध्यविपर्य्ययः प्रकरणसम इति । अस्तु तावत् केनागृह्यमाणत्वमित्यादिविकल्पदोषाभिधानं यदि यः कश्चिद्विशेषोऽविशेषशब्देनाभिप्रेतस्तदा तदग्रहणं क्वचिदपि नास्तीति सर्व्वाव्याप्तिः । अथ हेतुदोषलक्षणोविशेषोऽभिमतस्तदा धर्म्यादिग्राहकानुमानबाधितेऽपि गतत्वादतिव्यापकता अगृह्यमाणहेतुदोषरूपविशेषेण बोधितसाध्यविपर्य्ययत्वात्तत्रापि तत्र हेतुदोषस्याभावादेवागृह्यमाणविशेषत्वात् । न चागृह्यमानपरमार्थस्थितहेतुदोषरूपविशेषेणेति कृते निस्तारस्तथा सति सत्प्रतिपक्षहेतुकः सत्प्रतिपक्षो न व्याप्यते । परमार्थतस्तिष्ठतीति च दर्शनीयं न ज्ञेयमिति च महती प्रज्ञा । न चागृह्यमाणहेतुदोषहेतुगुणरूपविशेषणेति विवक्षिते निस्तारः व्यतिरेकिण्यन्वयव्यतिरेकिणा सत्प्रतिपक्षे हेतुगुणरूपोविशेषः सपक्षसत्त्वलक्षणोऽगृह्यत इति तदव्यापकतापत्तिः । अथागृह्यमाणव्याप्तिपक्षधर्म्मताभङ्गाभङ्गरूपविशेषेणेति क्रियते तदा प्रष्टव्यं किमपेक्ष्य विशेषत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिदमिष्टं यदि यत्किञ्चिदपेक्ष्य तदा प्रसिद्धासिद्ध्यादिभावं हेत्वाभासमपेक्ष्य विशेषोऽगृह्यते सदनुमानात्मके प्रतिहेताविति तत्राव्यापकत्वम्। अथ प्रकृतविरोधिनं हेतुमपेक्ष्य तदा लक्षणवाक्यमीदृशं पर्य्यवस्यति। व्याप्तिपक्षधर्म्मताभङ्गाभङ्गरूपः प्रकृतहेतौ यस्य विशेषो न गृह्यते तेन बोधितो यदीयसाध्यव्यतिरेकः स प्रकरणसम इति ईदृशमप्येतद्वाक्यं विचारमर्हति तथा हि व्याप्तिपक्षधर्म्मतेति मिलितस्य भङ्गाभङ्गपदसम्बन्धे विवक्षिते प्रत्येकोदाहरणातिव्याप्तिः तत्र भङ्गाभङ्गरूप इत्यस्य च मिलितस्य विशेषपदसम्बन्धेऽभिप्रेते सर्व्वथा असम्भावितया सर्व्वाव्याप्तिः अपि चैवमस्य वाक्यस्यार्थो वक्तव्यः व्याप्तिभङ्गरूपो व्याप्त्यभङ्गरूपः पक्षधर्म्मताभङ्गरूपः पक्षधर्म्मत्वाभङ्गरूपः प्रकृतहेतुतोऽविशेषो न गृह्यते यस्य तेन बोधितो यदीयसाध्यव्यतिरेकः स प्रकरणसमः तथा सति परमाणुर्निरवयवो विश्रान्तपरिमाणतरतमादिभावत्वाद्व्योमादिवत्युक्ते परमाणुः सावयवो मूर्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वात् घटवदिति प्रत्यनुमानेन प्रतिवाद्युक्तेन परमाणुधर्म्मिग्राहिणोऽप्यणुपरिमाणतरतमादिभावः क्वचिद्विश्रान्तः परिमाणतरतमादिभावत्वात् महत्परिमाणतरतमादिभाववदित्यादेः सदनुमानतयेष्टस्य पक्षधर्मताबलेन तदीयनिरवयवत्वेऽपि प्रमाणताङ्गतस्य तत् प्रतिपन्नता स्यात् । यस्त्वस्य सदनुमानतां न मन्यते तं प्रत्येवमाद्यानि बहून्युदाहरणानि सन्तीति तेषु प्रसङ्गः न च सोऽपि तथात्वेव तस्य धर्म्मिसिद्ध्यर्थमुपजीव्यत्वेन बलवत्वात् तद्व्यवच्छेदार्थं स प्रकृतः प्रकरणसम इति कर्त्तव्यमिति चेत् तथाप्यनुपपत्तिः अत्र हि यदि यस्य न गृह्यत इति सम्बन्धस्तेन यत्सम्बन्धितया न गृह्यत इत्यर्थो विवक्षित स्तदा अव्यापकत्वं दोषस्तथा हि यत्र द्वयोरपि हेत्वोः परमार्थतः साधारणो व्याप्त्यादिभङ्गः सत्प्रतिपक्षदशायामगृह्यमाणः तत्र नास्त्येव तल्लक्षणं न हि तत्र व्याप्त्यादिभङ्गो विशेषोऽपि तु प्रकृतहेतुना सह साधारण एव । नन्वत्यन्तासतो व्याप्तिभङ्गरूपविशेषस्यापि तावत्तत्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहणमस्ति तदादायैव लक्षणं तथापि भवि-
ष्यति तर्हि यत्र वादी स्वहेतुसाधारण्यं व्याप्ति-
भङ्गादिदोषं जानन् प्रतिहेतुनिष्ठतया पर-
स्योद्भावयति परश्च परिहर्तुं न शक्नोति
तत्राप्येवं सत्प्रतिपक्षता अक्षतैव स्यात् यत
उक्तरूपविशेषवत्तया तेनासौ न गृहीतः उक्त-
रूपस्य समानतयैव तेन गृहीतत्वात् तथा
प्रतिहेतुवादिना तावद्विशेषवत्तयैव गृहीत-
स्तस्य तत्साधारणभावास्फुरणात् भ्रान्त-
भ्रान्तिसाधारणस्य चात्र ग्रहणमात्रस्य वि-
च्छितत्वादिति चेन्न प्रतिहेतुवाद्यभिप्रायेण
गृह्यमाणता पक्षस्य प्रागेव निरस्तत्वात्
किञ्च प्रतिहेतुवाद्यपि यदि साधारणतां त-
द्दोषस्य तदैव पश्येत्तदा का गतिः । यद्यसौ
वादिहेतावपि दोषं पश्येत् तदा तमुद्भावये-
त्तथा सति च तत्रैव कथासंक्रमः स्यात् सत्प्रति-
पक्षमुपेक्ष्येति चेन्न यदि पश्यन्नपि प्रतिवादी
तत्र दोषमेव मन्वयेत । यदीदानीं सत्प्रतिप-
क्षतां प्रतिज्ञातां विहाय दोषान्तरमुद्भावयामि
तदापि प्रतिज्ञात्यागान्मम [illegible] नोद्भावयामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापि प्रतिज्ञातदोषानिर्व्वाहान्मम पराजयः तदेवं वृथा दोषान्तरव्युत्पादनायास इति परास्तश्च तूष्णीमास्ते तदा का गतिः । अथ यस्य विशेष इत्युक्तलक्षणवाक्ये पदसम्बन्धस्तवाभिमतः तदा उक्त स्तावद्दोषो दोषान्तरञ्च स्यात् व्याप्यभङ्गादेर्लिङ्गद्वयार्थहेत्वोः साधारण्यासम्भवाद्विशेषपदेनाव्यवच्छेदकेन सह विशेषणविशेष्यभावानुपपत्तेः । अथोच्यते व्याप्तिपक्षधर्म्मताभङ्गाभङ्गरूपप्रकृतहेत्वपेक्षविशेषवत् तयानुद्भाव्यमानेन बोधितो यदीयसाध्यविपर्य्ययः स प्रकृतः सत्प्रतिपक्ष इति एतदपि नोपपन्नं यदि परस्त्वदीयोऽयं प्रतिहेतुरित्थं भग्नव्याप्तिक इत्येवाभिधत्ते न तु मद्धेतुतोऽयं विशेष इत्यपि ब्रूते आभासान्तरव्युत्पादनादेव प्रतिहेतोः सत्प्रतिपक्षताभङ्गात्तदापीत्थं सत्प्रतिपक्षता न निवर्त्तेत तथा सति च प्रतीयमानासिद्ध्यादिनापि सत्प्रतिपक्षीकरणमिति साधु व्युत्पादितं सर्व्वानुमानानुकूलं स्यात् । किञ्च कस्मिन् काले तयानुद्भाव्यमानत्वमपेक्षितं यदि यदा प्रतिहेतूद्भावनेन परहेतुं दूषयति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिवादी तस्मिन् कालेऽनुद्भावनं तदा पश्चाद्दृष्टेऽपि प्रतिहेतुदोषे पूर्व्वकालानुद्भावने प्रतीकारो न कश्चिदिति सर्व्वहेत्वाभासैः सत्प्रतिपक्षीकरणमदुष्टमिति गतमनुमानकथया। अथ प्रतिवादिनाभिहिते यदा पुनर्वादिवचनावसरस्तदानुद्भावनमिष्टं तर्हि तत्कथमग्रे प्रत्यनुमानवादिनावधारणीयमवमत्र विशेषदोषं नोद्भावयिष्यतीति दोषशून्यत्वात् स्वकीयस्य प्रतिहेतोः समर्थस्तदावधारयितुं शक्नोतीति येन उक्तमत्र प्रतीतदोषेणापि सत्प्रतिपक्षकरणं सम्भवतीति तत्र परेण दोषेऽनुद्भाविते विजयश्च भवतीति। किञ्च विशेषदोषशून्यत्वमपि स्वकीयहेतोः कथमयमवधारयेत् विरुद्धार्थयोस्तावद्धेत्वोरेकस्यावश्यं दोषेण भाव्यं तत्र यथा तेन स्वहेतौ दोषो न दृश्यते तथा परहेतावपि तद्दर्शने तमेवोद्भावयेत्। को हि सचेता निश्चितं दोषमुपेक्ष्य सदोषस्य निर्द्दोषसाम्येन प्रत्यवतिष्ठते तस्मात् सदोषेऽपि दोषमपश्यन्नयं न स्वेनादर्शनं दोषाभावे प्रमाणयितुमर्हतीति। अथोच्यते व्याप्तिपक्षधर्म्मताभङ्गाभङ्गरूपप्रश्नत-

हेत्वपेक्षविशेषणत्वेनानुद्भाव्यतया सम्भाव्यमानेन बोधितो यदीयसाध्यस्य विपर्ययः स प्रकृतः प्रकरणसम इति नैतदपि युक्तम् । यद्युद्भावनकालात् पूर्वकालिकी सम्भावना विवक्षिता तदा तात्कालिकानुद्भावनपक्षोक्त एव दोषोऽतिदेष्टव्यः अथोद्भावनस्य योऽवसरो भविष्यति तात्कालिकतया तदा सत्प्रतिपक्षताव्युत्पादनकाले सा नास्तीति विशेषणाभावाल्लक्षणाभावः । अथोच्यते यावत्सम्भावनानुवर्त्तते तावत्सत्प्रतिपक्षता किं सम्भावनायाः कालनियमगवेषणेन । नैवम् । एवं हि प्रतिहेतोर्दोषेनुद्भाविते प्रत्युत निर्दोषतयैव स्वीकृते दोषोद्भावनसम्भावनाया निवृत्तेः सत्प्रतिपक्षता निवर्त्तते । तथाचेत्यङ्कारमेव वादी सत्प्रतिपक्षतां परिहरेदिति साधु स्यात् । प्रतिहेतोः प्रतिक्षेपमकृत्वा स्वीकृत्यैव तं सत्प्रतिपक्षता प्रतिक्षेप्तव्येति । न च स्वीकारादेव प्रतिहेतोः पराजयः स्यात् सत्प्रतिपक्षतापरिहारोपायतया स्वीकारस्य करणात् स्वीकारे सति सम्भावनानिवृत्तत्या तल्लक्षणकस्य सत्प्रतिपक्षस्यापि

CC-0. In Public Domain. Digitization by eGangotri

निवृत्तेः। तस्मात् स्वीकारोऽप्ययं परस्यानिष्टार्थं सिद्धसाधने परकीयसाध्यस्वीकारवद्गुणाय स्वीकर्तुं न दोषायेति। यदि च सत्प्रतिपक्षो वादिनोः समानप्रतिपक्षदर्शनजनितात्स्वहेतोराभासत्वसंशयात् तदा क्वचिदपि नास्ति सत्प्रतिपक्षता स्वहेतुपक्षपातेन परहेतावेव दोषः कश्चिदस्ति मया तु न गृह्यत इति ताभ्यां मन्यमानत्वात्। यदाह निश्चितौ हि वादं कुरुत इति। अथौचित्यादावश्यंता संशयेन सत्प्रतिपक्षता स्यात् तदा सर्वैव वादे सर्वानुमानानां सत्प्रतिपक्षता दुर्निवारा। तद्यथा शब्दानित्यत्वानुमानेन बुद्धिमद्भिः शतशः शब्दनित्यत्ववादिजयात् शब्दनित्यत्वानुमानेन च प्राज्ञैः शतशः शब्दानित्यत्ववादिजयात् द्वयोः पक्षयोरनुमानेषु कतरद्वस्तुतः सदनुमानमित्यर्हतो दोषसंशयस्य दुर्निवारत्वादिति।

प्रकारभेदाभावाच्च न कालात्ययापदिष्टः पृथक्। तद्यथा बाधितविषयः कालात्ययापदिष्ट इत्यलक्षणम्। तथा हि बाधितविषयत्वं किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षितं न तावद्बलवत्ता बोधितो विषयवि-
पर्ययो यस्य तत्त्वम् यथा श्रुतस्य सत्प्रतिपक्षेऽपि
गतत्वात् । तत्र प्रत्यनुमानस्य प्रथमानुमान-
विषयविपर्ययबोधकस्य पक्षधर्मतादिबल-
सम्भवात् । अथ बलवत्तेत्यधिकबलेनेति विव-
क्षितं तदापि केवलव्यतिरेकिणोऽन्वयव्यति-
रेकिणा सत्प्रतिपक्षे गतत्वादतिव्यापकं तत्रा-
न्वयव्यतिरेकिणः प्रतिहेतोः सपक्षसत्त्वलक्षण-
बलाधिक्यसम्भवात् । किञ्चैवं प्रत्यक्षेणानुमा-
नाभासबाधो न स्यात् प्रत्यक्षस्येन्द्रियार्थसन्नि-
कर्षोत्पन्नाभ्रान्तज्ञानत्वमात्रं बलम् अनुमानस्य
तु पक्षधर्मत्वादिभूयिष्ठं बलमिति । अथ मन्यसे
अनन्यथासिद्धत्वं बलं विवक्षित्वेदमुच्यते तेना-
नन्यथासिद्धेन बोधितो यदीयसाध्यस्य व्यति-
रेकस्तत्त्वं बाधितविषयत्वमिति । मैवम् । त-
थापि वस्तुतोऽनन्यथासिद्धेन सत्प्रतिपक्षेऽपि
गतत्वम् । किञ्चान्यथेत्यन्येन प्रकारेणेत्युच्यते
अनन्यथेति चानन्येन प्रकारेण यस्मादन्यत्वं
तेनैवेत्यर्थः सम्पद्यते । तथा च वक्तव्यं तदन्यबा-
प्रतियोगीति प्रामाण्यं तदिति चेत् अहो दुर्वै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डी भवतः प्रामाण्येनेति वक्तव्ये प्रामाण्या द्योऽन्यः स यो न भवति तेन प्रकारेण य सिद्धः प्रतीत उत्पन्नो वा तेनेति ब्रुवाणस्य तथापि प्रामाण्येन बोधितविपर्य्ययविषयो यस्य स कालात्ययापदिष्ट इति न इदं रजतमिति शुक्तिं विषयीकुर्व्वति प्रत्यक्षाभासे नेदं रजतमिति प्रमाणेन बाध्यमानेऽपि हेत्वाभासविशेषलक्षणं गच्छेदतिव्यापकतामापद्येत। एवाह्यविषयिण्यामिच्छायामपि गच्छेत् प्रमाणेन बोधितो यदीयविषयस्यान्यथाभावः स हे कालात्ययापदिष्ट इति चेन्न यदि मुख्यार्थो हेतुशब्दः तदा हेत्वाभासत्वव्याघातः अथा मुख्यार्थ स्तदा कोऽस्यार्थः यत्रैष व्यवस्थाप इति सोऽभिधातव्यः प्रमाणेन बोधितो यदीय विषयस्य व्यतिरेकः स हेत्वाभासः कालात्य यापदिष्ट इति चेन्न यद्यग्रे हेत्वाभासत्वानि श्चयः तदा लक्षणस्य दुरवधारणत्वम्। अ कालात्ययापदिष्टत्वे अनिरूपित एव हेत्वा भासत्वनिर्णय स्तदा तत एव दुष्टत्वसिद्धेः दृ पश्चात्प्रतीतिकस्य कालात्ययापदेशस्योपन्यासे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेति। तदिदं त्वन्मते लक्षणमस्तु मा वा भूत् सामुद्रिकप्रामाण्येन पुनर्महदेतल्लक्षणं कालात्ययापदेशस्य येनास्य नाम हेत्वाभासभेदपदेऽपभ्रंशः समाधितः। अथ ब्रूषे हेत्वाभासत्वं हेतुवदाभासमानत्वं हेतुसदृशतया प्रतीयमानत्वं न तु हेतुदोषवत्त्वमिति। नैवम्। हेतुना तुल्यता ह्यहेतुत्वावगमं विना न शक्यप्रतिपत्तिः सादृश्यस्य भिन्नाधिष्ठानस्य तथैव प्रतीतेः। अन्यथा हेतोरपि हेत्वाभासत्वापातात्। ततश्च हेतुरूपवैकल्यस्यावश्यप्रत्येतव्यत्वे प्रागुक्तदोषानिवृत्तिः प्रमाणेन बोध्यमानो यदीयपक्षव्यतिरेकः स कालात्ययापदिष्ट इति चेन्न आश्रयासिद्धव्यापनात्। आश्रयासिद्धव्यतिरिक्त इति विशेषणीयमिति चेन्न विशेषणाद्यसिद्धाश्रयासिद्धेन सह सङ्कीर्णं कालात्ययापदिष्टोदाहरणमेवं न व्याप्येत। प्रमाणेन बोध्यमानो यदीयसाध्यव्यतिरेकः स कालात्ययापदिष्ट इति चेन्न प्रत्यक्षाभासव्यापनात्। तत्रापि हि साध्यस्य ज्ञाप्यरूपस्य व्यतिरेको बोध्यत एव प्रमाणेन प्रमाणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोध्यमानो यदीयसाध्यस्य व्यापकस्य व्यतिरेकः स कालात्ययापदिष्ट इति चेन्न प्रमाणेन बोध्यमानाभावस्य प्रकृतहेतुव्यापकत्वासम्भवात्। प्रमाणेन बोध्यमानो यदीयसाध्यस्य प्रतिज्ञातस्याभावः स कालात्ययापदिष्ट इति चेन्न साध्यानुमाने कालात्ययापदिष्टस्यैवाव्यापनात् तत्र शब्दरूपस्य प्रतिज्ञातस्याभावात् शब्दस्य परार्थत्वात्। प्रमाणेन बोधितो यदीयसाध्यस्य पक्षनिविष्टस्य व्यतिरेकः स कालात्ययापदिष्ट इति चेन्न तथाभूतस्य पक्षाभासत्वाभ्युपगमेन मुख्यपक्षत्वासम्भवात्। पक्षाभासनिविष्टत्वे सतीति तु क्रियमाणे पूर्वं पक्षाभासत्वप्रतीत्यप्रतीतिपक्षयोः पृथक् हेत्वाभासत्वप्रतीत्यप्रतीतिपक्षोक्तदोषवद्दोषो द्रष्टव्यः। पक्षत्वाभिमतांशभूतस्येति च क्रियमाणे प्रष्टव्यं किं पक्षत्वाभिमतत्वं किमु पक्षतयाभ्युपगम्यमानत्वम् अथ तत्तया प्रमितत्वम् उत प्रत्यक्षतया प्रतीतत्वम्। नाद्यः दूषकं प्रति तदसम्भवात् तेन बाध्यसाध्यस्य पक्षाभासतयैव प्रत्युताङ्गीकारात्। अनुमानवाद्यपेक्षयापि नियमाभावः सदनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामपरिस्फूर्त्तौ सन्दिग्धत्वेन प्रज्ञाभिमानवता
मयि वदति स्फुटदोषमपि को दूषयितुं शक्त
त्यभिप्रायेण यदृच्छया ज्ञातदोषस्यापि प्रश्नो-
स्य सम्भवात्। तत्रानुमानवादिना पक्ष-
वाङ्गीकाराभावेन तथाभूतबाधितानुमाना-
व्यापकमिदं लक्षणं स्यात्। न च पक्षतयोप-
न्यस्यमानत्वमङ्गीकारार्थ इति युक्तं तथा सति
स्वार्थानुमाने कालात्ययापदिष्टाव्याप्तिः। न द्वि-
तीयः पक्षत्वेन प्रसिद्धे विषये कालात्ययापदेशा-
नवकाशात्। नापि तृतीयः तदा ह्येवं लक्षण-
मिदं सम्पद्यते प्रमाणेन बोधितो यदीयसा-
ध्यस्य पक्षप्रतीतिविषयांशस्य व्यतिरेकः स
कालात्ययापदिष्ट इति अस्य वाक्यार्थस्य न
कदाचिदपि सम्भवं पश्यामः यदा तावत्प्रमा-
णेन साध्यस्य व्यतिरेकबोधस्तदा पक्षप्रतीति-
र्नास्ति विशेषदर्शने भ्रमस्यानवकाशात् ततश्च
तदा पक्षप्रतीत्यभावेन तद्विषयत्वाभावात् तद्वि-
षयांशस्येति विशेषणाभावाधीनो विशिष्टस्य
लक्षणात्मनोऽभावः यदि च प्रमाणेन साध्य-
व्यतिरेकबोधकं नास्ति तदास्यैव लक्षण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभागस्याभावाल्लक्षणाभाव इति नित्यसत्त्व-
व्यवस्थितेन लक्षणेन लक्ष्यं व्यवस्थापयन्
श्लाघनीयप्रज्ञो भवान्। न च वैशेषिकप्रक्रिया-
माश्रित्य विनश्यद्वस्थापि पक्षप्रतीतिस्तत्-
काले सम्भावनीया तदीयसाध्यव्यतिरेकाव-
गमनिवर्त्तनीया हि सा तत्साध्यव्यतिरेकाव-
गमस्य पूर्व्वतरमेव भूत इत्यवश्यमभ्युपगम्यम्।
अन्यथा प्रमाणेन बोध्यमानत्वं कथं साध्यव्यति-
रेकस्य तदावगम्येत। न च वाच्यं प्रतीतिविष-
यत्वमिदं विशेषणं न भवतीति किन्तूपलक्षणम्
उपलक्षणेन चासतापि व्यवच्छिन्नप्रतीतिरुप-
जन्यते यथा काकवन्तो देवदत्तगृहा इत्युपल-
क्षणीभूतया काकवत्तया देवदत्तगृहस्य व्यव-
हारकाल इति यत स्तत्रोपलक्ष्यगृहे स्वाभा-
विकोविशेषोऽस्ति व्यवहारकाले तेन काक-
वत्ताऽभावेऽपि तमादाय व्यवहारनियमप्रवृत्तिः
न तु तत्राप्यसत उपलक्षणस्य कारणत्वम् अत्र
तु व्यक्तीनामुपलक्ष्यत्वे लक्षणस्याननुगतत्वम्
अनुगतञ्च किञ्चिदुपलक्ष्यं न लक्षयामहे अत
उक्तमेव वाक्यार्थमादाय प्रवर्त्तमाने लक्षणात्मके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधने विशेषणासिद्धिर्दुर्निवारा । एतेन पूर्वपक्षितस्य हेतुरित्यस्य प्रत्यक्षाभासव्यवच्छेदार्थमुपात्तस्य स्थाने हेतुत्वाभिमत इत्येतादृशस्य करणं दूषित प्रायम् । अथ न पे प्रमाणेन बोधितो यदीयसाध्यस्याभावः स प्रत्यक्षाभासातिरिक्तः कालात्ययापदिष्ट इति नैतदपि सुस्थं शब्दोपमानाभाससाधारण्यात् । तद्व्यतिरिक्त इत्यपि विशेषणीयमिति चेत् एतदपि विचार्यतां किं प्रत्यक्षाभासादिव्यतिरिक्तत्वं प्रत्यक्षाभासादिभ्यो वैधर्म्यं किञ्चित् अथवा स्वरूपभेदः अथवान्योन्याभावः । न तावदाद्यः तद्भेदकस्य धर्मस्य निर्व्वक्तुमशक्यत्वात् । नापि द्वितीयः स्वरूपस्य परस्परव्यावृत्तया लक्षणानौपयिकत्वात् । नापि तृतीयः व्यतिरिक्तत्वस्यान्योन्याभावात्मनः प्रत्यक्षाभासादावपि भावेन तद्व्यवच्छेदानुपपत्तेः । ननु न व्यतिरिक्तत्वमात्रमन्योन्याभावस्वरूपं विशेषणमस्माभिरुपात्तं किन्नाम प्रत्यक्षाभासादिभ्योव्यतिरिक्तत्वं न च प्रत्यक्षाभासादयः स्वात्मभ्य एव भिन्ना स्तत्कथमुक्तप्रसङ्गस्यावकाशः । अवगत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिदं त्वद्विवक्षितं किन्तु तदेव विचार्य्यते किं प्रत्यक्षाभासादिभिः विशेषितोऽसावन्योन्याभावस्त्वयोच्यते उत तैरुपलक्षितः यं प्रत्यक्षाभासादिष्वप्रसक्तं मन्यसे । आद्यस्तावन्न भवति न हि प्रतियोगिस्वरूपाविशेषणसहितोऽभावः क्वचिदप्यस्ति ततस्तादृशस्य विवक्षितत्वे सर्व्वाव्याप्तिः । द्वितीये तु प्रत्यक्षाभासादिभिरुपलक्षणैर्यदुपलक्ष्यमन्योन्याभावस्य स्वरूपमेकं तत्प्रत्यक्षाभासादिषु बाधितानुमानेषु च साधारणमिति कथं नोक्तप्रसङ्गः अन्यदस्तु सदात्मकं विशेषणं प्रतियोगीत्वभावस्यासन्नेव तज्ज्ञानस्य विशेष्ये व्यावृत्तबुद्ध्याधानाविरोधात् विशेषणम्भवतीति चेत् । अयुक्तमेतत् विशिष्टं तावदभावस्य स्वरूपमिष्टोपात्तं तच्च विशेष्यमात्रशरीरं न भवितुमर्हति तथा सति विशेष्यस्वरूपमेवोच्यतां वृथा विशेषणपदोपन्यासः तदनुपन्यासे वान्योन्याभाववत्त्वमात्रमुपन्यस्तं भवेत् तच्च प्रत्यक्षाभासादेर्व्यवच्छेद्यस्यापि संग्राहकं ततश्च विशेष्यादन्योन्याभावादधिकं किञ्चिदवश्यं तद्विशिष्टमुपन्यस्यताम् । स च यदि प्रतियोगी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदीयोऽभिधीयते तर्हि तस्याभावस्तदानीं विशिष्टाभावः प्रसक्तः। विशेष्यमात्रं परिशिष्टं तत्र केवलमतिप्रसक्तं तस्माद्विशिष्टव्यवहार-प्रवर्त्तनकाले विशेष्यातिरिक्तं किञ्चिदनभ्यु-पेत्य विशिष्टसत्ता व्यवहर्त्तुमशक्या। अतः प्रतियोगी नाभावस्य विशेषणं भवितुमर्हति उपलक्षणन्तु स्यात् तत्र चोक्तमेव। नचान्यो-न्याभावएकोन भवति भिन्नप्रतियोगिकौ द्वाव-भावौ तौ तथा च प्रतियोगिलक्षितं तत्स्वरू-पम् अन्यदेवेति सिद्धान्ताविरोधि न युक्तम् उभयं ह्यन्योन्याभावस्यैकात्मतया प्रतियोगि एकात्मतायाश्च भेदविरोध एव। ततश्च येन रूपेण प्रतियोगित्वं तेन रूपेण भेदानवका-शात् भिन्नप्रतियोगिकता कुतोऽन्योन्याभावस्य। येन च रूपेण भिन्नता तेनान्योन्याभावं प्रति प्रतियोगिता नास्ति वस्तुनोः। ननु वस्तुतस्तयो-रेकत्वाभावात्कथमेकतया प्रतियोगित्वमन्यो-न्याभावं प्रति घटेत वस्तुनोः। यथा वस्तुनो-भूतलसंसर्गाभावेऽपि घटस्य भूतलसंसृष्टतया संसर्गाभावं प्रति तत्र यथान्यद्भूतलसंसृष्टतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टं तथात्रापि तावेव सप्रकारभेदौ तदात्मानौ दृष्टौ सोऽयं त्वद्दर्शनाभिप्रायो नास्माकं निर्वाहार्ह इत्यास्तां विस्तरः। अपि च घटपटयोः स्वरूपभेदेन वैधर्म्यभेदेन चोभयकोटौ ज्ञातयोरन्योन्याभावनिरूपणं भवति। यत्र तु प्रत्यक्षाभासादेः प्रत्यक्षाभासत्वादिना एककोटितास्तु नाम यत्तु प्रत्यक्षाभासत्वादिभ्यो व्यतिरिक्ततया प्रतिपत्तव्यं तस्य केन रूपेणैककोटीकरणं न तावत्प्रव्यक्तिभिन्नेन स्वरूपेण तेषामनन्ततया बुद्धिस्वीकर्त्तुमशक्यत्वात्। नापि यद्रूपोपात्तं विशेष्यं प्रत्यक्षाभासादिव्यतिरिक्तत्वेन विशेषणेन विशेषणीयं तद्रूपकोटीकृततयैवान्योन्याभावनिरूपणमिति युक्तं तस्य स्वरूपस्य प्रत्यक्षाभासादिसंग्राहकतया कोटिद्वैतभङ्गापादकत्वेनान्योन्याभावनिरूपणे विरोधित्वात्। तस्मात् स्वरूपभेदं वैधर्म्यभेदं वा कोटिद्वयं व्यवस्थापकमप्रतिसन्धाय अन्योन्याभावव्यवस्थापनमशक्यमिति स्थिते स्वरूपभेदप्रत्यक्षस्येह दूषितत्वाद्धर्मभेदः कश्चिद्वक्तव्यो न चासौ वक्तुं शक्यः शक्यते वा तत्रादावेव तावत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यवस्थितिरस्तु क्वतमन्योन्यव्यतिरिक्तत्वयुक्त्या। तदनेन न्यायेनान्वयाद्यतिप्रसक्त्युदाहरणान्यत्वेन व्यावर्त्तनं लक्षणवादिनोभग्नव्याघरणमसम्बन्धं निरसनीयम्। अतएव भेकान्तरं विना तद्व्यतिरिक्तत्वमेव दुर्निरूपमित्यभिप्रायेण तत्तदन्यत्वे सतीति विशेष्यमाणं वैशेषिकहेतुं नैतदेवं येन येन व्यभिचारस्तदन्यत्वे सति प्रमेयत्वादिति सत्प्रतिपक्षहेतूपन्यासादुपहसन्ति सन्त इति।

इति खण्डनखण्डखाद्ये प्रमाणतदाभासखण्डनं प्रथमः परिच्छेदः।

द्वितीयः परिच्छेदः।

ननु यदि दुर्लक्ष्या हेत्वाभासास्तर्हि निग्रहस्थानानि प्रतिज्ञाहान्यादीनि बाधकानि भविष्यन्ति। नैवम्। का पुनः प्रतिज्ञाहानिः। ज्ञातार्थपरित्यागः प्रतिज्ञाहानिरित्यलक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णम्। तथा हि झटिति सम्वरणे अनिग्रह-स्थानेऽपि गतत्वेन परदूषितेत्यपि विशेषणीय-त्वात्। किञ्च स्वीकृतेत्यनेनाभीष्टमात्रं वाभि-धीयते अस्तित्वेनेष्टं वा। आद्ये केनचिद्रूपे-णेष्टस्य रूपान्तरेण त्यागः क्व नाम नास्तीत्यति-व्याप्तिः। स्वीकारपूर्वकोऽस्वीकारस्त्यागः न रूपान्तरेण तत्र तत्स्वीकारः ततस्त्याग एवासौ न भवतीति नातिप्रसङ्ग इति चेन्न स्वीकारस्यापि परित्यागपदार्थान्तरभावे स्वीकृ-तेति व्यर्थं तत्त्यागेऽपि च नाद्यद्वितीयौ अस्ति-त्वेनेष्टस्य रूपान्तरेण सर्व्वत्रैवानिष्टत्वतन्त्रात्। संयोगाद्यव्याप्यवृत्तिता वादिपक्षे चैकस्य संयोगस्यास्तित्वनास्तित्वाभ्यामभ्युपगम्यमानत्वात् एवञ्च कालदेशादिभेदेन सत्त्वासत्त्वाभ्युप-गमेऽपि प्रसङ्गोद्रष्टव्यः। तस्यैव तदैव तत्रैव तेनैव तथैवेष्टत्वानिष्टत्वे विवक्षिते भवेति चेत् एवं तर्हि कालमभ्युपगम्यासभ्युपगच्छत प्रतिज्ञा-हानिर्न स्यात् तत्र तदेत्युक्तविशेषणाभावात्। न हि कालः कालान्तरमात्मानमेव वाध्यासे काले तदेति विशेषणप्रतिक्षेपे अन्यत प्रक्षेपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणैकताक्षतिः। कालं प्रति च प्रतिज्ञाहाने-
रदोषत्वे तद्दन्यत्राप्यदोषत्वापातः यदैव स्वी-
कारः स्तदैवास्वीकारासिद्धेश्च। तदेति तत्-
कथाकालो विवक्षित इति चेन्न तच्छब्दस्य
व्यक्तिपरत्वे लक्षणानुगमः वादादित्वेन साध्ये
कदाचित्तद्विपरीतवादान्तराकरणप्रसङ्गः। एवं
तथैव तस्यैवेत्यादिपदस्य द्रष्टव्यम्। उक्तेति
पदस्य चापसिद्धान्तव्यवच्छेदकस्य विरुद्धन्याये-
नासमर्थविशेषणत्वम्। एवं सर्व्वनिग्रहस्था-
नेषु द्रष्टव्यमिति संक्षेपः। प्रतिज्ञाहान्यादी-
त्यादिपदेन च किं संगृह्यते प्रतिज्ञान्तरा-
दीति चेन्न प्रतिज्ञान्तरमेव न निरूपयितुं श-
क्यते। तद्यथा स्वोक्तस्य परदूषितस्य साध्य-
भागस्य पूर्व्वानुक्तविशेषणवतोऽभिधानं प्रति-
ज्ञान्तरमित्यलक्षणं तथा हि यत्र वादिना
प्रथमं सविशेषणः प्रतिज्ञाभागोऽभिहितः
परेण निर्व्विशेषणोक्तस्तस्माद्दूषितः ततो वादी
प्रथमाभिहितं सविशेषणमेवोपन्यस्येदयं म-
योक्तं न तु निर्व्विशेषणमतोऽनिरनुयोज्यानु-
योगोभवत इति सदुत्तरमेव ब्रूते तत्रापि गत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादतिव्यापकमेतत्। पूर्व्वानुक्तविशेषणवत्त्वं तत्र नास्ति तत्कथमतिव्याप्तिरिति चेन्न प्रयमोक्तेः प्रागभावस्य पूर्व्वं स्थितत्वात्। विशेष्योक्तिरपि तदा नासीदिति चेत् किमायातं तावता विशेषणानुक्त्यतिप्रसङ्गस्य। विशेष्योक्तिकाले विशेषणानुक्तिर्व्विवक्षितेति चेन्न एककर्त्तृकाया वाचो युगपदसम्भवेन सर्वत्र तथाभावस्यैव भावात्। विशेष्योक्तेरनन्तरकालइति चेन्न नीलोत्पलमित्यादौ पूर्व्वनिपातितविशेषणे तदभावात्। विशेष्योक्तेरव्यवहितपूर्व्वकाल इति चेन्न उत्पलं नीलमित्यादौ तदभावात्। अव्यवहित इति चेन्न बहुविशेषणके विशेष्ये तदभावात्। विशेषणाभिधानोचितकाल इति चेन्न नानाविशेषणकेे विशेष्ये क्रमवृत्तित्वाद्वाचः क्रमेणाभिधीयमाने य एकविशेषणाभिधानकाल सोऽपरेषामपि विशेषणाभिधानानां योग्योभवत्येवेति तदान्येषां क्रमभाविनामभावात्तैरतिव्याप्तिः। सर्व्वस्मिन् योग्यकाल इति चेन्न दूषणानन्तरकालस्य योग्यकालत्वाभ्युपगमेऽव्याप्तिः दूषणपूर्व्वकालस्य तथाभिमतत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व दूषणानन्तरभाविन्या विशेषणोक्तिव्यक्ते तदानीमभावात् पूर्व्ववदतिव्याप्तिः। सर्व्वस्या स्तज्जातीयाया विशेषणस्योक्तेरभावोऽविवक्षित इति चेत् तद्यक्तीनामभावप्रतियोगिभूतानां सर्व्वासां पृथक् पृथक् प्रमाणेन केनापि अस्मा-दृशा प्रत्येतुमशक्यत्वात् अभावानिरूपणेन लक्षणस्याज्ञानासिद्धि प्रसङ्गात्। सामान्यप्रत्या-सत्त्या व्यक्तयः प्रतिभान्तीति निरस्तमनुमानाद-सरे। एतेन पूर्व्वमविशिष्टस्योक्तस्येति विशे-षणं प्रक्षेप्तव्यमिति निरस्तम् उत्तरकालवाच्य-विशेषणकविशेष्यस्य प्रथममविशिष्टोक्तत्वसम्भ-वस्य दर्शितत्वात्। किञ्च प्रथममविशिष्टमुक्त्वा भवता यदि विशेषणमिदं प्रक्षिप्यते तदा हेत्वन्तरं भवतोऽपि स्यात्तथापि तदभावे वा ममापि कुतः प्रतिज्ञान्तरम्। अथ प्रथमसे-वेदं विशेषणमुपादाय ब्रवीषि तथाप्यव्याप्तिः प्रथमं सविशेषणमुक्त्वा विशेषणवैयर्थ्यममेव झटिति सम्बरणान्निर्व्विशेषणेऽभिहिते परेण दूषिते पुनः सविशेषणमभिदधतो नैवं प्रति-ज्ञान्तरं स्यादित्यव्याप्तिः स्वपरसाध्यपूर्वपदानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवेचने व्यक्तौ पतनादव्याप्तिस्य प्रकरणादिलभ्यतया प्रागनुक्तस्य भ्रान्तपरदूषितस्य प्रकरणलभ्यस्य विशेषणवत्तयानुवदतोऽपि सद्वादे प्रसङ्गः। अनुक्तस्थाने चाप्रतिपादितकरणेऽपि दोषः परस्मिन्नजातप्रतिपत्तौ प्रतिपादितत्वानुपपत्तेरित्यादि स्वयमूहनीयम्। प्रतिज्ञान्तरादीत्यादिपदेन किमिष्टम्। प्रतिज्ञाविरोधादिति चेन्न यतएककर्तृकैकवाक्ययोर्मिथोव्याघातः साध्यविपरीतव्याप्तत्वोद्भावनानपेक्षोद्भावनः प्रतिज्ञाविरोध इत्येतदलक्षणम्। तथा हि भूतले घटोनास्तीत्यादावपि गतत्वे नातिव्यापकमिदम्। वचनयोर्हि व्याघातोऽन्योन्यविरुद्धार्थत्वं तच्चेहास्ति घटोऽस्तीत्यंशस्य घटसत्त्वबोधकत्वात् न कारकस्य च तन्निषेधकत्वात्। नन्वयुक्तमिदमुच्यते न हि घटोनास्तीत्यत्र घटोऽपि विधीयते घटनिषेधोऽपि येन मिथोव्याघातः स्यात् किन्तु घटोनिषिध्यते घटनिषेध एव तु विधीयत इति यावत् तत् कुतोव्याहतिरिति चेत् मैवं घट इत्यस्य तावदंशस्य घटविधिबोधकत्वं नास्तीत्यस्यापि तत्-

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषेधार्थत्वं भवतापि मन्तव्यम्। यदि त्वेवं नाभ्युपैषि तदा तयोरविरुद्धार्थतया घटस्यापेक्षितनिषेधस्य भूतलाश्रितं द्वयमस्य वाक्यस्य बोधनीयं स्यादिति तस्माद्विधिरूप एव घट इति तत्प्रतिषेध एव च नेति किमेतावेककर्तृकवाक्यांशौ न भवतः परस्परविरोधार्थाभिधायकौ वा न भवतो येन लक्षणमिदं भवतस्तत्र न गच्छेत्। न मिथो विरुद्धत्वमात्रं मिथोव्याघातकत्वं किन्त्वेकदेशकालादौ सिद्धार्थयोरस्तित्वम्। न च नास्तीत्यनेनैककालादौ विधिनिषेधौ वर्त्तमानौ बोध्येते इति चेन्न उक्तोत्तरत्वात् देशकालाद्यनन्तर्भावे विरोधस्यैवानुपपत्तेः। किञ्च यद्येकदेशादौ विरुद्धास्तित्वं प्रामाणिकमभ्युपैषि तदा विरुद्धशब्दस्तावयमन्य एव सामयिकार्थः कश्चित् प्रमाणेन तथाभूतस्य ग्रहणादेव विरुद्धत्वाभ्युपगमभ्रान्तेः। अथ प्रामाणिकं तन्नाभ्युपैषि तदा अप्रामाणिकं मिथोव्याघातकत्वं का नाम नास्तीत्यतिव्याप्तिः। अथ मन्यसे यथा परैरभिधीयते अर्थौ तथा मिथोव्याघातकाविति ब्रूमः तत्र च प्रमाणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसरत्येवेति न कथमपि प्रमाणप्रसूतौ विरोधः भाषापरिभाषामात्रत्वापत्तेः यथा परेणोक्तोऽर्थः तथा मिथोव्याघातक इत्यपि क्वचिन्मिथोव्याघातकमर्थमप्रमाय न वक्तुं शक्यम्। प्रसज्यते मिथोव्याघातो न प्रसाध्यत इति चेन्न क्वचिदप्यप्रमितस्य प्रसञ्जयितुमपि भवतोऽशक्यत्वात्। मा प्रमायि अप्रमायैव तद्व्यवहार इति चेन्न क्वचिदप्यप्रमितमाभासमात्रोपस्थितं क्व नाम नोपस्थापयितुं शक्यमित्युक्तौ वातिव्याप्तिःरावर्त्तते। अनेकत्र प्रमितनियतयोरेकत्र प्रसञ्जनमिति चेन्न प्रसञ्जकस्य तद्द्वयैकत्रस्थितिनियतताऽप्रमितावविरोधस्यानेवम्भावे वा नापादकत्वस्यापत्तेः। एकैकव्याप्याभ्यां पृथक् पृथक् तद्द्वयापादनमिति चेन्न एकैकमव्याघातात्। अर्थाद्द्वयं स्यादिति चेन्न अर्थापत्त्यर्थत्वेनैवाव्याघातात्। अर्थापादानं न साधनमिति चेन्न मिथोविरोधित्वेन तर्काभासत्वापत्तेः। इष्टापादानाच्च मिथोव्यघातात् कथं तथा स्यादिति चेन्न तद्द्वयधर्म्मकत्वात् व्याघातापत्तेर्धर्म्मिणि प्रमाणापेक्षायामव्याघातात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमादीनां दोषाणां परं प्रत्यभिधाने तत्रापि सर्वमिदं सुवचमिति चेन्न तत्राप्यन्यत्र दोषोऽसमापद्यत इति प्रतिवन्दीग्रहणतः किं परपक्षे दोषापादानमात्रं विवक्षितम् उत यस्त्वया तत्र समाधिरभिधेयः स मयापीत्यभिप्रायात् स्वपक्षे समाधिः । न तावदाद्यः अप्रस्तुतत्वात् परोक्तदोषानुद्धारे तावतैव कथायास्तदहंस्य पर्य्यवसानात् निग्रहापरिहारावधित्वात्तयोः द्वितीये तु स एवाभिधीयतां का नो हानिः भवता तावदभिधीयतां कस्तत्र समाधिस्ततो मयाप्यभिधेय इति चेन्न मया तदभिधानस्य साम्प्रतमप्रस्तुतत्वात् नहि मया स्वपक्षसाधनं त्वया च तद्दूषणं प्रकृते वक्तुमारब्धमस्ति किन्तु त्वया स्वपक्षोनिर्व्वाह्यः तद्दूषणञ्च मयाभिधानीयमिति कथा प्रस्तुता वर्त्तते । ईदृशि च कथा विभागे मत्पक्षसमाधानाय मां पर्य्यनुयोक्तुं भवतः कुतोऽधिकारः अथ विशेषत स्तन्निष्टङ्कने किं प्रयोजनमस्ति तावदेतादृशि चोद्ये परिहारो यतस्त्वयापि स्वपक्षेऽसौ स्वीकार्य्य इत्याशयस्ते सोऽपि न युक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न हि मत्पक्षे चेत्समाधिरस्ति तावता तत्पक्षेऽपि तेन भवितव्यमित्यत्र किञ्चिदपि प्रमाणमस्ति। साम्यादेवमिति चेन्न वैषम्यस्यावश्याभ्युपेयत्वात्। यदि तद्गतमसाधारणं स्वरूपमादाय सदूषणं प्रति तन्त्रसिद्धान्तं वा तत्र समाधिः स्यात् अत्र च त्वत्पक्षे तदभावान्न स्यात् तथा सति साम्यमात्रात्कथं समाधिरसावयाप्रोति निश्चेतुं शक्यते। कोऽसौ तत्र विशेष इति चेन्न मया साम्प्रतं तदभिधानस्याप्रस्तुतत्वमित्युक्तत्वात्। चोद्यसाम्यात् समाधिसाम्यमिति चेन्न दूष्यगतविशेषाभावस्यावविशेषितत्वादिनापि तद्वैषम्यसम्भवात् यथा सद्व्यवहारस्य सत्तास्वीकारकत्वे तुल्येऽपि सत्तायां तदभ्युपगमे अनवस्थया तदाश्रये च तदभावेन एवमन्यत्रापि बहुलं दर्शनादिति। किञ्च परोद्भावितमसिद्ध्यादिकमपरिहृत्य प्रतिबन्द्या प्रत्यवतिष्ठमानस्य कोऽभिप्रायः। किं यदिदं दोषतया परेणोद्भावितं तददूषणम् अदूष्येऽपि गतत्वात् उत दूषणे तदा दोषत्वस्याशक्यपरिहारात् परिहारेऽपि वा तस्यालक्षणत्वप्रस-

CC-0. In Public Domain. Digitization by eGangotri

ङ्गात्। यद्येतद्दूषणं कथं तर्ह्यदूष्यत्वेन वादि-
नाङ्गीकृतेऽपि प्रतिबन्दीस्थाने गतमिति चेन्न
यद्येतद्दूषणं कथं दोषलक्षणोपपन्नमित्यत्रापि
दीयतां दृष्टिः। नियामकाभावे तर्ह्येतदीय-
दूषणत्वे सन्देहः पर्य्यवसित इति चेत् अस्तु
दोषत्वसन्देहेऽपि भवदीयसाधनस्यासाधक-
त्वात् सन्दिग्धासिद्धवत् किञ्च यल्लक्षणवतोऽस्य
दोषत्वरुन्द्धे ह स्वलक्षणक एवायमन्यत्रापीति
तत्राप्यसिद्ध्यादेरदूषणत्वमेव स्यादितीयं प्रति-
बन्दी दुरुत्तरा वादिनेति। नापि द्वितीयः तथा
ह्युभयवादिसम्मतादूष्यत्वं धूमानुमानादिकं
यदि प्रतिबन्दी करोति परस्तदा तद्दर्शनेऽन्यत्र
क्वचिदप्येतदसिद्ध्यादिकं नोद्भावनीयं परसाधनेषु
तस्यैव धूमानुमानादेः प्रतिबन्द्याभयादित्येषा
मयापि सुग्रहैव तं प्रतिबन्दी अत्रापि शक्यत
एव पठितुं यतोभयोः समो दोष इत्यादि।
अथ यं विशेषमादाय प्रतिबन्दी स्यात् तस्मात-
स्यानुद्भावनं न तु सामान्यत एवेति चेन्न तत्र
विशेषे प्रतिबन्द्या त्याजितदुष्टत्वे गतत्वात्तल्ल-
क्षणमेव नेति स्यात् विशिष्य तद्विशेषत्याजने च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशस्य लक्षणस्यासिद्धिरेव स्यादिति कृतं प्रतिबन्द्या। अथ मद्दर्शनमात्राभ्युपगताद्दूषणं किञ्चित्पदार्थं प्रतिबन्दीं करोति तदैतदुक्तं तेन स्यात् इह नेदं दूषणं वक्तव्यमित्यभिधानेऽनयैव युक्त्या तवेष्टभङ्गप्रसङ्गादिति। तन्न इदमिह दूषणं वक्तव्यमनभिधानेऽस्यैवानिष्टस्य परसिषाधयिषितस्य सिद्धिप्रसङ्गादित्यभिधानानुकूलाया अपि प्रतिबन्द्याः सम्भवात्। नन्वेवमेवास्तु तथाचाभिधानेऽनभिधाने चोभयतःपाशा प्रतिबन्दीरज्जुर्भवत एव दुर्निवारा स्यात्। मैवम्। मिथोविरुद्धायाः प्रतिबन्द्या स्तर्काभासत्वात् मिथोविरुद्धत्वस्य तर्कदूषणत्वात्। तत्प्रतिपक्षानुमानवत् द्वयोरपि परस्परप्रतिक्षेपेणैवोपक्षीणत्वादिति न्यायद्वितीयाध्यायप्रथमाह्निकसूत्रे च "प्रमेया च तुलाप्रामाण्यवत्,, इत्यत्रापादितदृष्टान्ताभावलक्षणदोषसाम्येन प्रत्यवस्थितं पूर्वपक्षवादिनं निराकर्तुमाचार्यः समानमित्यनुत्तरमभ्युपगमात्। अभ्युपगतं तावद्भवता नास्मत्पक्षे दृष्टान्तोऽस्तीति ब्रुवन्नुद्योतकरो यत्रोभयोरित्यादि वदतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भट्टस्य प्रतिभटीकर्त्तव्यः तत् किं प्रतिबन्द्यादि-
दूषणञ्च भवत्येव नन्वेवं भवतोऽपसिद्धान्तः
स्यादिति चेत् तर्हि दर्शयापसिद्धान्तस्य लक्ष-
णम् प्रकृतसम्बन्धतया वाञ्छालेशापसिद्धान्ते भ-
वतः किमिति नापसिद्धान्तः स्यात्। सिद्धान्त-
विपरीताभ्युपगमोऽपसिद्धान्तः प्रतिबन्द्यादि च
भवता सिद्धान्तत्वेनाभ्युपेतं यथेदं दर्शनमा-
स्थित्याभिधेयमिति भवता दर्शनविशेषाभ्युपेत-
त्वात् दर्शनस्य च तत्तत्पदार्थस्वीकारात्मक-
त्वात् तेषु पदार्थेषु प्रतिबन्दीदूषणादेः प्रविष्ट-
त्वादिति चेन्न लक्षणमेव तावदपसिद्धान्तस्य
नोपपद्यते स्वसिद्धान्तविपरीतमभ्युपगच्छतो-
भवतोऽपसिद्धान्तप्रसङ्गात्। स्वसिद्धान्तत्या-
गोचित इति चेन्न विशेषदूषणपूरणमन्तरेण
तल्लाभात् अन्यथा सर्व्वत्र विशेषणोपादान-
प्रयासवैयर्थ्यं स्यात्। एवमेवाभ्युपगमे भवत
एवापसिद्धान्तकत्वा निष्ठत्यापतेत् स्वसिद्धान्ते
गतयो हेत्वादौ विशेषणोपादानदर्शनात्।
परसिद्धान्तहेतूनाञ्चानुपात्तविशेषणाना मनै-
कान्तिकीकृत्य वञ्ज्यो भवच्छास्त्रे दूषितत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमं स्वशब्दं विशेषणमनुपादाय दूषणभये-
नेदानीन्तत्करणे च हेत्वन्तरं नाम निग्रह-
स्थानं भवतः हेत्वन्तरं हि प्रथमविशेषणं सा-
धकभागमभिधाय पश्चाद्विशेषणवत्तद्वचनम्।
किञ्चैवं लक्षणमभिदधानस्य भवतोऽप्राप्त-
कालतापातः अप्राप्तकालोऽवयवविपर्य्यास इति
लक्ष्यमभिधाय हि लक्षणाभिधानं युक्तं तस्य
च भवता विपर्य्यासः कृतः एवमेवाभ्युपगमे
भवत एवापसिद्धान्तात्। यस्तु प्रथमत एव
सविशेषणमुपादत्ते तं प्रत्यनुपात्तविशेषण-
पक्षाभिहितो दोषो वक्तव्यः। मदीयो हि सि-
द्धान्तः स्वसिद्धान्त एव मम अत्र वाक्येऽभ्युप-
गमपदश्रवणात् अभ्युपगन्ता लक्ष्यते तस्य यः
स्वकीयः स स्वशब्दार्थः पर्य्यवस्यतीति चेन्न ममा-
भ्युपगन्तृत्वात् ममापि हि किञ्चिदभ्युपगम्यत
एव। विपरीताभ्युपगन्त्रपेक्षित इति चेन्न
अविशेषात्। सिद्धान्तविपरीताभ्युपगन्त्रेति चेन्न
तथाप्यविशेषात् ममापि त्वत्सिद्धान्तविपरीता-
भ्युपगन्तृत्वात्। स्वसिद्धान्तविपरीताभ्युपगन्त्रा
तथापेक्षित इति चेन्न नूनमतिप्राज्ञोऽसि यत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वपदमभ्युपगन्ता विशेषयितुं प्रवृत्तोऽभ्युपगन्तारमेव स्वपदद्वारा विशेषयसि परस्पराश्रयादपि न विशेषि स्वपदेऽपि साधारण्यप्रत्यवस्थानं परोक्तं पुनस्तदवस्थमेवेति च न प्रतिसन्धत्से । यस्य यः सिद्धान्तस्तेन तत्परित्यागोऽपसिद्धान्तस्तदीय इति चेत् । मैवम् । यस्य यः सिद्धान्त इति पुरुषव्यक्तिविशेषसिद्धान्तव्यक्तिविशेषपरत्वे असाधारण्यादव्यापकत्वं लक्षणदोषः । यस्येति सिद्धान्तसम्बन्धिन इत्यर्थे तेनेति सिद्धान्तसम्बन्धिनेत्यर्थे च भवतोऽपसिद्धान्तात् । तथा हि सिद्धान्तसम्बन्धिनो मम यः सिद्धान्तः तस्य सिद्धान्तान्तरसम्बन्धिना भवता त्यागोऽस्त्येव । त्याग एव तस्य नास्ति मया परिगृहीतविषयत्वात् त्यागस्येति चेन्न यदि त्यागोऽस्वीकारस्तदा न परिगृहीतविषयतानियमः अथ स्वीकृतस्यास्वीकारस्तदा मया स्वीकृतस्य भवता अस्वीकारो भवत्येव तथेति विशेषो नास्ति । अथ तेनैव स्वीकृतस्य तेनैवास्वीकारः सोऽपि न तेनेति स्वीकर्त्रेत्यर्थे ममापि स्वीकर्तृत्वेन मया स्वीकृतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवता स्वीकारे तवापसिद्धान्तापातः। एकेनैकस्य स्वीकृतस्यास्वीकारोऽपसिद्धान्त इति चेन्न एकेनेति यद्येकसंख्यायोगिनेति तदा मम यथैकसंख्यायोगित्वं तथा तवापीति स एवापसिद्धान्तापातः। अथैकेनेत्यभिन्नेनेति तथापि स्वस्मादभिन्नत्वं तव च मम च मानसम्. अन्यथास्मादभिन्नत्वं न मम न वा तवेत्यपसिद्धान्तविषयोच्छेदः। अथ स्वीकर्त्तुरस्वीकर्त्तृतो न भिन्नत्वं तदायमर्थः स्यात् स्वीकर्त्तृतो न भिन्नेनैकस्य स्वीकृतस्यास्वीकारोऽपसिद्धान्तः तथा च स एव भवतोऽपसिद्धान्तः मया यदीयाङ्गीकारः किञ्चित्स्वीकर्त्तुरभिन्नस्य भवतस्तदीयास्वीकर्त्तृत्वात् एतेनैकस्यैकेन स्वीकारास्वीकारावपसिद्धान्त इत्यपास्तम् मिलितयोरावयोरपसिद्धान्तापातात्। अथ तत्स्वीकर्त्तुरेव तदस्वीकर्त्तुरभिन्नत्वमेकशब्देनाभिमतं तदापि यदि स्वीकारविषयाभिन्नत्वं तच्छब्देनोच्यते अस्वीकारविषयस्य तदा स्वीकर्त्रन्तरस्वीकारविषयस्य भवता किञ्चित्स्वीकर्त्रभिन्नास्वीकारविषयतया अस्वीकारविषयाभिन्नत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वीकारेण भवतोऽपसिद्धान्तप्रसङ्गस्य दुर्व्वार-त्वात्। एकेन स्वीकर्त्ता न तु भिन्नेन स्वीकारास्वीकारौ विवक्षिताविति चेन्न एकेन स्वीकर्त्तव्यमेतदेव विवेचयन् भवांस्तदाकर्णनाभिहित-तद्दूषणगणाव्याहृत्यापत्त्या कथय कथं न वन-समयसमागमोड्डीयमानतरलतरतरङ्गिणीवेणि-जलविवर्त्तनिर्व्वर्त्तितावर्त्तचक्रचङ्क्रमणाटणक-दम्बविडम्बनामनुभविष्यसि। स्वीकृत्या स्वीकारः स इति चेन्न स्वार्थविवेचनेनोक्तबाधा-पातात् अस्वीकृत्य स्वीकारे च तदभावापत्तेः। किञ्च सिद्धान्तपरित्यक्तरि यदपसिद्धान्तोद्भा-वनं तत् किं स्वीकृतदर्शनानुमतापसिद्धान्तदू-षणभावे वादिनि उतान्यथाभूते। आद्ये पूर्व-सिद्धान्तवदपसिद्धान्तेऽप्यनेन व्युत्थातुं शक्यते तत् किं वक्तव्यं न तावत् वक्तव्यमेव किञ्चित् पूर्वसिद्धान्तत्यागादेवापसिद्धान्तेन निगृहीतत्वा-दिति युक्तम् अपसिद्धान्ततत्परिहारस्य दूषण-त्वान्यतरासिद्धेः तेनाभिहितत्वात्। अन्यथा स्वाभिप्रायेणासिद्धिमुद्भाव्यैव कथां विच्छिन्दानो विजयेत परासिद्धिपरिहारं नापेक्षेतेत्यनसिद्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वर्ण्यासिद्धिमुद्भाव्य परं पराजित्याप्रत्यूहं गृहान् प्रतिष्ठेत। निगृहीतस्य तस्यापराभिधानस-नादरणीयमेवेति चेन्न अन्यतरासिद्ध्या निग्रह-परिहारस्यैव तेनाभिधीयमानत्वात् तथापि-नादरणेऽनसिद्धावसिद्धिमुद्भाव्य पराभिधीयमान-मसिद्धिपरिहारमनादृत्य विजयेतैवेत्युक्तम्। अथ मन्यसे मध्यस्थेनैव तद्विचारणीयं किमन-सिद्धावनेनासिद्धिरुक्ता अनपसिद्धान्ते वापसि-द्धान्तः एतद्विचार्य्यते नैव जयपराजयाव-धारणीयौ एतदर्थमेव मध्यस्थोपस्थापनमिति न तर्हि वादिना साधनेऽभिहिते दुष्टमेतदि-त्यभिधायैव प्रतिवादिना निवर्त्तनीयं मध्य-स्थस्तु परमार्थतो दुष्टत्वमदुष्टत्वं वा तस्य साध-नस्य विचार्य्य जयपराजयावधारयिष्यति सोऽयं प्रस्तव निर्वृतीभूतपिकदाम्पत्यापत्यपो-षणकृतमहायासवायसव्यसनं समासादयिष्यति मध्यस्थोवराकस्तावकदुष्परामर्शप्रकर्षेण। अ-थोच्यते सम्प्रति विप्रतिपद्यतां नामापसिद्धान्ते-ऽप्यसौ, किमेतावता पूर्वं स्वीकृतापसिद्धान्तदू-षणाभावस्य दर्शनस्य तावत्तेन स्वीकरणमकारि

तद्वैवादायापसिद्धान्तस्योपन्यासो युक्त इति । नैवम् । यदीदानीन्तन्यननुमतिरस्य नाद्रियते तस्याभ्युपजातायामपि प्राक्तनानुमतिस्तादृश्यैव च दूषणप्रवृत्तिस्तदापसिद्धान्तस्यापि कुतोऽवकाशः स हि पूर्व्वानुमतस्येदानीमननुमतिमाश्रित्यैव प्रवर्त्तते नान्यथा । तस्मात् स्वीकृतापसिद्धान्तदूषणभावमपि वादिनं प्रति विप्रतिपत्तिकाले साधनीयमपसिद्धान्तस्य दोषत्वमिति द्वितीयानवकाशः । यस्य तु सौगतादेर्मतेऽपसिद्धान्तो न दूषणं तं प्रत्यवश्यं साधनीयमेवास्य दूषणम् । नच वाच्यं योऽपसिद्धान्ते विप्रतिपत्तिं करोति तं प्रति व्याघात एवाभिधेयः दर्शनविशेषं स्वीकुर्व्वता प्रथमं तद्दर्शनान्तर्निवेशितः प्रतिबन्दीदूषणत्वादेस्तेन स्वीकारात् पश्चात्तस्यैवास्वीकार स्तावेतौ स्वीकारास्वीकारावेकैकस्य व्याहताविति । यद्ययमपसिद्धान्तात्मैव व्याघातः तदापसिद्धान्तदूषणत्वेऽपि विप्रतिपन्नस्य विप्रतिपत्तिमभ्युदस्य नाभिधातुं युक्तः । अथ दूषणान्तरमयं व्याघातोऽपसिद्धान्तमनुपजीव्य सम्भाव्यमानोद्भावन

CC-0. In Public Domain. Digitization by eGangotri

तदा सार्व्वत्रिकापसिद्धान्तोदाहरणेऽयमेवास्तु किमपसिद्धान्तस्य दूषणत्वाङ्गीकारेण। किन्त्वेवमपसिद्धान्त उद्भाविते पश्चात्तद्विप्रतिपत्तावुपजातायामपसिद्धान्तमुपेक्ष्य व्याघातलक्षणस्यास्य दोषान्तरस्याभिधाने प्रतिज्ञाहान्यापत्तेः प्रतिज्ञाहानिः स्वीकृतोक्त त्याग इति। एवं प्रथमं किञ्चिद्दूषणमुक्त्वा तत्परिहारेऽपि दूषणान्तराभिधाने न प्रतिज्ञाहानिरिति गतं प्रतिज्ञाहान्यादिभिर्निग्रहैः। प्राक् प्रतिज्ञातदोषनिर्व्वाहार्थमेव निग्रहान्तरकथनान्नैष दोष इति चेन्न पूर्व्वनिग्रहपरिहारसक्तवति तेनैव पराजिते निग्रहान्तरोपन्यासस्यायुक्तत्वादिति। न चानेन भयेन भवता व्याघात एवाभिधेयः प्रथमं नापसिद्धान्त इति वाच्यमपसिद्धान्तवैयर्थ्यप्रसङ्गात् सर्व्वत्रापसिद्धान्तोदाहरणे व्याघाताभिधानस्यैवमङ्गीकर्त्तव्यत्वात्। न हि कश्चिच्छक्यतेऽवधारयितुं मयापसिद्धान्त उद्भाविते नायं विप्रतिपत्स्यत इति। नन्वेवं विप्रतिपन्नं प्रति अपसिद्धान्तस्य दूषणत्वं प्रसाधनीयमिति। नैवम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनाप्यस्वीकारदण्डेन दूषणेन तत्स्वीकारयि-
ष्यसि तदनङ्गीकारस्यापि सम्भवात्। उक्तञ्च
सौगतैः न हि शास्त्राश्रया वादा भवन्तीति
नापसिद्धान्तोनिग्रहाधिकरणमिति "विज्ञास
नन्तोज्ञातस्य गुणदोषसपश्यतः। विलम्बा
वत केनासौ सिद्धान्तविषयाग्रहा इति।" तत्र
कश्चिदाह शास्त्रमनाश्रित्य कथारम्भानुपपत्तिः
यदा हि क्षणभङ्गसाधनप्रयोक्ता स्वस्थित्सिता
स्थिरवादिना सिद्धसाधनमुद्भाव्य निगृह्यते
तदा किं कुर्य्यात्। प्रथमविप्रतिपत्तिविरोध-
मुद्भावयेदिति चेत् एवं तर्हि विप्रतिपत्त्यनु-
गुणप्रमेयान्तरव्यतिक्रममप्युद्भावयेदेव अन्यथा
विप्रतिपत्तिव्यतिक्रममप्युपेक्षेत न खलु तत्तदनु-
गुणव्यतिक्रमयोर्विरोधापत्तिं प्रति कश्चिद्वि-
शेषः न चैकपुरुषार्थानुगुणाङ्गाङ्गिभावव्यव-
स्थितपदार्थजातव्युत्पादनादन्यच्छास्त्रं नाम त-
स्मात् क्षणिकत्वस्वीकारे तदनुगुणार्थोहादि-
समस्तस्वीकारः तदेकपरिहारे वा समस्त-
तदनुगुणपरिहार इति सर्व्वज्ञोऽपि नान्यथा
प्रसातुं क्षमः। न च समस्ततदनुगुणपदार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातं कस्मादसौ तच्छब्देनाभिधातुमुचितं तदैव शास्त्रप्रणयनप्रसङ्गात् परिषदनपेक्षितत्वाच्च । नच तद्व्यतिक्रमोद्भावनाय समस्ततदनुगुणोहः परस्मरस्य शास्त्रमनाश्रित्य शक्यः । नच तदनुगुणव्यतिक्रमे तदुपेक्षणे वा तत्त्वप्रतिपत्तिजयाविति अकामेनापि तदधिकारप्रवृत्तं शास्त्रमेवाश्रयणीयमिति । तदेतदपेशलं किं तदनुगुणं प्रमेयान्तरं यदनभ्युपगमे विरोधमुद्भावयेदित्युच्यते द्वयमभ्युपगम्यं सम्भवति एकं तदाद्यदनभ्युपगमे कथैव प्रवर्त्तयितुमशक्या यथा प्रमाणादि सर्व्वकथकसिद्धम् इतरत्तु प्रतिदर्शनसिद्धं किञ्चित् यथा क्षणभङ्गेश्वरादि तत्र यदि प्रथममभ्युपगम्यैव कथाप्रवृत्तिरिति तत्स्वीकारे पश्चात्तदनङ्गीकारेऽपसिद्धान्तस्तन्न स्वव्याघातकत्वेन तस्य भवद्भिरेव जातित्वाङ्गीकारात् जातेश्च निरनुयोज्यानुयोगे निवेशात् । नापि द्वितीयः दर्शनभेदनियतं हि क्षणभङ्गादि यत्कथारम्भेऽभ्युपगन्तव्यं तत् किं तदभ्युपगमस्य प्रकृतसाध्यापोहाद्युपायतया उत तन्नान्तरीयकतया । न प्रथमः क्षणभङ्गसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनप्रस्तावे अपोहादि परित्यजतः सौगत-
स्यापसिद्धान्ताभावापत्तेः तदभ्युपगमस्य तद-
ुपायत्वात्। अन्योन्याभ्युपगमोपायत्वे चान्यो-
न्यविचारस्य निष्पत्तिरेव स्यात् विचारे सति
प्रामाणिकत्वप्रतीतौ तदभ्युपगमः तदभ्युपग-
गमे च विचार इति अभ्युपगतोपायत्यागवि-
षय एवायमपसिद्धान्तो नान्यथेति चेन्न यो हि
यदुपायः तमभ्युपगम्य विचारः प्रवर्त्तयितव्य
इत्येव कुतः तस्योपायतया तेन विचारः प्रव-
र्त्तयितव्य इत्येव युक्तं न तु तदभ्युपगमोऽपि
तावता तदुपायः स्यात् तस्य च तदभ्युपगमस्य
च पृथक्कारणमभ्युपगमे प्रमाणस्योपदर्शयितु-
मशक्यत्वात् शक्यत्वेऽपि वा तत्रापि स्वाभ्युप-
गमः किमित्यभ्युपेयो वैयर्थ्यात् उपायत्वादेव
परस्य तथा प्रतीत्युपपत्तेः। यथोच्यते उपेय-
मुपायेन साधयता उपेयवदुपायस्यापि सत्त्व-
मुपगन्तव्यमिति पश्चात्तदनुपगमेऽपसिद्धा-
न्तोपन्यासः सावकाशः असत उपायत्वानुप-
पत्तेः। तर्ह्युपायत्वेनोपन्यसनात्तस्याभ्युपगम-
स्तस्य साक्षादनुक्तोऽप्यसत्त्वेनाभ्युपगम्यमानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोपायत्वस्वीकारानुपपत्त्या कल्पनीयः कल्पितेन तेन पृथक्तस्य तत्स्वानभ्युपगमविरोधादपसिद्धान्तोऽभिधेयः। एवञ्च सति स्वानभ्युपगम एवोपायत्वानुपपत्तिप्रसङ्गो दूषणमुच्यतामुपजीव्यत्वात् तदुपन्यासमन्तरेणाभ्युपगमात्तदीयाभ्युपगमस्य दर्शयितुमशक्यत्वात् इतं तदुपजीविना पश्चात्तनेनापसिद्धान्तेन। अत एव न द्वितीयः तन्त्रान्तरीयकाभ्युपगमोऽपि हि तत्स्वानभ्युपगमे साध्यस्याभावापत्त्यानुमन्तव्यः तथा च सैव दूषणमस्त्वनभ्युपगमे इतं तथा अभ्युपगमं परिकल्पने नाताभ्युपगमविरोधादपसिद्धान्तोपन्यासेनेति।

एवं निग्रहान्तरे खण्डनमूहनीयम्।

इति खण्डनखण्डखाद्ये निग्रहानिरुक्ति
द्वितीयः परिच्छेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः परिच्छेदः ।

अथ यान्यत्रत्वम्बत्र बङ्गलं वाग्व्यवहारा-स्तेषां सर्व्वनाम्नामर्थाः कथं निर्व्वाच्याः । तथा-हीश्वरसद्भावे किं प्रमाणमिति ब्रुवाणः प्रति-वक्तव्यः किं शब्दोऽयमाक्षेपार्थो वा कुत्सितार्थो वा वितर्कार्थो वा प्रश्नार्थो वा स्यात् । तत्र यदि प्रथमः पक्षः तदेश्वरसद्भावे नास्ति प्रमाण मित्युक्तं स्यात् तथा च सति न प्रतिज्ञामात्रा-त्साध्यसिद्धिरिति हेत्वादिकं वाच्यं भवति तच्च भवता नाभ्यधायि तस्मान्न्यूनत्वं दोषः अतएव न द्वितीयः ईश्वरसद्भावे कुत्सितं प्रमा-णमित्यस्यापि प्रतिज्ञामात्रत्वात् । अपि च साध्यासाधकत्वाद्वा तत् कुत्स्यते भवता अन्यथा वा । अन्यथा चेद्दलं तदुद्भावनया साध्यसिद्धेर-प्रत्यूहत्वात् । नापि प्रथमः प्रमाणञ्च साध्या-साधकञ्चेति व्याघातात् गौणोऽयं प्रमाणशब्द-इति चेन्न प्रामाणत्वयोगिनि यद्ययं प्रमाण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दप्रयोगः तदा गौणत्वव्याघातः मुख्यत्वात्। अथ प्रमाणाभासे तदा अलन्तदुर्भावनया ईश्वरसद्भावे यः प्रमाणाभासः स कुत्सितइत्यत्र परस्यापि सम्प्रतिपन्नत्वात् ईश्वरसद्भाव इति च विशेषोपादानं व्यर्थं स्यात् अन्यथापि हि विषये प्रमाणाभासः कुत्सितएव साध्यासाधकत्वात्। नापि तृतीयः तथा सति हि वितर्कस्य पक्षान्तरसापेक्षत्वेन पक्षान्तरमपि वचनीयं भवति ईश्वरसद्भावे किमेतत् प्रमाणमुतान्यदिति तच्च भवता नाभ्यधायि अतोन्यूनत्वं दोषः। नापि चतुर्थः प्रश्नार्थात् खलु किं शब्दात्कस्यचित् पदार्थस्य जिज्ञास्यमानता प्रतीयते सा तेह प्रमाणपदसमभिव्याहारात् प्रमाणविषयिणी प्रतीयते यद्विषयश्च प्रश्नस्तदुत्तरवादिनाभिधेयं तत् अयं प्रश्न ईश्वरसद्भावे प्रमाणसामान्यविषयस्तद्विशेषविषयो वाभिप्रेतः आद्यश्चेदीश्वरसद्भावे प्रमाणमित्येवोत्तरमापद्येत यद्विषयोहि प्रश्नस्तदभिधेयं प्रमाणसामान्यविषयश्च प्रश्नः तच्च प्रमाणशब्देनाभिधीयतएव। अथ द्वितीयः तथापीश्वरसद्भावे प्रमाणमित्येवोत्तर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भापद्येत यथा प्रश्नवाक्ये प्रमाणशब्दोविशेषपर स्तथोत्तरवाक्येऽपि । कोऽसौ विशेषइति चेन्न पूर्ववदुत्तरत्वात् अस्यापि प्रश्नस्य विशेषोविषयः किं शब्दस्य विशेषशब्देन सामानाधिकरण्यात् तथाच सति विशेषएवोत्तरं स्यात् । स्यादेतत् विशेषशब्देन न विशेषमात्रमनिर्द्धारितमत्र विवक्षितं किन्त्वसाधारणी व्यक्तिस्तत्र विशेषशब्दस्य तात्पर्य्यं तस्मात्का साधारणी प्रमाणव्यक्तिरिति प्रश्नार्थः तत्र च तादृश्याः प्रमाणव्यक्तेरभिधानमुत्तरं युक्तं नैवम्विधाः प्रलापा इति नैतदेवं यतोऽत्रापि विशेषइत्येवोत्तरं यथा प्रश्नवाक्यगतस्य विमर्शशब्दस्य ... दृत्तस्वरूपायां प्रमाणव्यक्तौ तात्पर्य्यं तथोत्तरवाक्यस्थितस्यापि,एवञ्च सति यत्र विषये भवदीयस्य प्रश्नवाक्यस्य तात्पर्य्यं तदेवास्माकमुत्तरवाक्येन प्रतिपादितमिति युक्तमुक्तम् । अथ मन्यसे किमिह प्रमाणमिति पृच्छतोऽयमभिप्रायः अत्रार्थेनुमानं प्रमाणमितरद्वेति । अत्राप्यनुमानमित्युत्तरमस्माकं किं तदनुमानमिति चेत् । अयमपि प्रश्नोऽनुमानमात्रविषयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत तद्विशेषविषयइति विकल्पार प्रमाणप्रश्न-वदुत्तरं वाच्यमिति। अत्र च संग्रहश्लोकौ। "यथाविधं यं विषयं नियम्य प्रश्नस्य निर्वृत्ति-परो यथोक्त्या। वाच्यस्तथैवोत्तरवादिनापि तथैव वाचा स तथाविधोऽर्थः। प्रश्नस्य यः स्वा-ङ्गिपयः स वाच्यो वाचा तथा वैष भवेन्निरुक्तः। इदं त्वयाप्याश्रितमेतयैव गिरा स्वष्टच्छाविष-यस्य वक्ता।" प्रश्नार्थाश्च किं शब्दाज्जिज्ञासा-विषयतार्थस्य प्रतीयते जिज्ञासा च ज्ञातु-मिच्छा इच्छा च नाज्ञाते भवत्यतिप्रसङ्गात् तस्मादीश्वरविषयं प्रमाणं ज्ञातुमिच्छता तत्र प[illegible]प्रमाणीभूतं वक्तव्यं तदयथार्थं यथार्थं [illegible] वा स्यात् यथार्थञ्चेत् तर्हि तेनैव ज्ञानेन स्व[illegible]कीयो विषयः प्रमाणमुपस्थाप्यते [illegible] विषये प्रमाणप्रवृत्तिमन्तरेण तदीययथार्थ-त्वस्य वक्तुमशक्यत्वात्। तेनापि प्रमाणेन स्वगोचर ईश्वरसद्भाव उपस्थाप्यत इत्यनायासे-नैव सिद्धोऽस्माकमीश्वरसिद्धिमनोरथः। अथा-यथार्थं तत्राश्मिन्नयथार्थज्ञानविषये यद्यस्मा-भिरयथार्थमेव ज्ञानमुत्पादनीयमिति भवतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृच्छतोवाञ्छितं तदा केयं स्वाधीनेऽर्थे परापेक्षा भवानेवायथार्थज्ञानोत्पादनकुशलोयथैकं तत्र मिथ्याज्ञानमजीजनत्तथा परमप्युत्पादयतु वयं पुनर्यथार्थज्ञानस्योत्पादयितारोमिथ्याज्ञाने सर्व्वथैवाकुशलिनः किमिह नियुज्येमहीति। अथ मदीयस्यायथार्थज्ञानस्य योविषयः स मदीययथार्थज्ञानविषयोभवता क्रियतामिति त्वदीयं वाञ्छितं, तदा व्याघातादीदृश्यर्थे भवतः प्रवृत्तिरेवानुपपन्ना शुक्तिका रजतत्वेन मम यथार्थज्ञानविषयोभवत्वित्येतदर्थं प्रेक्षावान् कथङ्कारं प्रयतेत येन रूपेणायथार्थज्ञानविषयत्वं तेनैव रूपेण यथार्थज्ञानविषयत्वे व्याघातात्। अथ मन्यसे स्वसिद्धान्तमनुसन्धानेन त्वया यथार्थज्ञानं तत्रोत्पादनीयमतस्तदर्थं भवाननुयुज्यत इति। नैवम्, यदीश्वरसद्भावविषयोभवता प्रमाणाभासः प्रमाणतया भ्रान्त्या प्रतीतः तस्य प्रमाणत्वं अस्माभिर्व्युत्पादनीयमिति नास्माकमीदृशः सिद्धान्तः, प्रत्युत ईश्वरसद्भावविषयं यत्प्रमाणं भवता प्रमाणाभासत्वेन भ्रान्त्या प्रतीतमस्ति तत्प्रमाणनीय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति। स्यान्मतम्, ईश्वरसद्भावविषयस्य प्रमा-
णस्य भवता ज्ञापनमात्रं क्रियतामित्यभिमतं
इच्छतामस्माकं ननु प्रमाणेनाप्रमाणेन वेति
विशेषोऽप्यभिमत इति न, ज्ञापनमात्रस्याप्रमाण
ज्ञानमादायाप्युपपत्तेः तव स्वाधीने केयं परा-
पेक्षेत्याद्युक्तमनुसन्धानीयम्। स्यादेतत्, येय-
मीश्वरसद्भावविषया प्रमाणप्रतीतिरस्माकमु-
त्पन्ना सा व्यभिचारिणी सत्या वेति संशयोऽस्मा-
कं तेनैकपक्षनिर्द्धारणाधीनं यदिदं दूष-
णमर्वादि भवता तन्निरवकाशमिति नैतदस्ति।
एवं हि तस्यां प्रतीतौ यथार्थत्वायथार्थत्वसंश-
येन तस्याः प्रतीतेर्गोचरो यत्प्रमाणं तस्यापि
योऽसौ विषयईश्वरसद्भावस्तत्र सर्व्वत्रैव संश-
यानस्य भवतः प्रश्नोऽयं ननु विप्रतिपन्नस्येति+
स्यात्, तथाच स्वीकुरु शिष्यभावं प्रसादय
चिरं चरणशुश्रूषाभिरस्मान् छेत्स्यामस्ते
संशयमिति विप्रतिपन्नाएव वयमाहार्य्यः संश-
योऽस्माकमिति चेत्, तर्ह्यवधृतैककोटयएव वयं
कार्य्यानुरोधात्तु संशयमात्रस्याभह इत्युक्तं स्यात्,
एवं तर्हि तदेव कोऽप्यवधारणं भवता यथार्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयथार्थं वेति विकल्पोक्तानुक्त्या दूषणीयम्। एतेनानध्यवसायेन तदस्माभिः प्रतिपन्नमित्यपि निरस्तं वेदितव्यं, व्यभिचारिविषयमव्यभिचारविषयं वा तदिति विकल्पाभ्यां तस्यापि ग्रस्तत्वात्, परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायात्।

एवमीश्वराभिसन्धयादावपि तत्तत्स्थाने तिष्ठत्सर्वनामार्थान्तरखण्डनमनुद्रष्टव्यम्।

इति खण्डनखण्डखाद्ये सर्वनामार्थनिरुक्ति-स्तृतीयः परिच्छेदः।

चतुर्थः परिच्छेदः।

ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्यमिति चेत् किं पुनर्भावत्वं विधित्वमिति चेन्न, पर्य्यायप्रश्नात्। स्वरूपसत्त्वमिति चेत्, अभावस्यापि तथाभावात्, प्रतिस्वं व्यावृत्तत्वेनाननुगतत्वापत्तेश्च। अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तीतिप्रतीतिविषयत्वमिति चेन्न, अभावो-
घटस्यास्तीति प्रत्ययसम्भवेनाभावस्यापि तथा-
त्वप्रसङ्गात्। नास्तीतिप्रतीतिविषयत्वेऽपि च
घटादेर्भावनिवृत्तेः। अस्तीति चास्त्यर्थो वा
शब्दो वा विवक्षितः नाद्यः तस्यानिरुक्तेः। सत्ता
तदर्थ इति चेन्न, सामान्यादीनां तदभावाद-
भावत्वापत्तेः, स्वरूपसत्त्वञ्च निरस्तम्। नापि
द्वितीयः अभावोऽस्तीतिप्रतीतेर्निरुक्तत्वात्, वर्त्त-
त इत्याद्याकारेण च प्रतीयमानस्याभावत्व-
प्रसङ्गात्। सोऽप्यस्ति पर्य्याय इति चेन्न, उभय-
साधारणैकार्थं निर्व्वचनमन्तरेण पर्य्यायत्वस्य
प्रतिपादयितुमशक्यत्वात्। यत्रैकस्यास्तिपद-
प्रयोगः तत्रैवापरस्य वर्त्तत इति प्रयोगात्।
सामान्येन तावत् पर्य्यायत्वं शक्याधिगममिति
चेन्न, प्रमेयाभिधेयादिशब्दानां तथात्वेऽप्यपर्य्या-
यत्वात्, यत्रेत्यस्य प्रवृत्तिनिमित्तार्थत्वे च तन्नि-
र्व्वचनप्रसङ्गस्तदवस्थः स एवार्थोभावत्वमुच्यतां
किं शब्दोल्लेखगवेषणया। अपरप्रतिषेधात्म-
कत्वं भावत्वमिति चेन्न, व्यवच्छेद्यासम्भवेना-
परपदवैयर्थ्यात्, भावाभावयोः परस्परप्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षेधात्मकतास्वीकाराच्च । तथापि भावो नास्ती-
त्यभावप्रतिपत्तिवदभावो नास्तीति भावस्याप्र-
तीतिरेवेति चेन्न तावतापि लक्षणानिरुक्तेः ।
अपरप्रतिषेधमुखेन प्रतीयमानत्वमेव भाव-
त्वमिति चेन्न चक्षुरादिभिर्भावत्वाग्रहणप्रस-
ङ्गात् । नहि प्रतीयमानत्वं चक्षुरादिग्राह्यम्,
अभावो नास्तीति प्रतीतेर्निर्व्विषयत्वप्रसङ्गाच्च, न
हीयं भावविषया भवत्पक्षे परप्रतिषेधमुखेन
प्रतीयमानत्वात् । नाप्यभावविषयैव, तन्निषे-
धार्थत्वात् । नैवं प्रतीतिरेव स्यादिति चेन्न,
[illegible]तीतेः सम्भवात्, आकाङ्क्षादिमद्भिः
पदैः प्रतिस्वं संसर्गबोधनात्, अत्यन्तासत्यपि
ज्ञानमर्थे शब्दः करोति हि । प्रत्यक्षप्रतीति-
स्तथा विवक्षितत्वाददोष इति चेन्न, सर्व्वस्य
भावस्य प्रत्यक्षत्वानङ्गीकारात्, सेश्वरपक्षे सर्व्वं
प्रत्यक्षमिति चेन्न, तेन तेषामपरप्रतिषेधात्म-
तया ग्रहणे प्रमाणाभावात् । तेषां विधिरूप-
तया तथैव ग्रहणमिति चेन्न, विधिरूपत्वस्या-
नवधारणात् । यदपरप्रतिषेधात्मकतया शब्दे-
नापि बोध्यते सत्तावत् भावरूपमिति चेन्न,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परपद वैयर्थ्यां तत्तद्रागेऽप्यचक्षुषात्वापत्तेः, सुरभि चन्दनमित्यादाविवान्योपनीतभागवत् तत्र वा चाक्षुषत्वं भविष्यतीति चेन्न, तथाविधेनैव विषयेण विशिष्टाया बुद्धेर्विषयविशेषणताग्रहे स्वाश्रयोऽप्यंशतः स्यात्, तेनोपलक्षितायाः स्तथात्वे चाभावविशिष्टभावग्रहार्थस्याभावस्य तथात्वापत्तेः। यद्देवंविधं तद्भावरूपमिति नियमानुपपत्तेः। अस्योपलक्षणत्वे चोपलक्ष्यस्यान्यस्य वाच्यत्वात्, अस्यैव भावार्थत्वे चाभावो नास्तीति कृत्वा प्रतीयमानस्य भावस्य भावत्वाभावप्रसङ्गात्। भिन्नञ्च [illegible] पदार्थ व्यतिरेक प्रसङ्गात्। यच्च किञ्चिद्भावत्वं तत्स्वात्मन्यस्ति नोवा अस्ति चेदात्मनि वृत्तिविरोधः नास्ति चेत्स्वस्यान्यप्रतिसेधमुखेन चाप्रतीयमानस्याभावत्वप्रसङ्ग इति॥

नन्वेवमीश्वरे प्रमाणानुपदर्शनात्तदभाव एवापद्यत इति चेत्, अभावत्वे किमधीयते, निषेधात्मकत्वमिति चेत्, तद्यदि प्रतिक्षेपात्मकत्वं तदा भावेऽप्यस्ति, भावाभावयोर्द्वयोरपि परस्परप्रतिक्षेपात्मकत्वस्वीकारात्। अथाभा:

CC-0. In Public Domain. Digitization by eGangotri

त्वमेव तदा न निवृत्तः पर्य्यनुयोगः। एतेन
निषेधमुखेन प्रतीयमानमिति निरस्तम्।
भावविरोधित्वमिति चेन्न सर्व्वभावविरोधित्वं
तद्विशेषविरोधित्वं वा। नाद्यः असिद्धेः, नहि
घटाभावो भूतलादि विरुणद्धि। न द्वितीयः,
भावानामपि केषाञ्चित्तथाभावात्। अथास-
हानवस्थानं विरोधो विवक्षितः स भावानां
नास्तीति चेन्न गोत्वादौ तस्यापि भावात्।
एकविधावन्यनिषेधः स इति चेन्न, भेदे विरो-
धिभावभेदयोरेव प्रसङ्गात्। एकविधिरेवा-
परनिषेधः स इति चेन्न, निषेधस्याभावार्थत्वे
भावार्थत्वे चासिद्धेः। नास्तीति प्रतीयमानत्व-
मिति चेन्न घटाभावो नास्तीति घटस्य तथा-
प्रतीयमानतया अभावत्वापत्तेः, अस्तीति भावत्व
निरुक्तौ यदुक्तं दूषणं तदापत्तेश्च। प्रतियो-
गिनिरूपणाधीननिरूपणत्वमिति चेन्न प्रति-
योगिनः परार्थत्वेऽतिप्रसङ्गात्, विरोध्यर्थत्वे
वेदनिरुक्तेः, असदर्थत्वे नञर्थस्यासिद्धेः,
अतीतानागतज्ञानादौ विषयादिनातिप्रस-
ङ्गात्। यच्च किञ्चिदभावस्य लक्षणमुच्यते स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावोऽभावो वा स्यात्। नाद्यः भावस्याभावा-
नाश्रितत्वात् विषयिधर्म्मेण च कथमपि तथात्वे
तन्निर्वाच्यं स्यात्। अन्यदेव तद्वदिति चेन्न
तद्वदभावस्याभावत्वे स्ववृत्तिः भावत्वे च व्या-
घातात्। न द्वितीयः तस्यात्मनि वृत्तौ विरो-
धापत्तेः अवृत्तावव्यापकत्वप्रसङ्गादिति। प्रति-
क्षेप्यविशिष्टमेव यत् प्रतिभाति सोऽभाव इति
चेन्न प्रतिक्षेप्यानिरुक्तौ प्रतिक्षेप्यानिरुक्तेः
विशिष्टशब्दार्थस्य निर्वचनीयः स्यात्। तत्र
विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नम-
भिन्नं वा। नाद्यः दण्डपुरुषसम्बन्धमन्तरेण
दण्डिनोऽन्यस्याप्रतीतेः दण्डिनमानयेत्युक्ते तद-
नयनप्रसङ्गाच्च। तत्सम्बन्धेनोपलक्षितत्वात्त-
थेति चेन्न, अतद्भूत उपलक्ष्यत्वेऽतिप्रसङ्गात्।
तद्भूतस्यान्यत्वात् सम्बन्धो हेतुः स च तदधि-
करण एवेति चेन्न सम्बन्धात्तदधिकरणसम्ब-
न्धान्यत्वापत्तेरित्येष न पन्थाः। तत्सम्बन्धिनि
तत्र व्यवहार इति चेन्न, तस्यापि विशिष्टत्वेना-
न्यत्वापत्तौ व्यवहारविषयगतविशेषस्य वक्तुम-
शक्यत्वात्। एवं परम्पराकल्पनायामप्यन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्थाभाव' नतु व्यवहार्य्यगतोविशेषः कश्चित् । द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गोविशेषा भावात् न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिताइति चेत् मिलिताइति किं ते च मेलकं वाभिधीयते उत तेभ्योऽन्यएव कश्चित् आद्ये प्रत्येकं सएव प्रसङ्गः मेलकेप्यधिकः। द्वितीयस्तु प्रतीतिव्यवहारविरोधात्पूर्व्वंनिरस्तः। एकज्ञानारूढ़ो वा अविरलनानाज्ञानारूढ़ोवानेकश्च सम्बन्धश्च विशिष्टपदार्थइति चेन्न घटपटाविति बुद्धावारूढ़ौ घटपटौ सम्बन्धश्च घटपटरूपोविशिष्टः स्यात्। घटत्वपटत्वसम्बन्धानां तद्बुद्धावारूढ़ानामभ्युपगमेनै सम्बन्धस्यापि तद्बुद्ध्यारोहोपगमध्रौव्यात् अन्यथा घटत्वविशिष्टरूपो घटः पटत्वविशिष्टरूपश्च पटः कथमभ्युपेयस्तत्। नच घटपटावित्यपि विशिष्टमेव, स्वतन्त्रयोः घटपटयोः परस्परासम्बन्धयोस्तत्र व्यवहारात्, न पुनर्यथा दण्डो पुरुषस्तथा घटी पटः पटीघटइति वा तत्र व्यवहारः। न चैकज्ञानाध्यारूढ़तैव तयोर्न्द मन्तव्या, यतोघटपटाविति द्वित्वं तयोस्तद्द्वयावगवाहिना कथं विज्ञानेना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वगाह्येतेति प्रत्यभिज्ञाप्रस्तावोक्तान् दोषा ना-
ह्वास्यामः । अतएवाविरलनानाज्ञानारूढ़तापि
विशिष्टता निरवकाशा, अथाप्रकाशमानासम्ब-
न्धोऽनेक एकबुद्ध्यारूढ़स्तथा, नचैवं घटपटौ,
तत्कथमुक्तदोषापत्तिरिति चेन्न, अप्रकाशमा-
नोऽसम्बन्धोययोरित्ययमर्थो विशकलितइति
घटत्वपटत्वव्यक्त्यादिवैशिष्ट्यमपि तत्र सज्ये-
ताविशेषात् । अथ धर्मधर्मिसम्बन्धाः स्वतन्त्रा
एवैकबुद्ध्यारूढास्तथा, नच घटपटौ धर्मधर्मि-
रूपावित्यनतिप्रसङ्गइति चेन्न, धर्मत्वस्यैकस्य
दण्डादिगुणादिसाधारणस्य वक्तव्यत्वापातात्।
सोऽप्येष्टव्य इति चेत्, इष्यतां, परं तस्यापि
वालुकावद्विशकलितस्योपगन्तव्यत्वेन धर्मत्वं
किन्न धर्मः स्यात्। तथाप्रतीत्यभावान्न स्या-
दिति चेन्न, त्वदुक्तैकप्रतीत्यारोहस्याविशेषे
प्रतीतिरपि तथा किन्न स्यात्, मास्तु धर्मत्व-
मनुगतं तत्तद्रूपादिपदार्थस्वरूपमेव, तथा कि-
चित्तं यत्तदेव धर्मिणा सम्बन्धेन च सममेक-
बुद्ध्यारूढ़ं विशिष्टं नान्यदिति चेन्न, तेषां
स्वरूपाणां भेदेन नानाभूतेषु विशिष्टेषु अनु-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गता विशिष्टबुद्धिर्न स्यात् । सम्बन्धमपि तर्हि विलुप्यैवं स्वभावादेव रूपादिकं तथाविधमाधत्ताम् एवमपि किन्न स्यादिति चेत्तर्हि, वराको धर्म्म्यपि विसृज्यतां यथा विना सम्बन्धं विशिष्टबुद्धीरूपादिस्वभावसामर्थ्यात् समर्थिता तथा विना धर्म्मिणमप्यस्त्विति जितं जिनैः स्यादप्येवं यदि शुक्ल इत्येतावन्मात्रमेव प्रतीयेत किन्तु शुक्लः शङ्ख इत्यादिना प्रत्ययेन सामानाधिकरण्यमुल्लिखता धर्म्म्यप्यानीय दीयतइति चेन्न शङ्खत्वजातेरपाश्रयो रूपादेरविरलतादृगवस्थितस्य वा स्वरूपवैलक्षण्यमेव तत्पदेऽभिषिच्यतां येन विनाप्यधिकरणं सामानाधिकरण्यव्यवहारः स्यात् । किञ्च नैतावन्मात्रं बुद्धिमादाय तदर्थगतवैचित्र्यान्तरखण्डने बुद्धिरेव स्वकारणसामर्थ्यात्तथोन्मिता तत्तद्व्यवहारप्रवर्त्तिनी स्वीक्रियतां कृतमर्थवसनेन तस्मात् "प्रत्येतव्यस्य वैचित्र्यं प्रत्ययोल्लेखसाक्षिकं । धियं निवेश्य लुम्पन्तो मज्जं न्त्येव यच्छति ।" यत्तु केनचिदभावस्य स्थाने तन्मात्रधीरभिषिक्ता तत्तस्य परसूचितं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"गुणद्रव्यमभावस्य स्थाने स्थानेऽभिषिक्तवान्। प्रसिद्ध एव लोकेऽस्मिन् वुद्धबन्धुः प्रभाकरः।,, अपि चैकबुद्ध्यारूढोनेकस्य सम्बन्धस्य विशिष्ट-इति पक्षे योप्येवंरूपवैलक्षण्यभाग्विशिष्ट इति कथ्यते सोप्ययं विशिष्टोऽविशिष्टाद्वैलक्षण्येन बोध्यमानो ज्ञानमन्तर्भाव्यैव स्यादिति तत्र तत्रापि ज्ञानान्तरनिवेशने अनवस्था क्वचिद् निवेशे तदभावादविशिष्टत्वे शेषस्यामूलमविशिष्टत्वापातः। तद्योग्यस्तथेति चेन्न, तर्हि योग्यतापि तद्विशेषणं वालुकात्रदसंलग्नातिप्रसञ्जिकैवेत्युक्तमावर्त्तते। एवमेकमिति ज्ञानमित्यारूढमित्यादिद्वारैरपि द्रष्टव्यम्। तथाहि "अविशिष्टाद्विशिष्टस्य वैशिष्ट्यं यदि धीर्विशेत्। तद्बुद्धिधाराविश्रान्तिः स्याद्वा मूलाविशिष्टतेति,, विशिष्टनिरासेन च सर्वाणि लक्षणानि निरस्तानीति मन्तव्यं यथा गुणाश्रयोद्रव्यमित्यादि। इतोऽपि गुणाश्रयोद्रव्यमित्यसङ्गतं, तथाहि कथमेतल्लक्षणमवधारणीयं संख्यारूपगुणवत्तया रूपादेरपि प्रतीतेः। भ्रान्तिरसाविति चेत्, पृथिव्यादौ कथमभ्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिरिति वक्तव्यं, तत्र बाधकाभावादिति चेत्, तुल्यं गुणस्य गुणवत्तायां बाधकमस्माभिरवश्यं वक्तव्यं निर्गुणा गुणाइतिसिद्धान्तादिति चेन्न, रूपादेर्गुणत्वस्यैव निश्चेतुमशक्यत्वात्। सामान्यवान् गुण इत्यादिगुणलक्षणयोगात्तन्निश्चय इति चेन्न, अगुण इति गुणलक्षणांशस्यासिद्धेः संख्यावत्तया प्रतीतेर्व्विद्यमानत्वात्। भ्रान्तिरिति चेन्न, परस्पराश्रयप्रसङ्गात्, संख्यावत्तया प्रतीतेर्भ्रान्तित्वे गुणलक्षणसिद्धिः, तत्सिद्धौ च बाधेन भ्रान्तित्वस्थापनं। नच हेत्वन्तराद्रूपादेर्गुणत्वसिद्धौ बाधकसिद्धिः दृष्टान्तस्यापि संख्यायोगिप्रत्ययाक्रान्तत्वेन प्रसक्तद्रव्यकोटिप्रवेशतया गुणत्वेनासिद्धेः। संख्यायाः संख्यावत्त्वेनानवस्थाप्रसङ्गान्निःसंख्यत्वव्यवस्थितौ दृष्टान्तत्वं सम्भविष्यतीति चेन्न, पृथक्त्वेनापि तस्याः सम्भावितद्रव्यकोटिप्रवेशत्वात्, एवं पृथक्त्वस्यापि संख्यावत्तयेति जातीतरानाश्रयोऽकर्म्मरूपोगुणइत्यपि न, जातिव्यापकत्वात्, जातिमात्राश्रयइत्येवार्थइति चेन्न, अभावाश्रयतया सर्व्वाव्यापनात्। जातिमात्रभावाश्रयइति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न, उपाधीनामपि तदाश्रितत्वात्, नोपाधीनामाश्रयो रूपादिः किन्तु कथमपि सम्बन्धी तावतैवानुमानादिप्रवृत्तिरिति चेन्न, उपाधिसम्बन्धं प्रत्याश्रयत्वस्य वक्तव्यत्वात् अन्यथा यदि किञ्चिद्रूपमत्र नेष्यते तदा सामान्यविशेषानुमानं तत्र न स्यात्। व्यधिकरणयोर्गम्यगमकभावानभ्युपगमात्, तस्माद्यदेतदेव लक्षणं तत्तावन्न जातिरूपं, तदिदं रूपं यदि रूपादौ नास्ति तदानीमस्ति यद्यस्ति तदा नास्तीति विचित्रेण लग लगेत्युक्ते न लगति मा लगेत्युक्ते च लगतीति प्रवह्लिकामनुकरोति। अपि च गुणाश्रय इत्यत्र कश्चाश्रयार्थः, समवायीति चेन्न, गुणत्वादेरपि द्रव्यत्वप्रसङ्गात् गुणावच्छिन्नस्य समवायस्य गुणत्वेऽपि विश्रान्तत्वात्। गुणः समवेतो यत्र स गुणसमवायीति विवक्षितमिति चेन्न, यत्रेत्यस्याधिकरणार्थस्याद्याप्यनिरूपणेन तेनैव तद्व्याकारानुपपत्तेः। इहेति प्रत्ययहेतुराधार इति चेन्न, इह शङ्खे पीतिमेति प्रत्ययाच्छङ्खस्य पीतगुणाधिकरणत्वप्रसङ्गात्। भ्रान्तिरसौ यथार्थस्तु प्रत्ययोऽत्र विवक्षित इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेन्न, तदर्थासत्त्वनिरूपणव्यतिरेकेण तदप्रमाणस्य बोद्धुमशक्यत्वात् न बाधापीहेति प्रत्ययस्यार्थः प्रतीतो यत्प्रतियोगिकमसत्त्वं तत्र निरूप्यते पीतत्वं प्रतियोगि तच्च क्वचित्सिद्धमेवेति चेन्न, तस्य प्रमितत्वादेवासत्त्वानुपपत्तेः। तत्र न तस्य प्रमितत्वमिति चेन्न, तत्रेत्याधारत्वानिरूपणादिति। एतेन समवायिकारणं द्रव्यमित्यपि लक्षणं निरस्तम्। कथं निर्णेतव्यमिदं समवायिकारणमिदं नेति रूपादौ घटादौ च संख्यासमवायिकारणत्वमुक्तेस्तुल्यत्वात्। संख्यैव रूपादौ नास्तीति चेत्, घटादौ कथमस्ति प्रत्ययस्योभयत्रापि तुल्यत्वादित्यलमनुसन्धनीयम्। द्रव्य एव संख्यास्वीकारे तत्सम्बन्धात् गुणेऽपि तद्व्यवहारोपपत्तौ कल्पनालाघवात् गुणे संख्याद्यस्वीकार इति चेत्, विपरीतमेव कुतो न स्यात्, सत्तासामान्याद्यपि गुणादौ किमर्थमङ्गीक्रियते, द्रव्यद्वारैव तत्र व्यवहारोपपत्तेः। ननु सामान्यार्थएव कः, तथाहि अनुवृत्तप्रत्ययकारणं सामान्यमिति न लक्षणं, सामग्र्याः सर्वकार्योत्पत्तेः तथा तदेकदेशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तरैश्च व्यभिचारात्। असाधारणविशेषणा-
दनन्यजातीयप्रयोजकत्वञ्च तदिति चेन्न, स्वसा-
मग्र्यामपि प्रसङ्गतादवस्थ्यात् भेदप्रतिपत्त्यादा-
वपि प्रयोजकत्वाच्च। एतत्प्रतिपत्तिप्रमाणक-
त्वमिति चेन्न, स्वसामग्र्यामप्यस्याः प्रमाणत्वात्।
एतदेक प्रमाणकत्वमिति चेन्न, अर्थ क्रियाभेदा
देरपि तत्प्रमाणत्वात्, एतत्प्रमाकत्वमिति चेन्न,
तद्विशिष्टस्यापि तत्त्वप्रसङ्गात्। तदवच्छिन्नप्र-
मांशप्रमाकत्वमिति चेन्न, तदसिद्धावेवासिद्धेः।
इयं प्रतिपत्तिर्येन विना नोपपद्यते तत्तत्त्वमिति
चेन्न, कारणान्तराणामपि तथात्वादिति। अनु-
वृत्तं सामान्यमित्यपलक्षणम्, किमिदमनुवृत्त-
त्वम्, अनेकाश्रितत्वमिति चेन्न, अवयविना संयो-
गादिभिश्च व्यभिचारात्, नित्यत्वे सतीति चेन्न,
समवायेन व्यभिचारात् अतएव न बहुवृत्ति-
त्वमित्यपि। असम्बन्धत्वे सतीति चेन्न, अणु-
भिर्व्यभिचारादिति। नित्यत्वे सत्यनेकसमवेतं
सामान्यमिति चेन्न, विकल्पासहत्वात्। एत-
ल्लक्षणं नित्यमनित्यं वा स्यात्। नाद्यः स्वात्मनि
वृत्तिविरोधात् विशिष्टप्रविष्टमपि हि नित्यत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यमेव । नापि द्वितीयः सामान्यस्य समवायस्य च नित्यत्वाभावप्रसङ्गात् । आत्मत्वादौ अत्यभावापन्नस्यापि विशिष्टाभावस्यासम्भवात्, तस्य कदाचित्सत्त्वानङ्गीकारे तदनित्यत्वस्य वक्तुमशक्यत्वात् तद्ग्राहिणश्च प्रत्ययस्यैककालिकस्य मिथ्यात्वे अविशेषात् सर्व्वकालिकस्य मिथ्यात्वप्रसङ्गेन सर्व्वथा तदसत्त्वापत्तेः । एकस्य च सत्यत्वे अविशेषात् सर्व्वसत्यतायां कदाचिदपि तदसत्त्वं नाप्नोति । एकदा तत्सम्बन्धेनोपलक्षितस्यान्यदापि विद्यमानत्वात् तथात्वमिति चेन्न, न तादृशोपलक्ष्यासम्भवात् । व्यक्तीनां भेदादित्यनित्यत्वानुपपत्तिरिति, एतेन नित्यत्वमन्यत्रापि प्रतिवचनीयमिति । के चानेन लक्षणेन व्यवच्छिद्यन्ते, विशेषादय इति चेत्, विशेषाएव केऽभिधीयन्ते, तत्र नित्येष्वेव द्रव्येष्वेव वर्त्तन्तएव ये ते विशेषाइत्यलक्षणम्, आत्मत्वादिना व्यभिचारात्, नित्यान्तरे असत्त्वान्न तत्सर्व्वत्र नित्ये वर्त्तते विशेषास्तु नैवं वर्त्तन्तएवेति नियमादिति चेन्न, प्रतिविशेषमव्याप्त्यालक्षणत्वात् । यज्जातीयएवमिति लक्षणार्थइति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेन्न, जातेरनङ्गीकारात्। जातीयेत्यस्मात्पदादुपाधिरेव तथा विवक्षितइति चेन्न, तस्येतरव्यावृत्तस्यावगतौ व्यर्थमिदं तदुपजीविलक्षणं अतएव विजातीयव्यावृत्तिप्रतीतेः इतरव्यावृत्तस्य वानधिगतौ लक्षणस्य दुरवधारणत्वापत्तेः, इतरव्यावृत्ततया तज्जातीयत्वस्याप्रतीतेः। भवतु सएवोपाधिर्लक्षणमिति चेन्न, तस्यानिरुक्तेः, यतोद्रव्यनित्यव्यक्तिषु विश्वव्यावृत्तधीर्योगिनां सविशेषइति चेन्न, स्वरूपधर्म्मव्यक्तिभेदेष्वपि प्रसङ्गात्, अन्यथा कार्य्यद्रव्यगुणादिव्यक्तिषु सा तेषां कुतः स्यात्, तास्विव वैधर्म्यान्तरस्य नित्येष्वपि सम्भवात् विशेषवत्त्वभावेन लक्ष्यासिद्धिरिति। अपि च विशेषादिभ्योविशेषलक्षणादेर्भेदात्कथं तत्र तत्रैव तैर्विशेषादिव्यवहारः क्रियतां नान्यत्र। सम्बन्धोनियामकइति चेन्न, सम्बन्धस्यापि सम्बन्धान्तरेण नियामकत्वेऽनवस्थापातात्, अन्यथात्वनियमात् तदनिरुक्तेश्च, तथाहि कः सम्बन्धशब्दार्थः, समवायादयइति चेत् सत्यं, किन्तु केन निमित्तेनेति हि प्रश्नवाक्यतात्पर्य्यं प्रतिस्वं व्यावृत्तेन संयोगत्वादिनान्येन वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्ये अनुगतव्यवहारानुपपत्तिप्रसङ्गः, अ-
स्तिचासाविन्द्रियार्थसन्निकर्षोत्पन्नत्वादिप्रत्ययः
नित्यं प्राप्तिः समवायइत्यादि। न द्वितीयः
तस्यैकस्यासम्भवात्, नियामकत्वं तदिति चेन्न,
स्वभावस्यापि भवता नियामकत्वाङ्गीकारात्।
तथाविधः सोऽपि सम्बन्धएवेति चेन्न, त्वया
सर्वस्वभावनियन्तृताया अवश्याभ्युपगन्तव्यत्वेन
नियामकानिरुक्तिलभ्यसत्त्वाद्यधिकांशासामर्थ्या-
पत्तेः। नियमस्य च स्वस्यानतिप्रसङ्गे
नियामकत्ववाचोयुक्त्यनुपपत्तेः। अतिप्रसक्तत्वे
च तस्यैव नियामकत्वादतिप्रसक्तेन नियमा-
योगात् भूत्वा नियमकरणे च प्रागनियतत्वा-
पत्तेः, एवमन्येनापि जन्यनियमे अन्यदपि हि
यदि पूर्वं घटादिस्वरूपेणानियतमेव घटादि
करोति तदा पटाद्यपि तथा कुर्यात्। न
घटादित्वे नियन्तृत्वमस्य किन्तु घटादेः काल-
विशेषयोगइति चेन्न, यदि नासौ घटादिकाल-
विशेषयोगितानियतमिष्यते तदा पटादिका-
लविशेषयोगमपि तथा कुर्यात्। तस्मात्
"यदि कुर्यादसत्कालानियतं नियतं परः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्स्यादतिप्रसक्तत्वमन्यथा चानियन्तृतेति, कार्य्यकारणयोः कालभेदान्नियम्यनियामकत्वोपगमे उत्तरोत्तरेण पूर्व्वपूर्वनियमः किन्नस्यादित्यविनियम्यत्वापत्तिः। प्राचोत्तरस्य नियमे प्राचएव न तेन किम्, अनाद्यनन्तयोर्नैवं विनिगन्ता प्रवाहयोरिति अभूत्वा च करणे व्याघातात् सम्बन्धिनस्याधारत्वात् सम्बन्धस्याधेयत्वात्, तस्यैव तदाधारत्वानुपपत्तेः, नहि सुशिक्षितोऽपि नटवटुः स्वं स्कन्धमारुह्य नृत्यति नाप्यन्यस्यासौ सम्बन्धस्तथैव तथानभ्युपगमात्। स्वभावादेवायमीदृशइति हि स्वभाववादः, तत्र परस्य नियमनाभावात्, कथं परः सम्बन्धी सङ्गच्छते। यस्य किञ्चित्सम्बन्धत्वमभिधीयते तत्समवायेऽपि स्वीकार्य्यं नच समवायाधारत्वं द्रव्यादिषट्कस्य सम्भवति। नचोपाधिभावात् स्यात् संयोगसमवायासम्भवात्। स्वभावसम्बन्धस्य च निरस्तत्वात्। नचासावभावोऽपि प्रतिषेध्यप्रतियोगिभावभेदाभिधानप्रसङ्गात्। सप्तपदार्थीपरिसमाप्तञ्च जगत्परस्परविरोधेनातल्लक्षणव्यवस्थापनादिति। यदपि नियम्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नं नियामकं तदपि कथं तदेव नियमयति नान्यदिति तदाधारत्वादिति चेत्, कः पुनराधारार्थः यत्र स्थीयते तदिति चेन्न, यत्रेति सप्तम्यर्थस्यापि विवेचनीयत्वात्। इहेति प्रत्ययविषय इति चेन्न, तत्रेति प्रत्ययविषयस्यानाधारत्वप्रसङ्गात्। किञ्च प्रत्ययविशेषावगमो विषयविशेषावगमात् विषयस्य विशेषावगमश्च प्रत्ययविशेषावगमादिति व्यक्तमन्योन्याश्रयः। समवायीति चेत्, शशे शृङ्गाभावः कुण्डे बदरमित्याद्यव्याप्तेः। गौणस्तत्र प्रयोग इति चेत्, नैतावन्मात्रं प्रत्ययश्च भ्रान्त इत्यपि वक्तव्यमवशिष्यते भवतः। ओमिति चेत् अथ विपरीतमेव कुतो न स्यात् शशे विषाणं नास्तीति च यदि विशेषणाभावाधिकरणप्रतीतिर्भ्रान्ता शृङ्गस्य तर्हि शशोऽधिकरणं स्यात्, भावाभावयोरन्यतरनिषेधस्यान्यतरविधिपर्य्यवसायित्वेनाभ्युपगमात्। पतनप्रतिबन्धकमधिकरणमिति चेन्न, अवयविनं गुणादिकञ्च प्रति तदभावात्। अव्यवहिताधःस्थितमिति चेन्न, गुणाद्यपेक्षया गुणवदादेरधःस्थितत्वे प्रमाणाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वात्। अविशेषेण वाच्यविगुणादीनाम् अव-
यवाधारत्वप्रसङ्गात्। ऊर्द्ध्वस्थितस्य संयोगिनः
संयोगं प्रति च तदभावात्, स्थलास्थितद्रव्यादौ
बहुलं व्यभिचारात्। यद्येकोऽधिकरणार्थो
नोपपद्यते, तर्ह्यनुगमस्यार्थवच्छिन्न एवास्त्विति
चेत्, आश्रयासिद्ध्यादेर्भेदप्रसङ्गात्। सोऽपि
स्वीकार्य्य इति चेन्न, असिद्ध्यादिविध्यपरिगण-
नस्य व्यवहारतोऽन्यथाभावप्रसङ्गात्। क्वचिदा-
श्रयस्य समवायित्वात्, क्वचिच्चाभावं समवायञ्च
हेतुं प्रति तदसम्भवात्। एकस्य च तेषामुप-
संग्राहकस्य वक्तुमशक्यत्वात्, बहव एवाश्रय-
शब्दार्थाः आश्रयासिद्धादयोऽपि पृथक् पृथगेव
बहवः। असिद्धभेदपरिगणनग्रन्थोऽप्यन्यथा-
कारं वोढव्योबाधदर्शनादिति चेन्न, तथापी-
कुण्डे बदरमित्यत्र क आधारार्थ इति वक्तव्य-
न तावत्पतनप्रतिबन्धकत्वं, सहैव कुण्डेन पतति
बदरे तदसम्भवात्। नापि संयोगित्वं, वैपरी-
त्यस्यापि प्रसङ्गात्, संयोगित्वे सत्यधःस्थितत्व-
तन्नाधिकरणार्थ इति चेन्न, तस्मिन् सत्यप्यन्य-
चरणतलमिलितभल्लीपटलादावधिकरणप्रती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वनुत्पत्त्या प्रत्युत चरणतले भूतलीत्येव प्रतीत्या आधारत्वप्रतीतौ प्रकृतेऽपि व्यभिचारित्वेन तथा स्वीकारानुपपत्तेः, न सार्वत्रिकोऽयमाधारार्थः किन्तु क्वाचित्को, नानारूपाधारत्ववादिपक्ष इति चेन्न, भवत्वन्यत्रान्यस्याधारार्थत्वम् अस्य त्वाधारार्थत्वं नोपपद्यते अनाधारप्रतीतिविषयेऽपि गतत्वादित्युक्तेः । आधेयापेक्षयामहत्परिमाणत्वे सतीति चेन्न, करतलस्थिततूलराश्यादौ तदसम्भवात्, अन्यस्य च वक्तुं तत्राधारार्थस्याशक्यत्वात्, अधःशब्दार्थस्य च वक्तुमशक्यत्वात्, पतनाभिमुखदिक्स्थितत्वमिति चेन्न, पतनार्थस्य गमनाधिकस्याधःशब्दव्यतिरेकेण निर्वक्तुमशक्यत्वात् । अतएवाधः शब्दार्थस्य दुर्वचत्वमभिगम्याद्वैतवादिना गुरुणा शिष्याय खण्डनमुपाचक्षाणेन भगवता पराशरेणाभिहितम् । "अधःशब्दनिगद्यं किं किञ्चोर्द्धमभिधीयते ।", पृथ्व्यभिमुखी दिगधःशब्दार्थ इति चेन्न, ऊर्द्धशब्दार्थस्यापि पृथिव्यभिमुखत्वसम्भवात् । यदपेक्षया पृथिव्यभिमुखी या दिक् तदपेक्षया साध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति चेन्न यदपेक्षयेति किं यमवधीकृत्येति विवक्षितम् उत यदीयाभिमुख्यव्यवस्थितेति। आद्ये पृथिव्यूर्द्ध्वस्थितं पदार्थमवधीकृत्ययोर्द्ध्वा दिगिति भवद्भिर्व्यवह्रियते सापि पृथिव्यभिमुखी भवतीति साप्यधः स्यात्। अतएव न द्वितीयोऽपि यस्यां दिशि क्रियया पृथ्वी सन्निहिता भवति सा दिगध इति चेन्न कूपादौ मध्यगतस्य तिर्य्यग्दोलायमानस्य क्रिया पतनं स्यात् तद्गत्याक्रान्ता च तिर्य्यग्दिगधः स्यात् पृथिवीमवधीकृत्य यस्मान्यं पदार्थम् अवधीकृत्य यो मध्य इति देशो व्यवह्रियते स पृथिव्यतिरिक्ततदवध्यपेक्षया अध इति चेन्न पृथिव्यामेव तद्व्यवहारापत्तेः। पृथिवीं पदार्थान्तरञ्चापेक्ष्य मध्यत्वस्य विवक्षितस्याधः शब्दार्थप्रदर्शनमन्तरेण निर्व्वक्तुमशक्यत्वात्। पृथिव्यपेक्षयोर्द्ध्वं परापेक्षया चाधः तत्र तयोर्मध्यमित्येवं निरुच्यते मध्यत्वम् अन्यथा तिर्य्यगपि प्रसङ्गात्। तद्यथा पृथिव्यपेक्षया पूर्वमपरापेक्षया च पश्चिमं तयोर्म्मध्यमुच्यते प्रतीपदिगवस्थितयोः परस्परापेक्षया प्रतीपदिक्

CC-0. In Public Domain. Digitization by eGangotri

सङ्केते मध्यव्यवहारात्। अथान्यः कश्चिदाधारार्थोऽस्तु प्रतीतिसिद्धत्वात्प्रतीतेश्चैवम् अनन्योपपाद्यत्वात्। नैवम्। तदनित्यं वा स्यात् नित्यं वा। नाद्यः तदभावे आधारप्रतीत्यभावप्रसङ्गात् गोत्वादिनित्यत्वन्यायसाम्येऽपि अस्यानित्यत्वे तेषामप्यनित्यत्वापाताच्च। नापि द्वितीयः तादृशमप्यनुगतमननुगतं वा स्यात् द्वितीयेऽनुगताधारप्रतीत्यसम्भवः सङ्केतग्रहाशक्यत्वञ्च, प्रथमे सामान्यवदाश्रयापरित्यागि वा स्यात् तत्त्यागि वा। आद्ये यदेव तदाधारतया प्रतीतं तत्तदाधेयं न स्यात्, द्वितीयेऽपि च यदि नियामकमन्तरेण तत्स्वाश्रयं भजति च त्यजति च तदा नियमानुपपत्त्या सर्व्वदा तद्भजनत्यजनोचितप्रत्ययव्यवहारप्रसङ्गः। अथ तस्याश्रयभजनत्यजनयोर्नियामकोऽस्ति, तर्हि स वक्तव्यः, सोऽपि कल्पयिष्यते अन्यथाधार प्रतीत्यनुपपत्तिरिति चेन्न, तत्परिकल्पने यदेव भजने नियामकं स एवाधारार्थोऽस्तु कृतं पूर्वपरिकल्पितेनेति। अस्त्येवमेवेति चेन्न, तस्यापि स्वाश्रयभजनत्यजननियामकस्यावश्य वाच्यत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यापि चैवं वैयर्थ्यमित्यधिकापरिकल्पने नियमानुपपत्तिः। अधिकपरिकल्पने च पूर्वपूर्ववैयर्थ्यप्रसङ्ग इति गुरुतरं व्यसनमापद्येत परस्परेण परस्परस्य नियामकत्वमिति चेत्, अन्योन्याश्रयिणावर्थावपि परस्पराकर्षकभावव्यवस्थया सुस्थीकृत्य ततोद्वाभ्यामस्त्वोत्तरं, जात्यादयोऽपि तथैवमनुपपन्ना इति चेन्नोच्चैर्वक्तव्यं, यदि कोऽपि शृणोति तदा महदनिष्टमस्माकं प्रकाशीकृतं स्यात्। किञ्च यत्तदाधारत्वं तत् साधारमनाधारं वा, अन्त्ये न स्वविशिष्टप्रत्ययं कुर्यात् विशेषाभावात्। आद्ये तदाधारत्वं वाच्यं स्वरूपमेव तादृशं, तस्य येन स्वयं सत्तात्मनि सत्ताप्रत्ययकारिणी सत्तान्तरमन्तरेण यथा तथेदमपि विनैवाधारान्तरम् आधारप्रत्ययकारीति चेन्न, भ्रान्तित्वप्रसङ्गात्। यथा विना रजतत्वं तत्प्रत्ययो भ्रान्तिस्तथैव स्यात्, उपपाद्यश्चायमर्थो भेदखण्डनप्रस्ताव इत्युपरम्यते। विनाप्याधाराधेयभावं स्वभावसम्बन्धेन नियामकत्वं भविष्यति। यथा विषयविषयिभावेनार्थज्ञानयोरिति चेन्न, स्वभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.

सम्बन्धस्य निरस्तत्वात् । यमुदाहरसि च विषयविषयिभावं सोऽपि वक्तुं न शक्यते । तथा हि कः पुनर्ज्ञानादेर्घटादिना विषयविषयिभावः प्रकाशस्य सतस्तदीयताभावरूपः स्वभावविशेष इति चेन्न, इच्छादिविषयाव्यापनात् । विषयिण इति चेन्न, तत्त्वस्यैव निरूप्यमानत्वात् । किञ्च स्वभावः स्वधर्म्मो वा स्वात्मा वा तस्य विवक्षितः । आद्ये ज्ञानत्वादिकं वा साधारणमसौ तत्तद्घटज्ञाननियतो वा कश्चित् । आद्ये साधारण्यान्न विशेषतस्तदीयताभावरूपत्वसम्भवः । द्वितीये तु प्रतिविषयं व्यावृत्तज्ञानधर्म्मस्वीकारे वचनभङ्गिभेदेन साकारवादस्वीकारः । किञ्च नासौ धर्म्म उपाधेयान्तराधीनो विषयभूतघटपटादिव्यतिरिक्तोपाधिप्रतीत्यपेक्षाप्रसङ्गात् । नच घटादिरेव, तथा असम्बन्धात् तथापि स तथात्वे चातिप्रसङ्गात् । नापि जातिरूपः, क्वचिद्घटमात्रपटमात्रज्ञानगततया पृथग्व्यवस्थितौ सत्यां घटपटविषयैकज्ञाने सहावस्थित्या जातिसङ्करप्रसङ्गात् । प्रतिविषयं ज्ञानभेदनियमे विशिष्टज्ञानानुप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्तेः, एवम्भूतचितज्ञात्यभ्युपगमे प्रत्येकोचित-व्यवहारस्याभावप्रसङ्गात्। अथ जातीसङ्करेऽपीष्यते तथापि स एव विशेषो घटज्ञानत्वादस्त्विति विषयासिद्धिः। अथ विषयेणापि सम्बन्धप्रतिभासनात् सोऽपीष्यते, न तस्यैव सम्बन्धस्य विचार्य्यमाणत्वात्, स एवासावितिचेन्न, तदैक्यात् ज्ञानार्थसाधारणविषयप्रतीत्यापत्तेः। संयोगप्रतिपत्तिवत् विषयित्वं तत् अर्थे तु विषयत्वमन्यदिति चेन्न, सैव हि ज्ञातता स्यात् सा च निराकरिष्यते। द्वितीये च स्वात्मा घटपटज्ञानव्यक्तीनामिव घटज्ञानव्यक्तीनां व्यावृत्त इति तत्तद्विषयविषयितागोचरानुगत-बुद्धिव्यवहारभङ्गप्रसङ्गः। किञ्च तदीयता-ज्ञानस्य स्वभाव इति वचनं विचारमर्हति। तदिति तावद्विषयपरामर्शः सम्बन्धितावत् स प्रत्ययस्यार्थः तदेतदन्योन्यविशिष्टम् उभयं ज्ञानस्य स्वभाव इति ब्रुवाणेन विषयो विज्ञानस्य स्वभाव इत्युक्तं भवतीति साधु विज्ञानवादि-निराकरणप्रकरणोपसंहरणमकारि। सम्बन्ध-मात्रं ज्ञानस्य स्वभावो न तु विषयइत्याशय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति चेन्न, विशेषानुपादाने सम्बन्धमात्रमिदं सर्व्वस्यैव स्यात् यतो न तावन्न कस्यचित्सम्बन्धस्वरूपतात्यागप्रसङ्गात् नापि नियतस्य तादात्म्यापत्तेरुक्तत्वात् नियमकासम्भवाच्च । कारणं नियामकमिति चेत् तेन नियामकेन किं भवति तदीयत्वं तस्य सम्बन्धस्येति चेत्, तदेव तदीयत्वं ज्ञानस्वभावभूतसम्बन्धस्वरूपप्रविष्टमुत वहिर्भूतं धर्मान्तरम् । यदि प्रथमः तच्छब्दार्थोऽपि तर्हि स्वरूपप्रविष्ट इति ज्ञानविषययोः स एवाभेदप्रसङ्गः । द्वितीये तु तस्य धर्मान्तरस्य विषयेणाभेदः, तच्छब्दार्थस्य विषयस्य विशेषणस्य तदीयशब्दार्थे विशिष्टरूपे प्रविष्टस्य स्वीकृतधर्मान्तरस्वभावतया निरुक्तत्वात् । अस्तु असौ धर्मो विषयाभिन्न इति चेत् तथापि किमसौ स्वीकृतेन स्वभावसम्बन्धेन सम्बन्धो न वा, न चेत् तर्हि ज्ञानं न कस्यचित्सम्बन्धि स्यात्, सम्बन्धश्चेत् किं सम्बन्धान्तरेण आहो स्वभावसम्बन्धेनैवासौ ज्ञानात्मकसम्बन्धसम्बन्धीयः । आद्ये तत्राप्येवं प्रसङ्गे यस्याभयेन स्वभावसम्बन्धः स्वीकृतः सा तदवस्थैवानवस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वितीयश्चेत् ज्ञानात्मकसम्बन्धसम्बन्धीय इत्यत्र विशिष्टरूपे ज्ञानरूपमपि विशेषणं प्रविष्टमिति पूर्वोक्तन्यायेनाधुनोक्तन्यायेन च ज्ञानस्यैकस्यैव द्वयमपि स्वात्मेति वाग्भङ्गिभेदमात्रेण ज्ञानगोचरयोरभेदस्वीकार इति। एतेनान्यत्रापि स्वभावसम्बन्धः प्रत्याख्यातव्यः। ज्ञानीयफलाधारत्वं विषयत्वं, तद्वत्त्वञ्च विषयित्वमित्यपि दुष्टम्। तथा हि ज्ञानीयं फलं ज्ञातता वा व्यवहारो वा स्यात्। आद्ये अतीतानागतधीभ्रमाद्यर्थाव्याप्तिः न च तत्रैव फलजनने किं नियामकमिति प्रयोजकमनुगतं शक्यनिर्वचनं तथात्वे वा तदेव विषयत्वमस्तु, व्यवहारश्च कराकर्षणादि यदि स न सार्व्वत्रिकः नान्तरीयकश्चान्यत्रापीत्यतिव्यापकः यदीच्छादिस्तदाधारत्वमात्मन इति घटाद्यव्याप्तिस्तद्विषयत्वञ्च तद्विषयत्वमेवापेक्षते। यश्चोपेक्षां नाम व्यवहारं नानुमन्यते तन्मते कथं नोपेक्षाप्रेक्षामुपेक्षते हानादिव्यवहारज्ञानानामेव च कथं न निर्व्विषयत्वं प्रसज्यते। अथ सर्व्वत्र हानादिव्यवहारोपगमः, तदा व्यवहारज्ञानयो-

CC-0. In Public Domain. Digitization by eGangotri

रनुपरम एव स्यात्। एतेन तत्सम्बन्धित्वं तदु-
च्यते यत्प्रति तद्व्यवहारानुकूलस्वभावं यद्वि
ज्ञानं तत्तस्य विषयः तद्वत्त्वं विषयित्वमिति,
तदपि प्रागुक्तयुक्तिं नातिवर्त्तते। अथोच्यते य
एवार्थो यस्यां संविदि भासते तद्वेद्यः स पृथक्
नेति वेद्यावेद्यस्य लक्षणमिति, तदपि न विज्ञः
यस्यां संविदीति किं सम्विदधिकरणम्, अथ
विषयः अथ सम्बन्धिमात्रम्। नाद्यः घटादे-
स्तदधिकरणत्वानुपगमेनाव्यापनात्, यथा तथा
निर्व्वचनीयज्ञानत्वाद्यतिव्याप्तेः। द्वितीयस्त्वा-
द्याप्यनिरूपितः कथं निरूपकः स्यात्, वैपरी-
त्यापाताच्च। तृतीयस्त्वतिव्यापकः, कारणादेरपि
तत्सम्बन्धित्वात् ज्ञानान्तरेणावभासमानत्वात्।
तथैव संविदा भासमानत्वमिति चेन्न, भास-
मानत्वस्यैव निरूप्यमाणत्वात्। तन्निरूपत्वात्
तद्वत्त्वस्य यस्यां संविदि प्रकाशमानायां यत्
प्रकाशत एवेति चेन्न, प्रकाशमानतया एव
निरूप्यमाणत्वात्। सामान्यतोविषयत्वे सिद्धे
विशेषतो विषयाभिधानमिति चेन्न, सर्व्वथा
विशेषानुपपत्तिद्वारा सामान्यानुपपत्तौ तद्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयप्रमात्वस्यापि सन्दिग्धत्वात्। ज्ञानाकारार्पणक्षमो हेतुरेव विषय इति चेन्न, आकार एव केनार्पित इति विनिगन्तुमशक्यत्वात्। नह्याकारस्ततो ज्ञानस्वरूपादन्यः, तत्र तथोत्पन्नानि कारणानि प्रत्येकमेव समर्थानीति कथं तेषु विशेषं विनिगमयिष्यसि, यद्यपि सकलसमर्थहेत्वनुविधानमस्ति तथापि स्फुटत्वात् घटस्यानुविधानमिति तदेव तदाकारप्रयोजकमिष्यत इति चेन्न, समस्तकार्पणान्तरानुविधानवतो घटानुविधानस्य प्रामाणिकत्वाविशेषेण किं स्फुटत्वास्फुटत्वाभ्यां स्यात्। स्फुटानुविधानमात्राद्यैव विषयनिवृत्तिं कुर्म इति चेन्न, सर्वहेत्वनुविधानस्य न्यायतः स्फुटत्वात्, दृश्यमानमनुविधानं यस्येति चेन्न, दत्तोत्तरत्वात्, दृश्यमानतैव च विषयता अनिर्वचनान्न शक्योपदर्शना, ज्ञानकर्मत्वमित्यपि न, ज्ञानेन कर्मणः सम्बन्धस्य निर्वक्तव्यत्वात्, तन्निरुक्तिभङ्गस्त्वेश्वराभिसन्धौ ज्ञाततावादे द्रष्टव्यः, विना सम्बन्धान्तरं यद्विशेषणज्ञानं सविषयः तेन विना सम्बन्धान्तरं ज्ञानविशेष्यं विषयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेष्यञ्चेदं यद्विशिष्टनामकं तत्त्वान्तरं यद्गतं धर्म्मं गृह्णातीति। अथोच्यते यद्गतधर्म्मं गृह्णातीत्येतावन्मात्रमेव विवक्षितं गृह्णात्येवेति वा। आद्ये दण्डस्यापि विशेष्यत्वापातः तद्गतस्यापि सत्त्वादेर्द्धर्म्मस्य ग्रहणात्। नापरः सम्भवति हि व्यभिचारिणो धूमस्याविच्छिन्नमूलत्वादिविशेषणं तद्विशिष्टञ्च तत्त्वान्तरं, नच विशेष्यस्य धर्म्मं व्यभिचारितां गृह्णाति। अथोर्द्ध्वविरतगतिविशिष्टस्याविच्छिन्न मूलता विशेषणं नच तथाभूतस्य व्यभिचारिता धर्म्म इत्युच्यते। नैवम्। प्रथमविशिष्टः किं व्यभिचारी न वा, आद्ये स एव दोषः द्वितीये विशेषणान्तरान्तर्भाववैयर्थ्यं प्रथमविशिष्ट एव च तद्दोषावसरः। अथ यद्धर्म्मविशिष्टस्य तद्विशेषणं तद्धर्म्मं गृह्णाति न सर्व्वं नच व्यभिचारिताविशिष्टस्य तानि विशेषणानीति चेन्न, तत् किं धूममात्रं न व्यभिचारि, ततश्च व्यभिचारिताविशिष्टस्यैव तस्य तानि। तथा भवतु व्यभिचारिताविशिष्टस्य तद्विशेषणं परं सा न विशेष्यकोटिरिति चेन्न, अद्यापि विशेष्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानात्। किञ्च तद्विशेषणमिति तत्सम्बन्धि-मात्रं वा विशेषणतया वा सम्बन्धि। आद्येऽति-प्रसङ्गः द्वितीये तु तथैवान्योन्याश्रयादि किञ्च विशेष्यत्वलक्षणो यस्तद्गतोधर्म्मस्तं गृह्णाति न वा आद्ये अतिव्याप्तिः द्वितीये गृह्णात्येवेति नियमोऽसिद्धः। किञ्च सत्समवायी ज्ञानस्येत्यत्र भवति सत्समवायस्य ज्ञानं विशेषणं सम्बन्ध-मन्तरेणैव नच विषयः। नच गुणगुण्यादि-विशेषणविशेष्यभावे यः सम्बन्धान्तरमन्तरे-णेत्युक्त्वा व्यवच्छेद्यतां नीतः स एवायं समवाय इति कथं न व्यवच्छेद्यतां प्रतिपत्स्यते यतोऽत्र तस्यैव विशेषणविशेष्यभावादन्तरत्वासिद्धि-रिति तस्मात् सम्बन्धमन्तरेण ज्ञानं विशेषणं यस्येत्युक्तं तत्र ज्ञानं सम्बन्धमनपेक्ष्य स्वभावत एव यथार्थस्य विशेषणं तथा समवायस्यापीति न कश्चिद्विशेष इति साधूक्तं सत्समवायो ज्ञान-स्येत्यत्र ज्ञानविषयता समवायस्य स्यादिति। नच तत्र स एव समवायः सम्बन्धः अत्रापि विशेषणविशेष्यस्यैव सम्बन्धत्वात्। नासौ सम्ब-न्धिनोऽन्यस्तादृशस्य व्यवच्छेद्य इति चेन्न, सम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावेऽपि तुल्यत्वात् संयोगसमवायौ व्यवच्छिद्येते इति चेन्न, तथापि ज्ञानाभावेऽपि प्रसङ्गात् । न तत्र ज्ञानं विशेषणं किन्तूपलक्षणमिति चेन्न, अतीतानागतयोरविषयत्वापत्तेः । भावे चिन्तेयमिति चेन्न, अभावस्य विषयत्वापातात् ज्ञानादन्यज्ज्ञानीयञ्च यत्कारणादि तत्रापि प्रसङ्गादिति किं विस्तरेण ।

न च ज्ञानकारतायां गोचरस्य नास्त्येव ज्ञानगोचरयोर्भेदः, प्रतीतिविरोधात् भेदमनिच्छता च स प्रतिषेद्धुमप्यनर्हइति । वक्तव्यस्तर्हि कोऽसौ भेदोनाम । स हि स्वरूपं वा स्यात् इतरेतराभावो वा धर्मान्तरं वा । नाद्यः भिन्ने अभिन्नभ्रमानुपपत्तिप्रसङ्गात् भ्रान्त्यापि धर्मिस्वरूपावगाहनात् । अन्यथा कस्याभेदं सा भ्रान्तिरुल्लिखेत् । ननु निःसम्बन्धित्वेन व्यवस्थिते तरुदारुप्रभृतौ नानाधारोऽन्य एवावयव्यारोप्यते येषु त्वारोप्यते ते भेदेनैव भान्ति किन्त्वनारब्धावयविषु तेष्वारब्धावयवितया विभ्रम्यते । मैवम् तेषामनुदाहरणीयत्वात् । अतस्मिन् स एवायमिति प्रत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नाभासाद्यर्थानां दृष्टान्तत्वेनेष्टत्वात् तत्रापि धर्मान्तरारोपाभ्युपगमे तादात्म्याभावस्य संसर्गाभावप्रवेशापत्तेः। न चैवमप्येष्टव्यमेव तथापि स्वरूपभेदग्रहे तत्राभेदस्य धर्मस्यापृथक्क्यारोपत्वात्। नापि द्वितीयः प्रतीतावन्योन्याश्रयप्रसङ्गात्। प्रतियोगिरूपत्वेनाप्रतीतावधिकरणप्रतीतिः अधिकरणस्वभावत्वेनास्मृतौ प्रतियोगिस्मृतिश्च तद्ग्रहणकारणमतः इतरेतराश्रय इति चेत्, नैवम्, एवं हि सति कुम्भः पटो न भवतीत्यत्र यथैव तस्याभावस्य प्रतियोगितया पटोनिषिध्यते तथा कुम्भोऽपीति सोऽपि कुम्भात्मतया निषिद्धः प्रसज्यते वस्तुतोऽन्योन्याभावस्य कुम्भप्रतियोगित्वेऽपि कुम्भस्यापटत्वनिरूपणकाले कुम्भस्य प्रतियोगिता नापेक्ष्यते किन्त्वाश्रयतैवेति कुम्भाप्रतिक्षेपः। पटस्य तु प्रतियोगितैवापेक्ष्यते नत्वाश्रयतेति कुम्भवत् पटस्यापि न संग्रहापत्तिः। यद्यप्यन्योन्याभावस्योभयप्रतियोगिता तथाप्यन्या कुम्भाश्रयता अन्या पटाश्रयता अन्या कुम्भप्रतियोगिता अन्या पट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगिता तेनान्योन्याभावस्योभयप्रतियोगिकत्वे चोभयाश्रितत्वे च नोभयोरपि संग्रहप्रतिक्षेपविरोधापत्तिः। नापि च प्रतियोगित्वस्यानुयोगिनोभेदोपजीवनेऽन्योन्याश्रयानुपजीवने च स्वस्मादपि भेदग्रहापत्तिः प्रसज्येत। यतः स्वरूपमात्रस्य प्रतियोगिता अनुभूयमानस्य चाश्रयतेति एतावन्मात्र एवोक्ते स्वस्मादपि भेदग्रहानापत्तिः। न चैवं स एवायमित्यत्रापि भेदग्रहप्रसङ्गः वास्तवतत्त्वासत्त्वाभ्यां विशेषादिति। नैवं तथा हि किमधिकरण प्रतीतिरधिकरणतया प्रतीतिः उत वस्तुगत्या अधिकरणस्य स्वरूपेण सा विवक्षिता। आद्ये किं मायाधिकरणतया घटादेः प्रतीतिस्तस्य कारणं न तावन्योन्याभावाधिकरणतया दण्डाप्रतीतौ दण्डाधिकरणताया इव तदप्रतीतौ तदधिकरणतायाः प्रत्येतुं पूर्व्वमशक्यत्वात् विशिष्टप्रतीत्या विशेषणस्यावश्योल्लेख्यत्वात् विशिष्टस्य च विशेषणमूर्त्तित्वात्। नापि यस्य कस्यचिदधिकरणतया प्रतीतिस्तत् कारणं यत्र भिन्ने अभेदभ्रमस्तत्र धर्म्मिणः सत्याद्याधारतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतावपि तदनुत्पत्तेः । न तन्मात्रात्तदुत्पत्तिः अपि तु प्रतियोगिस्मृति सहितात् सा च तदा नासीति तदनुत्पत्तिरिति चेन्न, प्रतियोगिस्मृतिरपि किं प्रतियोगितया स्मृतिः, उत वस्तुगत्या प्रतियोगिनः स्वरूपेणेति विकल्पग्रस्त्वात्। आद्ये किमन्योन्याभावप्रतियोगितया यस्य कस्यचित् प्रतियोगितया वा । नाद्यः अन्योन्याभावाप्रतीतौ तदनुपपत्तेः पूर्व्ववत् । नापि द्वितीयः, तस्य वस्तुगत्या भिन्नस्याभिन्नतया भ्रमविषयी कृतस्य स्वदेशेतरदेशादावसत्त्वेन प्रतीयमानत्वे स्वाभावप्रतियोगितया प्रतीतावन्योन्याभावप्रतीत्यनुत्पत्तेः । प्रतियोग्यनुभूतिः सा न स्मृतिरिति चेन्न, स्मृतित्वस्याप्रयोजकत्वात् अन्यथानुभूयमानयोरन्योन्याभावाप्रतीति प्रसङ्गात् । अतान्तरा स्मृतिकल्पनया नान्योन्यात्मानौ भिन्नावभिन्नावित्यनुभवबाधितया प्रयोजकत्वेऽपि वा स्मृतित्वस्य योऽसौ तत्र नासीत् सोऽयमिति स्मर्य्यमाणाभावप्रतियोगिकत्वेऽपि वस्तुगत्या भिन्नस्याभिन्नतया भ्रमेणोल्लिख्यमानस्यान्योन्याभावप्रतीत्यनुदयात् । दोषाभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योऽपि हेतुः स अभोदाहरणे नास्तीति चेन्न,
पूर्वदृष्टे स्मृतिमता ततो वस्तुगत्यान्यस्यैवा-
नन्तरदृष्टस्य पूर्वदृष्टत्वात् भिन्नमभिन्नं वेति
अनिरूपितस्यापि सम्भवेन तत्रेतरेतराभाव-
बुद्ध्यापत्तेः। बुध्यत एवेति चेन्न, पश्चात्तत्र संश-
यस्य दर्शनात् विशेषधीरपि तत्र हेतुरिति
चेन्न, विशेषत्वस्यान्योन्याभावनिरूपणं विना
दुर्निरूपत्वात्। एतेन वस्तुगत्या प्रतियोगिनः
स्वरूपेण स्मृतिः सहकारिणीत्यपि व्युदस्तम्।
वस्तुगत्याधिकरणस्य स्वरूपेण प्रतीतिरित्यपि न
भिन्नस्याभिन्नतया प्रतीयमानस्यान्योन्याभाव-
वत्तया ग्रहणप्रसङ्गात्। नापि तृतीयः अभा-
वस्य निर्द्धर्म्मकतापत्तेः तस्य बिम्बाभिन्नत्वप्रसक्तौ
बिम्बस्यात्यभावरूपत्वेन निर्द्धर्म्मकतया धर्म्म-
लक्षणान्योन्याभावविरहिणा ऐकरूप्यापत्तेः अ-
भावे धर्म्माभावात्। स्वरूपमेव भेद इति चेत्,
योऽसौ भेदस्तस्य स्वात्मा स किं कस्मादपि भेदः,
उत निष्प्रतियोगिक एव, न तावन्निष्प्रतियो-
गिक एव प्रमाणाभावेनासत्त्वप्रसङ्गात्। यो-
ऽसौ भेदव्यवहारोऽस्ति स कस्मादपि न नील-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्यवहारनिष्प्रतियोगिकः स च निष्प्रतियोगिको नोपपद्यते निष्प्रतियोगिकोऽपि वा यद्ययं सप्रतियोगिकव्यवहारं करोति प्रतियोगिनियमो न स्यादिति स्वस्मादपि भेदव्यवहारं कुर्य्यात्। स्वस्माद्भेदः कथं सम्भवतीति चेत् तत् किं भिन्नाद्भेदः नन्वेवमनवस्था स्यात् नापि प्रथमः वक्तव्यं हि तद्यस्मादसौ भेदः न तावत्सर्व्वस्मात्, स्वात्मतोऽपि भेदप्रसङ्गात्। नापि घटादेः, घटादिना सह तस्यावध्यवधिमद्भावो योऽसौ सम्बन्धान्तरं वा स्यात् स्वरूपमेव वा। आद्ये तस्यापि भेदावधित्वेन तत्राप्येवमनुयोगे यद्येतदेवोत्तरमनवस्था स्यात्। अथ तत्र स्वरूपमेव, तर्हि प्रथमस्य तथाभावे प्रद्वेषः किन्निबन्धन इति प्रथमत एव स्वरूपं वाच्यं तदपि न तथा हि यदि घटादिभिः सार्द्धम् अवध्यवधिमद्भावः सम्बन्धोऽस्य स्वरूपं प्रतियोगिना सार्द्धं तर्ह्यभावस्वरूपस्यास्य निषेध्यनिषेधभावलक्षणः सम्बन्धः स्वरूपं न स्यात् स्वरूपस्यैकत्वात्। अनयोश्च सम्बन्धयोर्भिन्नत्वात् न हि यदेव प्रतियोगिनः सका-

CC-0. In Public Domain. Digitization by eGangotri

प्राङ्गिन्नत्वं तदेव तन्निषेधत्वमिति सम्भवति ततो व्यतिरिक्तस्य निषेध्यसाधारणत्वात् निषेध्यनिषेधभावस्य नियतवस्त्वपेक्षत्वादिति। एवं कार्य्यकारणभावादौ स्वभावसम्बन्धान्तरेऽपि वाच्यम् ऊहनीयस्यान्यत्रापि स्वरूपभेददोष एवः। किञ्च धर्मान्तरं भेद इति वदतः कोऽभिसन्धिः किं घटत्वादय एव भेदः उत भेदो नामान्य एवैकः कश्चिद्धर्मः। आद्ये घटत्वादीनां प्रतियोगिकत्वप्रसङ्गः भेदस्य प्रतियोगिकत्वात् न च घटत्वादयस्तथा, पटाद्यनपेक्षतयैव प्रतीतेः। यदा पटाद्यपेक्षया प्रतीयते तदा भेदव्यवहारं कुर्वन्तीति चेन्न, प्रतीतौ कस्य पटाद्यपेक्षेति वाच्यं किं घटत्वादेरुत धर्मस्य कस्यचित्। आद्ये पटापेक्षामन्तरेण घटत्वप्रतीत्यनुत्पत्तिप्रसङ्गः। न हि यदन्तरेण यदुत्पद्यते तत्तत्कारणं नाम बहाविवावान्तरजातिभेदे कारणभेदस्य चरितार्थयितुमशक्यत्वात्। साक्षात्कारित्वादिना सह परापरभावानुपपत्तेः जात्योः परापरत्वसङ्करमिच्छतामपि मते पञ्चम्यावधिभावः प्रतिपाद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानः केन समभिन्वियात् घटत्वस्यावधिवर्त्ति-तत्वे तथैव परं प्रतीत्यापत्तेः । तद्धर्मस्य तथा-त्वमिति चेन्न, तथा हि न द्वितीयः स एव सा-पेक्षप्रतिपत्तिर्भेदो न तु घटत्वादिः । घटत्वा-देश्च स भेदः स्यात् तद्धर्मकत्वात् घटादेस्तु भेदपर्य्यनुयोगे तदभिधानमसङ्गतं कथञ्च भिन्नैरनुगतव्यवहारः स्यात् । तथापि तथा सति वा किन्न तैरेव सदादिव्यवहारः स्यात् । नापि द्वितीयः, अनभ्युपगमात् सप्तपदार्था-नमन्तर्भावप्रसङ्गत्वात् स्वात्मनोवृत्तवृत्तिभ्या-मनुपपत्तेश्च ईदृशाञ्चोपाध्यालीढवैचित्र्याणां जात्या समर्थने सर्व्वोपाध्युपधानानां जा-त्यैव समर्थनं स्यात् । ननु घटत्वादय एव भेदा घटत्वादिज्ञानविशेषेऽपि च प्रतियोगि-ज्ञानसहकारिवशाद्विचित्रव्यवहारोपपत्तिरिति न व्यवहारसत्यत्वार्थं वास्तवानुगतविशेषस्या-वश्यस्वीकर्त्तव्यत्वे तथैव पर्य्यनुयोगानुवृत्तेः । अनन्त भेदपरम्पराभ्युपगमे तत्क्रमज्ञेयतायां प्रतीत्यपर्य्यवसानात् । तद्युगपज्ज्ञायतामनन्तं सहयतया कस्यचिदन्यभेदस्यान्यदीयतयापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रहणसम्भवबाधादिना सर्व्वत्र प्रामाण्यानाश्वास-
प्रसङ्गात् सर्व्वप्रतीति नियमानङ्गीकारे चाप्र-
तीतसत्त्वे प्रमाणाभावात् । जिज्ञासायां तस्य
तस्यापि ज्ञेयत्वे तद्बुद्धीनां भेदबुद्धित्वात्तद्वै-
वनुतत्वस्याप्यनुपपत्त्या तेष्वैकजात्याद्यभ्युप-
गमे तद्भेदेऽपि तदङ्गीकारे परस्पराश्रयाश्रयि-
भावप्रसङ्गात् । एवं सत्तादीनामानन्त्यस्वी-
कारे द्रष्टव्यम् । किञ्च घटत्वादेर्भेदत्वेऽवधि-
भूतपटत्वादिसापेक्षप्रतिपत्तिकतायां घटत्व-
वत् पटत्वस्यापि भेदरूपस्य भेदावधिप्रतिपत्ति-
सापेक्षतयाऽवधेश्च घटत्वादित्वेन घटत्वादि-
प्रतीत्यपेक्षायामन्योन्याश्रयत्वप्रसङ्गः । भेद-
रूपत्वे घटत्वादेरवध्यपेक्षा न तु स्वरूपमात्र-
प्रतिपत्तौ स्वरूपमात्रेण चावधित्वं तत् कुत
एवमिति चेन्न भेदरूपता यदि तस्य स्वात्मैव
तदा स्वरूपमात्रप्रतिपत्तौ नावध्यपेक्षेति शू-
न्यञ्च वचनम् । अथ धर्मान्तरं तदा स एव
भेदोऽस्तु कृतं तद्वत्तया घटत्वादेर्भेदरूपतेति
प्रक्रियाकल्पनया । अस्तु स एव धर्मान्तरं भेद
इति चेन्न दूष्यत्वात् । अथापि स्वरूपादित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिदं भेद इति कथं सङ्गच्छते तद्व्यवहारस्यैकाकारस्य नानानिमित्तत्वे गोत्वाद्यनुगताकारप्रतीतेऽपि कथमेकनिमित्तसिद्धौ प्रामाण्यं व्यभिचारात्। सामान्यविशेषैरेव परसामान्यबुद्धिव्यवहारोपपत्तौ तत्कल्पनानुपपत्तेः। किञ्च, भेदे भेदान्तरमस्ति न वा आद्येऽनवस्था द्वितीये तदभाव एव स्यात् धर्मिण्येव तत्प्रवेशात्। भेदस्वभावत्वात् स्वात्मन्यपि स्वयमेव तद्व्यवहारमयं करोति सत्त्वेव तद्व्यवहारमिति चेन्न, यदि स्वस्मादभिन्नः स्वभेद इति च स्वस्मादित्यवधेयावधिभावस्वरूपः स्वयं भेदोऽन्यस्माच्च स्वस्य तदास्य भेदस्य स्वात्मप्रतियोगित्वेन स्वाश्रयत्वेन चाङ्गीकारे स्वस्मादपि स्वयं भिन्नः किं नाङ्गीक्रियते विरोधाभावात्। स्वीक्रियेताप्येवं यदि तथा प्रतीतिर्व्यवहारो वा स्यादिति चेन्न, अस्त्यपि शब्दाभासादेस्तथा प्रतीतिराभासशब्दव्यवहारश्च। सत्यौ प्रतीति व्यवहारौ स्वीकारकारणं न च तौ स्वात्मन एव स्वस्माद्भेदविषयौ स्त इति चेन्न, स्वात्मा स्वस्यैवाधिकरणमवधिश्चेत्यपि तर्हि न सत्या प्रतीतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भवति नवा व्यवहारस्तत्कथमित्थमङ्गीकुरुषे। न वयं स्वात्मा स्वाधिकरणं स्वावधिर्वेत्यभ्युपगच्छामः किन्तु धर्मान्तरे तत्प्रतियोगिके तदाधारे वा स्वीकृते यौ बुद्धिव्यवहारावुपपद्येते तावनवस्थाभयाद्धर्मान्तरमन्तरेणैव स्वभावाद्भेदः करोतीति ब्रूम इति चेत्, तर्ह्यत्यत्र यादृशी प्रतीतिर्धर्मान्तरविषया तादृश्येवात्र विना धर्मान्तरमुत्पद्यत इति भ्रान्ता स्यात्। यस्य च स्वभावस्य बलेनेदृशी सा जायते स दोषः स्यात् यथा सत्यरजते रजतप्रतीती रजतत्वादुत्पन्ना अन्यत्र विना रजतत्वं जायमाना भ्रान्ता सा भवति। यस्य च सामर्थ्यात् सा तादृशी जायते स दोष इत्युच्यते तत्र रजतत्वं नास्ति अत्र धर्मिस्वरूपोऽपि भेद एव सन्नवलम्बनमिति चेत्। नैवम्। भिन्नप्रतीतिर्व्विशिष्टविषया भेदतदाश्रयस्वरूपोभयवस्तुविषयाऽन्यत्र यादृशी सत्याङ्गीकृता ततो मात्रयाप्यन्यूनाधीया इह जायमाना यदि द्वयं विषयं नाङ्गीकुरुषे तदा शक्रेणापि भ्रान्तत्वं दुर्वारम्। अथाङ्गीकुरुषे अनवस्थाप्रसङ्गः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ तदुभयविषयव्यतिरेकेणैव सात्र सत्या अन्यत्र तर्हीतोऽन्यादृशविषया मिथ्या स्यादित्यलं पल्लवेन ।

यत्तु सत्यैवेत्युक्तं तत् कटकगवोदाहरणमनुहरति, यतः सत्ताप्यमुना दूषणेनास्माभिः खण्डनीया । यत्पुनरभिधीयते किमेतैर्भेदखण्डनवादिभिरभिहितं भवति किं भेदज्ञानमेव नास्ति सदपि चानित्यम् अनित्यमपि वा निर्हेतुकं सहेतुकमपि वा निर्विषयं सविषयमपि वा बाध्यमानविषयम् । तत्र प्रथमः सर्वतोविरोधादनुत्तरः । द्वितीयः मुमुक्षुप्रवस्यानुरोधादुपेक्षणीयः । तृतीयोविरोधाद्धेयः । चतुर्थस्तु भेदोल्लेखादेवत्याज्यः । पञ्चमश्चिन्त्यते किमेतेष्वन्यतमो विषयः तदन्यो वा, द्वितीये किमेताभिर्व्यधिकरणानुपपत्तिभिस्तस्य बाध्यते एवं हि चौराद्यपराधेन व्यक्तमयं माण्डव्यनिग्रहः । अथान्यतमात्मा, तत्रापि यदि धर्मान्तरमेवेति तत्त्वं, तदानवस्थाभिया तदधिकप्रवाहस्त्यज्यतां तस्य कुतस्त्यागः न ह्यनवस्थाप्रतिभासमानमर्थं निवर्त्तयति, किन्तु प्रवाहं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिहारवति गन्धे गन्धान्तरवत् । अथेतरे-
तराभावमेव भेदज्ञानमालम्बते, तदापि का-
लाश्रयः तेन हि भेदज्ञानमेव न स्यात् । अस्ति
च तत्रातोऽहेत्वन्तरमाक्षिपेत् न तु स्वात्मनि
स्वयमहेतुत्वे स्वयमेव निवर्त्तेत अविद्यावशादिति
चेत्, किञ्चातः, नह्यविद्येत्येवात्माश्रयनिवृत्तिः
तथा सति घटादयोऽपि कुलालादिनिरपेक्षाः
स्वयमेव भवेयुः । अथात्माश्रयदोषप्रहततया
तन्न तस्यैव कारणं यतो यतः कुतश्चित्तस्य
जन्म तच्च दुर्निरूपमतोऽविद्येत्युच्यत इति वि-
चारार्थः । नास्ति तर्हि विवादः न च तदपि
दुर्निरूपं प्रतियोगित्वेनाप्रतीतावधिकरणस्वभाव-
त्वेनाधिकरणप्रतीतिः, अधिकरणस्वभावत्वेना-
स्य, तौ प्रतियोगिस्मृतिश्चेतरेतराभावग्रहण-
कारणमिति निरूपणात् । अथ स्वरूपमेव
भेदप्रतिभासस्य विषय इति तत्त्वं तथापि सह-
प्रयोग एवानुपपन्नः परिह्रीयतां भेदेन तु
किमपराद्धम् सोऽपि दृश्यत इति चेत्, सत्यं
नैमित्तिकस्तु स्यात् न स्वरूपतः न हि घट-
मानय पटमवलोकयेत्यादौ भेदपदमपि प्रेक्षा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानुपादत्वे व्याख्यायान्तु मूढप्रबोधनार्थं घटः कुम्भ इति वत् सहप्रयोगेऽपि न दोषः तथापि कः परमार्थः। यथायथं त्रयमपि घटस्य हि घटाद्यात्मना प्रतीतिः अपटाद्यात्मना च प्रतीतिस्ततो वैशिष्ट्यप्रतीतिश्चेत्यनुभवसिद्धम्। तत्राभावस्य प्रथममात्रम् अभावान्तरधर्मान्तराभावात् सामान्यादिषु त्रिषु द्वयं धर्मान्तराभावात् द्रव्यादित्रिषु त्रयं त्रयस्यापि सम्भवात्। भवति हि पटोऽयं न घटः तन्तुमयश्चेति गन्धोऽयं न रूपं सुरभिश्चेति गतिरियं नोत्क्षेपणं तिर्य्यक् चेति। लक्षणन्तु स्वरूपभेदस्य नाद्रूप्येणाप्रतीतौ प्रतीतिः इतरेतराभावस्य त्वबाधितः समानाधिकरणो निषेधप्रत्ययः, वैधर्म्यस्य तु विरोधः सचैकधर्मसमावेश इत्येषा दिगिति। अत्रोच्यते, तथा हि यत्तावत्पृष्टं किमेतेष्वन्यतमात्मास्य विषयः तदन्योवेति तन्निर्वचनवादिनि शोभते नास्मासु प्रतिभासमानोऽयं भेदः स्वरूपादिपक्षान्तर्भावान्तर्भावाभ्यां वा सदसत्त्वाभ्यां वा अन्येनापि धर्म्मेण येन केनचिन्निरुच्यमानोऽन्वये व्यतिरेके च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाध्यतामेति तेन सर्व्वेणानिर्व्वचनीय इति ब्रूमः। एतच्च न केवलं भेदस्यापि तर्हि जगत एव अनिर्व्वचनीयवादस्यायं यथा तथोदितं प्राक्, यदप्युक्तमथान्यतमेत्यादि गन्धोगन्धान्तरवदित्यन्तम् तदपि न साधु, यथा युक्तेरेकस्वीकारस्यैव प्रवाहस्वीकारस्य दुर्व्वारत्वात्। तत्र यदि प्रवाहस्वीकारे तस्यालसाधकत्वं स्वीक्रियते एकस्वीकारेऽपि स्यात्, अविशिष्टलक्षणत्वात् अतएव प्रतिभाससमानत्वादेकस्वीकार इत्ययुक्तम्, एकप्रतिभासिकाया युक्तेः सर्वसाधारण्यात्। न हि प्रत्यक्षादेव जायमानः प्रतिभासः प्रमाणं नानुमानादेरित्यत्र युक्तिरभ्युपगमो वा, न चानवस्थाप्रसञ्जिका युक्तिरनुमानादेरन्या नाम तर्कस्यापि व्याप्तिमूलत्वं सर्व्वञ्चानुमानच्छायामापद्य दूषणमपि प्रवर्त्तत इति भवत एव व्युत्पादनात् अतोऽनवस्थाप्रसञ्जिकाया युक्तेर्दोषो वा वक्तव्यः त्यक्तव्यो वा स्वपक्षः। प्रवाहस्वीकारवदेकस्वीकारे नानवस्थेति चेत्, तत् किमनवस्थाभावविशिष्टायास्तस्या युक्तेः साधकत्वं मन्यसे, एवं तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयमात्रस्वीकारे नानवस्थेति द्वितीयस्वीकारप्रसङ्गः, ओमितिचेत्, परार्द्धपर्य्यन्तं प्रवाहस्वीकारं को वारयिता नैतावन्मात्रेण तुष्यति भवान् परार्द्धादप्यधिकमेकादिकं किं नाभ्युपगम्यत इत्यपि भवता, वक्तव्यमेव, तथा च सैवानवस्थेति चेत्, सत्यं तस्मात्तु भयात् कीदृशमभ्युपगम्यतामिति निपुणं मन्त्रयामहे। द्यादिकं परित्यज्यतामिति चेत्, एकस्मिन्नाम कीदृशोऽनुग्रहः येनानवस्थाप्रवाहनिवेशाविशेषेऽपि द्यादिकमुपेक्षितमेकन्तु रक्षितम्। द्वितीयमादायानवस्थेति चेत्, द्वितीयेऽपि यदि भवतोऽनुग्रहः स्यात् तृतीयमादायानवस्थेत्यभिधाय सोऽपि रक्षितः स्यात्, तावेतौ च भवतो रागद्वेषौ निःश्रेयसाय यतमानस्य मानसमास्कन्दमानौ न कल्याणोदर्कौ तर्कयामि। गन्धे गन्धान्तरप्रसञ्जिका न च युक्तिरस्ति, तदस्तित्वे वा का नो हानिः, तस्याप्यस्माभिः खण्डनीयत्वात् यदप्ययेतरेत्यादिनिरूपणादित्यन्तं तदप्ययुक्तम्, तथा हि इतरेतराभावज्ञानं भेदव्यवहारहेतुं मन्यते तस्य पक्षो नोपपन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्माश्रयप्रसङ्गादित्येवं च वाच्यत्व न किञ्चिद्-
बाधकमुक्तं स्यात्, प्रतियोगिरूपत्वेनेत्यादि
समाधानञ्च प्रागेव दूषितम्। अथ स्वरूपमेवे-
त्यादि न दोष इत्यन्तं यदुक्तं तच्चास्मदनुक्त-
दोषदूषणमित्युपेक्षितम्। यदपि तथापि क
इत्यादि तिर्य्यक् चेत्यन्तं तदपि गर्त्तवर्त्तिगोधा
मांसविभजनमनुहरति पञ्चत्वयस्याप्युक्तयुक्त्या-
च्छादितस्य दर्शयितुमशक्यत्वे न तद्विभाग-
व्यवस्थितेरवसरनिरस्तत्वात्। यच्च स्वरूप-
भेदस्य लक्षणमुक्तं ताद्रूप्येणाप्रतीतौ प्रतीति-
रिति तदप्यवद्यम् यदेकमेव वस्तु भ्रान्त्या
भिन्नमिति प्रतीयते तत्र ताद्रूप्येणैकस्यैकरूप-
तया प्रतीतिर्नास्ति नास्ति च प्रतीतिर्न च स्व-
रूपभेद इत्यतिव्याप्तिः। ताद्रूप्येणेत्यस्य धर्मा-
न्तररूपभेदासङ्कीर्णोदाहरणार्थत्वात् प्रतीति-
रभ्रान्ता विवक्षितेति चेत् स्वरूपप्रतीतेस्त-
ताप्यभ्रान्तत्वात्। यच्च स्वरूपमात्रेण प्रतीयते
वस्तु न तत्ताद्रूप्येणैकरूप्येण न च नानात्मतया
वस्तुगत्या चैकमेव तत् तत्रापि स्वरूपलक्षण-
भेदः स्यात् नास्त्येवेदृशमुदाहरणं ताद्रूप्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादूप्याभ्यामेकस्यावश्यं प्रतीतिरिति चेन्न प्रतीतिकालहानवकाशात्। भवति हि यत्त्वया तत्र दृष्टं तत् किमेकमनेकं वेत्यनुयुक्तो नायं विशेषोऽमया शङ्कितोऽजिज्ञासितो वा स्वरूपमात्रन्तु प्रतीत्याह मुदासीनोऽभूवमित्यभिधत्त इति। ननु तदपि स्वरूपं भेद एव कस्मादपि तत् कथमुक्तदोषावता इति। नैवम्। एवं हि तादूप्येणाप्रतीताविति व्यर्थं स्यात्। प्रतीतिमात्रं लक्षणं वक्तव्यं यत्प्रमेयं तत् कस्मादप्यवश्यं भिन्नमिति एकस्यैव स्वस्माद्भेदप्रसङ्गनिराकरणार्थमपि तादूप्येणाप्रतीतावित्युक्तं तस्य खण्डितमिति। तादूप्यमन्यस्वरूपत्वं विवक्षितमिति चेन्न, तदा हि तदानुपस्थितपरामर्शवत् अन्यस्य स्वरूप भेदत्वे आत्माश्रयः सर्व्वस्वरूपाणां लक्ष्यत्वात् अन्योन्याभावत्वे चान्योन्याश्रयः वैयर्थ्यं चैकं यदपीतरेतराभावस्य लक्षणमबाधितः समानाधिकरणोनिषेधप्रत्ययः। एतदप्यशोभनं समानाधिकरण इत्यादि भाषायाः कथं कथमपि तात्पर्य्यगवेषणेऽपि समानाधिकरणोयोनिषेधस्तत्प्रत्यय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयोऽन्योन्याभाव इति पर्य्यवसाने समानाधिकरण इति किं तुल्याश्रयः उतैकाश्रयः उत तादात्म्यप्रतियोगिकः, उताधिकरणभूतपदार्थवाचिशब्दविशेष्यभावव्यवस्थितपदाभिधेयः उतान्यदेव । तत्र न प्रथमः, तुहिनमयूखे प्रियामुखे च न दूषणकरणस्यापि सम्भव इति प्रत्ययस्यापि दर्शनात् । तत्र मुखचन्द्रयोरन्योन्याभावोऽस्तीति चेन्न, तस्य सत्त्वेऽप्युक्तप्रत्ययस्य तदविषयत्वात् मास्तु तद्विषयो लक्षणत्वस्य तस्य तदविषयत्वेऽप्यदुष्टमिति चेत्, कीदृशं तर्हीदं लक्षणं न तावत्समानाधिकरणयोर्यो निषेधस्तत्प्रत्यययोर्यस्तस्य यो विषयः सोऽन्योन्याभाव इति, नापि स एवाऽन्योन्याभाव इति, नापि यत्र समानाधिकरणयोर्निषेधप्रत्ययस्तत्र योऽस्ति सोऽन्योन्याभाव इत्यस्तु, तद्धर्मस्य सर्वस्यान्योन्याभावत्वापातात् समानाधिकरण वैयर्थ्यप्रसङ्गाच्च । एतेनैकमुदाहरणमादाय द्वितीयोऽपि निरस्तः । नापि तृतीयः तादात्म्यप्रतिसम्बन्धानतिरेकेण तत्प्रतियोगिकत्वस्य प्रत्येतुमशक्यतया तन्निर्वचनप्रसङ्गात् तच्चाशक्यं, तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि तदेकत्वं वा भेदाभावो वा स्वरूपत्वं सम्भावितं तस्य भेदत्वोपगमात् तस्मिन् दृष्टेऽपि तत्र वेति तादात्म्यसंशयानवकाशापत्तेः। आद्येऽपि संख्याविशेषो वा धर्मान्तरं वा। नाद्यः गुणादौ तदभावप्रसङ्गात् प्रथमे क्षणे कार्य्यद्रव्यस्यैकस्यापि स्वतादात्म्यप्रसङ्गात्। वैशेषिकमतव्युत्थाने चैकत्वे तदभावप्रसङ्गात् उपाधिभिन्नावलम्बि च तादात्म्यं कथं स्वरूपमात्रावलम्बेनैकत्वीकर्त्तुं शक्यं विचित्रप्रतिपत्तिकत्वात्। नापि द्वितीयः तस्यापि धर्मान्तरापेक्षयानवस्थापातात् अनपेक्षायां स्वादात्म्यप्रसङ्गात्। नापि द्वितीयः न हि भेदस्याभावो भवन्नन्योन्याभावस्यैव स्यात् अन्योन्याभावस्य च तत्प्रतिक्षेपात्मकत्वात् तेनाप्यन्योन्याभावप्रतिक्षेपात्मना भवितव्यं परस्परप्रतिक्षेपात्मत्वान्निषेध्यनिषेधयोः तथा च सत्यन्योन्याभावप्रतीतिमन्तरेण तन्निरूपणाशक्यं निषेध्यप्रतीतिसापेक्षत्वान्निषेधबुद्धेरित्यन्योन्याश्रयः। नापि तुरीयः निर्वटं भूतलमित्यत्रापि प्रसङ्गात्। नापि पञ्चमः समानाधिकरणे इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतियोगिसमानाधिकरणोविवक्षित स्तादृशस्य निषेधोऽन्योन्याभावः । तत्प्रत्ययस्य तल्लक्षणमित्यस्याप्ययुक्तत्वात् भावासमानाधिकरणस्यान्योन्याभावस्य कुम्भः पटत्वं न भवतीत्यादेरव्यापनात् तज्जातीय तथात्वञ्च यं विशेषमन्योन्याभावगतमादाय स्यात्तदेव लक्षणीभवन् समर्थमुपजीव्यमानमस्य लक्षणस्योपन्यासं प्रत्यादिशति । न च तदपि सम्भवत्यन्योन्याभावसंसर्गाभावभेदखण्डनवसरे निरस्तत्वात् प्रकारान्तरस्य चासम्भवात् । न च घटः पटत्वं न भवतीत्ययमेवाभावः पटत्वं पटो न भवतीत्येष एव प्रतियोग्यैक्येन मयाऽभ्यु तथाभ्युपगमादिति क्वचित् प्रतियोगिसमानदेशत्वादपि लक्षणसिद्धिरिति वाच्यं तथापि प्रतियोग्यैक्येन तदत्यन्ताभावैक्यापत्तेः तादात्म्यवत् योगस्यापि इष्टत्वाविशेषादतिव्याप्तेः कालभेदेन च प्रागभावादेरपि प्रतियोगिसमानाधिकरणतयातिव्याप्तिः कालैक्येन विशेषणे च तदन्योन्याव्यतिरेकाव्याप्तेरिति । यदपि धर्मान्तरस्य लक्षणत्वादि वैधर्म्यस्य तु विरोधः स चैकधर्मसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेश इति तदपुरदृभ्रान्तमनसोभाषितम्, तथा हि प्रमाणप्रमेययोर्भेदोऽस्ति न वा, नचेत्तदभिधानपर्य्यायत्वप्रसङ्गः, किं प्रामाणिका बुद्धिरित्युक्ते बुद्धिविषये नोत्तरप्रसङ्गश्च। नापि प्रथमः स हि न तावत्स्वरूपलक्षणः एकस्याप्युभयभावदर्शनात्, अतएवान्योन्याभावोऽपि धर्मान्तरन्तु तयोर्भेदः परिशिष्यते तयोऽन्येन रूपेण तत्प्रमाणमन्येन च तदेव प्रमेयमित्युच्यते तथा च सत्येकधर्म्यसमावेशोलक्षणमव्यापकम् सेयं प्रमेया च तुलाप्रामाण्यवदिति पारमर्षमपि परामर्शं व्यस्तार्थीरित्यास्तां विस्तरः।

ननु भेदप्रतिपत्तेस्तावत्प्रत्यक्षफलस्यार्थेन्द्रियसन्निकर्षः कारणमसाधारणं वक्तव्यं, यत्र चेन्द्रियसन्निकर्षस्य भेदप्रतिपत्तिहेतोर्द्वितीयः सम्बन्धः स एव भेदोऽस्तु न उक्तबाधकैर्बाधितायाः प्रतीतेरर्थसन्निकर्षकारणत्वाभावादिति। किं पुनस्तत्कारणत्वं पूर्व्वभावित्वमिति चेन्न, चिरान्वयध्वस्तानामपि कारणत्वप्रसङ्गात्। अव्यवहितपूर्व्वभावित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति चेन्न, व्यापारस्यैव कारणत्वप्रसङ्गात्। व्यापारेण न व्यवधानमिति चेन्न, कारणकारणस्यापि कारणत्वप्रसङ्गात्। कारणस्यातद्व्यापारत्वात् नैवमिति चेन्न, विना विशेषोक्तिं दुर्व्विवेकत्वात् यद्विना यत् यं न जनयति तत् तस्यावान्तरव्यापार इति चेन्न, सहकारिणामपि तथात्वप्रसङ्गात्। तज्जन्यमिति चेन्न तथापि कारणत्वाव्यवस्थितौ विशेषोक्तेरतिप्रसक्तेः, कथमपि विशेषोक्तौ गगनादेः सर्व्वत्र कार्य्ये हेतुत्वप्रसङ्गात्। अनन्यथासिद्धपूर्व्वभावित्वमिति चेन्न, वक्तव्यं हि कस्मादन्येन प्रकारेण विना का च सिद्धिरिति यदि हि कार्य्यादन्येन प्रकारेण न निष्पत्तिस्तदा असिद्धिः न हि कार्य्येण कारणं जन्यं नापि कार्य्यादन्येन प्रकारेण न ज्ञप्तिः, प्रत्यक्षादेरपि कारणत्वज्ञप्तेः न खलु सर्व्वा कार्य्यलिङ्गजा कारणस्य ज्ञप्तिः नापि कारणत्वात् व्यतिरिक्तेन प्रकारेण न निष्पत्तिर्ज्ञप्तिर्वा ज्ञप्तावात्माश्रयात् प्रकारान्तरवत्तयापि च तदुपगमात्। व्यतिरिक्तत्वमकारणत्वमिति चेन्न, उक्तदोषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निवृत्तेः कारणत्वात् पूर्वं चोत्पत्तिक्रमेणोरक्ष-
णिकवादिभिरभ्युपगमात्। अव्यवहितपूर्व-
तया कदाचित्तदपि कारणमेवं तत्पूर्वतरमपि
कस्याश्चित् व्यक्तेरनैवमभावेऽपि तज्जातीयतया
तथाभावित्वविवक्षिततया व्यक्तिव्यभिचारा-
प्रयोजकत्वादिति चेन्न, कार्य्यान्तरेऽपि गगना-
देरतथाभावस्य विनिगन्तुमशक्यत्वात् काल-
देशव्यापकतयान्यथासिद्धस्येति तदिति चेन्न,
तथा सति शब्दादौ गगनादेरकारणत्वप्रस-
ङ्गात् एतेनान्यथासिद्धान्वयव्यतिरेकानुविधा-
यित्वमपि व्युदस्तम्। गगनादेर्व्यतिरेकाभा-
वात् अकारणत्वप्रसङ्गस्याधिकः। व्यापार-
वत्त्वं कारणत्वमिति चेन्न, तद्धि व्यापारसम-
वायित्वं वा व्यापारजनकत्वं वा। नाद्यः, यागा-
देरकारणत्वप्रसङ्गात् नोत्तरस्तस्यैव निरूप्य-
माणत्वात्। नित्यसत्त्वासत्त्वयोरन्यतरप्रसक्ति-
निवारकत्वमिति चेन्न, निवारकपदावयवस्य
प्रत्ययस्य कारणत्वनिर्वचनं विना अनिरूप्य-
माणार्थत्वात् अन्यतरार्थस्यैकस्य च निवृत्य-
शक्तेः। यदनभ्युपगमे यस्य तत्पूर्वसत्त्वप्रसङ्गः

CC-0. In Public Domain. Digitization by eGangotri

सत्तस्य कारणं तद्भावस्य कारणत्वमिति चेन्न, भावस्य विनाशित्वानभ्युपगमे तथाप्रसङ्गेनातिव्यापकत्वात् । तत्पूर्व्वस्थितत्वेन च विशेषणे सहभावनियतस्याभावेऽपि प्रसङ्गः तथात्वोपगमे च तत्सामग्र्यामपि प्रसङ्गः । तस्या अपि च तथोपगमे कार्य्यद्वयैक्यप्रसङ्गोऽसाधारण्यञ्च विशेषापेक्षित्वेऽतिव्याप्तिरविशेषे भाविपूर्व्वार्थविकल्पावकाशश्च । नियतप्राग्भावित्वमिति चेन्न, अवश्यम्भावस्य नियमार्थत्वे गमनादेः सर्व्वकार्य्यहेतुत्वप्रसङ्गस्य तदवस्थत्वात् अवयवरूपादेश्चावयवितद्रूसादिषु कारणत्वप्रसङ्गात् । अनौपाधिकत्वं नियमार्थं इति चेत्, एवं ह्यनौपाधिकः पूर्व्वभावो हेतुत्वमित्युक्तं भवति तथा च पिपीलिकोत्यानादेर्वृष्ट्यादौ जनकत्वप्रसङ्गः। सहभाविसामग्र्या वा न प्राचि पूर्व्वभावो हि नियतः किन्तु दृष्टेः परभाव इति चेन्न, प्रागुपाणामेव नियतत्वात् तानि कारणमेवेति चेन्न, निदानप्राग्रूपसाङ्कर्य्यप्रसङ्गात् पूर्वार्थश्च वक्तव्यः । पूर्व्वकालसम्बन्धित्वं पूर्वत्वमिति चेन्न, कालस्याकारणत्वप्रसङ्गात् तस्यापि किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्व्वत्वमिति विवेचनीयत्वात्। अतीतोपाध्यवच्छिन्नत्वं तस्य पूर्व्वत्वमिति चेन्न, अतीत इति निष्ठान्तस्य पूर्व्वकालवाचिनो विवेचनीयत्वात्। परत्वापरत्वयोर्गुणयोर्मध्ये यत्परत्वं तत् पूर्व्वत्वमुच्यत इति चेन्न, कालादौ गुणादौ च तदनङ्गीकारात् तेषामकारणत्वप्रसङ्गात् तस्मिन्नेव च तदभावात् साक्षात्कारिज्ञानादावपि तस्याकारणत्वप्रसङ्गात्। सामग्र्येकदेशत्वं कारणत्वमिति चेन्न, एकदेशत्वस्य अनिर्वचनीयत्वात् अवयवत्वप्रदेशत्वादीनां सामग्र्यामसम्भवात् सकलकारणकलापसमवधानस्यैव च मेलकार्थत्वात् तेनैव तन्निर्व्वचनीयत्वात्। यदनन्तरं कार्य्यं भवत्येव सा सामग्रीति चेन्न, विभागानन्तरं संयोगनाशस्यावश्योत्पत्तेर्व्विभागस्यापि सामग्रीत्वप्रसङ्गात्। एवं कर्म्मणो विभागेऽन्यतन्तु संयोगस्य घट इत्यादिकार्य्यकारणभावो नाम सम्बन्धः कोऽपीति चेत्, तदविशेषेण कार्य्यकारणसाङ्कर्य्यापत्तेः। कार्य्यकारणविशेषितत्वात् भेदे तयोः पृथक् निर्वाच्यत्वापत्तेः। कारणत्वं धर्म्मः कोऽपीति चेन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्सद्भावे प्रमाणस्य वाच्यत्वात्। क्वचित्प्रत्यक्षः क्वचित् दृष्टानुमेय इति चेन्न, किं हि प्रतिकारणतां प्रत्यक्षमुल्लिखेत्। न तावदनिर्लुठितकार्य्यमप्रतीतेः अन्वयव्यतिरेकादेर्व्यञ्जकस्य च विशेषं प्रत्येव सम्भवात्। नापि सामान्यतो घटादिं प्रत्येवं विशेषतो घटाद्यनुत्पत्तेः तावन्मात्रात् विशेषोत्पत्तेर्विशेषेषु विनिगमना न स्यात् प्रतिविशेषं चोत्पत्तेः प्राग्वर्त्तमानत्वादसन्निकर्षादध्यक्षविषयतानुपपत्तेः कार्य्यसत्त्वकालस्य सामग्र्यभावात् न तज्जननकाल इति तदानीं तज्जननविशिष्टता कथमध्यक्षा स्यात् प्राक् तदग्रहणेन संस्कारसाचिव्यस्याप्यसम्भवात् एवं क्वचिदपि हेतुत्वे साक्षात्कारासम्भवेन किम्मूलव्याप्तिग्रहात्तत्रानुमापि स्यात् प्रतिवन्दी चानिर्व्वचनवादिनि न स्याने। कादाचित्कत्वानुपपत्त्या तद्ग्रह इति चेन्न, वैयधिकरण्यात् कथमपि सामानाधिकरण्ये तदुपपादकस्योपपाद्यवदनुपपत्तावविशेषादनिर्व्वान्तिनोनादित्वेनापि शक्योपपादनम्। वैयधिकरण्येऽप्युपपाद्यासम्बन्धस्योदनियमः सम्बन्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्येदविश्रान्तिरिति। एतेन शक्तिः कारणत्वमिति गतार्थम्। किञ्च प्रत्यक्षप्रमितौ विषयस्यापि सन्निकर्षव्यापारकस्य कारणतया स्वष्टत्वापत्तेः अन्यथा अक्षस्यापि तत्र कारणत्वं न स्यात् अनुविधानाविशेषात् विषयाविशेषिताक्षसन्निकर्षस्य तथात्वेऽत्यापत्तेः क्वचित् कारणत्वाकारणत्वविवादस्य चानुच्छेद्यत्वापत्तेः। एकेन तस्य दृष्टेरपरेण चादृष्टेः तल्लक्षणस्य नियमपूर्वभावित्वादेः कथने कथितदोषापत्तेः विना च तद्विह्लाद्भ्रमसन्देहौ तत्र किं दर्शनादुच्छेद्यौ अक्षेण हेतुत्वधर्मिणि दृष्टेऽपि तददृष्ट्या यदनवगमोऽक्षसहकारी वाच्यस्तदर्थेन सिद्धेन हेतुधियोऽर्थकत्वे सम्भवति तदन्यार्थत्वकल्पनागौरवं कुतो बलात् सिध्येत्। तस्मादन्वयानुविधानादेरनुमेयहेतुत्वे व्योमादावनुपपत्तेः तदन्यत्वसिद्धिरिति चेन्न, अन्योन्याश्रयापत्तेः प्रत्यक्षस्यान्यस्मिन् विषये सिद्धेऽन्यत्र दृष्टान्तेन तदनुमानं तत्सिद्धौ च प्रत्यक्षस्यान्यविषयतासिद्धिः तस्य चानागन्तुकत्वे प्रागपि तत्सत्वाद-

CC-0. In Public Domain. Digitization by eGangotri

त्तीति मतिवत्करोतीति प्रमापातः । आगन्तुकत्वे च तदुत्पत्तेः प्राक्कारणत्वं क्वापि न स्यात् तथाप्यजातत्वे घटाद्यपि किं न तथा स्यात् व्यावृत्तेष्वनुगतौ च सर्वं प्रति सर्वकारणत्वापातात् प्रतिकार्य्यव्यक्ति तत् पृथगिति चेन्न, साधारणस्यापि तद्गतस्य स्वरूपस्य घटादिकारणात्मतयानुवृत्तौ घटकारणस्यापि तन्तुकारणत्वापत्तेः कारणत्वमात्रेण तदनुगतं रूपं न घटकारणत्वादिनेति चेन्न, घटादिविशेषानुपसंहितकारणमात्रस्य किं प्रतीत्यनिर्देश्यस्य सद्भावे प्रमाणाभावात्, अन्यथा यदि किञ्चिन्मति कारणे सामान्यतः कारणत्वं नाम धर्मः स्यात्तदा तस्या एव व्यक्तेः किञ्चित् प्रत्यकारणत्वादकारणत्वमपि रूपं तत्र स्यादित्यनपेक्षितविशेषकारणत्वाकारणत्वाभ्यासाङ्कदेनैकमात्रमेवोच्छिद्येत् । किञ्च कार्य्यव्यक्तेः कारणमस्ति न वा न चेन्नित्यसत्त्वासत्त्वयोरन्यतरप्रसङ्गः अस्ति चेत् किं तत् कारणं व्यक्तिविशेष इति चेन्न, पूर्वभावस्य रासभादिसाधारणत्वात् तां तां कार्य्यव्यक्तिं प्रति तस्याः किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत् कारणत्वं स्वरूपमेवेति चेन्न, तस्य व्यावृत्तत्वात् तस्या स्तत्कारणात्मत्वे चातदात्मनां तत्कारणत्वविरोधात् तत्कारणत्वस्य च समवाय्यसमवायिनिमित्तभूतानेकव्यक्तिसाधारणत्वात् अनेकस्य चैकानुगतव्यवहारबुद्धिनिदानत्वे गोत्वाद्युच्छेदप्रसङ्गस्य दर्शितत्वात्। नियतपूर्वभावित्वमिति चेन्न, व्याप्त्यर्थस्य नियमस्यैकस्यासर्वत्र व्यक्त्यवसम्भवात्पूर्वत्वमात्रस्य चातिप्रसञ्जकत्वात्। तज्जातीयंप्रति नियत जातीयत्वमिति चेन्न, तस्य तज्जातीयव्यक्त्यन्तरसाधारण्यात्। नियत तज्जातीयत्वे सति पूर्वभावित्वमिति चेन्न तत्समानकालोत्पत्तिकार्य्यव्यक्तिशतजनकव्यक्तिशतसाधारण्यात् तथाभ्युपगमे चैकसमवाय्यादिनाशे सर्वतत्कार्य्यनाशप्रसङ्गः। तत्कालजातीयसामग्रीतः सर्वतत्कालजातीयोत्पत्तौ सामग्रीभेदस्य कार्य्यभेदहेतुतया प्रत्येकमिलित तत्सामग्रीत्वविकल्पेन कार्य्यव्यक्त्यभेदप्रतिव्यक्तिस्वरूपभेदयोरन्यतरप्रसङ्गश्च समवायित्वं समप्यपि साधर्म्यानुविधायिनियमेऽत्यापत्तेः व्यावृत्तत्वे चानियमात्। नियतजाती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थत्वे सति तत्सादेश्यमिति चेन्न, समवायिदेशा-
पेक्षया कार्य्यकारणयोः सादेश्यनियमानभ्युप-
गमात् संयोगिदेशापेक्षया गुणादावसम्भवात्,
यथा कथञ्चित्सादेश्यमात्रस्यातिप्रसञ्जकत्वात्
अदृष्टादेर्भिन्नदेशस्यापि कारणत्वोपगमे सर्वं प्रति
कार्य्यसामग्र्याः कारणत्वापातात् पूर्वभावनिय-
मादेस्तुल्यत्वात् अनुगते च रूपेऽन्वयव्यति-
रेकसम्भवात् व्यक्तिगतसामान्ययोरेव कार्य्य-
कारणत्वापत्तेः तद्गतसामान्ययोरेवान्वयव्यति-
रेकादिनियमे व्यक्तेश्च कार्य्यकारणतेति लक्ष्य-
लक्षणभाववैयधिकरण्यात् सामान्याकारप्र-
विष्टां व्यक्तिमादायान्वयव्यतिरेके विशेषस्या-
कारणत्वं स्यात् सामान्याकारेण च पूर्वसतः
कार्य्यत्वं द्रव्यसामग्र्या वृक्षसामग्र्या शिंशपा-
सामग्र्या च पृथग्व्यक्तिजननापत्तेः पृथगेव
तासां सामग्रीत्वात् सर्वासाञ्च व्यक्तिं प्रत्येव
जनकत्वात् द्रव्यत्वादीनामजन्यत्वात्। शिंशपा-
सामग्र्या वृक्षसामग्रीसहितताया एव सामग्री-
भावान्न पृथक् शिंशपाव्यक्तिरिति चेन्न, वृक्षसा-
मग्र्याः शिंशपासामग्रीमतीत्यापि शाखतमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादेव तस्य जननात् पृथक्तया पृथग्व्यक्तिजनना-पत्तेः । सापि शिंशपासामग्री तन्मिलिता जनिकेति न व्यक्तिभेद इति चेन्न, शिंशपाद्यनतिरिक्तस्य वृक्षार्थभावापत्तेः वृक्षशिंशपासामग्र्योरेकीकृतयोर्जननाविशेषात् । वृक्षसामग्री च वृक्षजनन एव कथं क्वचिच्छिंशपासामग्रीं क्वचित्तमालसामग्रीमपेक्षत इति स्यात् एकस्य वृक्षलक्षणस्य कार्य्यस्य सामग्रीभेदे भेदापातात् अनुगतायाश्च वृक्षसामग्रीत्वे पृथग्वृक्षव्यक्तेः पृथक् शिंशपादिव्यक्तेः उत्पत्त्यापत्तेः इत्यादि स्वयमूहनीयम् ।

नियमे प्राक्कालीनतयाभिधीयमाने प्रागित्वस्य व्यवच्छेद्यौ वर्त्तमानभविष्यत्कालौ प्राक्कालस्य व्यवच्छेदकोऽविवेचनीयः । न च तद्विवेचनं शक्यं, वर्त्तमानादिबुद्धय एव स्वविषयवैचित्र्यप्रमाणमिति चेन्न, तथा हि वर्त्तमानादिबुद्धेरेव को विषयः । कालविशेष इति चेन्न, कालस्य विशेषः स्वाभाविक औपाधिको वा । नाद्यः, कालस्य भवद्भिरेकत्वाभ्युपगमात्, य एव कालो वर्त्तमानः प्रतीयते स एव पूर्वं भावीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्चाद्भूत इति च न प्रतीयेत । त्रिविधस्वभाव एवासाविति चेन्न भेदप्रसङ्गात् व्यवस्थानुपपत्तिप्रसङ्गाच्च यदैव वर्त्तत इति प्रत्ययस्तदैव वृत्तोवर्त्तिष्यते इति प्रत्ययप्रसङ्गात । द्वितीयस्तेदुपाधिरभिधीयतां सूर्य्यादिक्रियासम्बन्धैर्भेदः स इति चेन्न, भूतभविष्यतोरपि क्रियासम्बन्धप्रत्ययस्यावश्यं वक्तव्यत्वात् य एव दिवसः सूर्य्यगतिविशेषावच्छिन्नो वर्त्तत इति प्रतीतः स एव हि तदवच्छिन्नोवृत्त इत्यवगम्यते वर्त्स्यन्निति च न हि निर्विशेषस्य कालस्य तदतीतत्वं प्रतीयते नागतत्वं वा किन्तूपाधिविशेषस्तेनैवावच्छिन्नस्य येनैवासौ पूर्वं दिनान्तरात् व्यवच्छिन्नो वर्त्तत इति प्रतीतः तेनैवोपाधिना ततएव व्यवच्छिन्नो वृत्त इति वर्त्तिष्यत इति च कदाचित् ज्ञायते । ननु सत्यमेतत् परं यदा तदुपाधिसम्बन्धस्तस्य स्वरूपेणावतिष्ठमानस्तदा वर्त्तमानप्रत्ययः यदा स एव विनष्टो भवति तदा भूतप्रत्ययो यदानागतस्तदा भविष्यत् प्रत्यय इति नैतदस्ति यद्यतस्तोविवक्षितार्थस्तदा तज्ज्ञानस्यैव तज्ज्ञानो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायत्वमित्यात्माश्रयानवस्थयोरन्यतरप्रसङ्गः । विनष्टादिशब्दाश्चातीतादिपर्य्याया स्तेषां सर्वेषामेव अर्थे निरूप्यमाणे तन्मध्यपतितमेकशब्दं प्रयुज्य तन्निरुक्तिं कुर्व्वाणः श्लाघ्यप्रज्ञो मातापितृमानसि । तत्क्रियावच्छिन्नः कालो वर्त्तमानः तत्प्रागभावावच्छिन्नो भविष्यन् तद्ध्वंसावच्छिन्नो भूत इति चेन्न, अतीतानागतप्रतीतिकालेऽपि क्रियावच्छिन्नः प्रतीयत इति वर्त्तमानप्रत्ययप्रसङ्गस्य तादवस्थ्यात् । क्रियानवच्छिन्नस्य तस्य तत्प्रागभावप्रध्वंसाभावावच्छेदानुपपत्तेः प्रागभावश्च प्रागर्थनिरुक्त्या कथं न दुरधिगमः प्रध्वंसस्यापि प्रागभावात् कथं विशेषो वक्तव्यः । अभावोविनाशी प्रागभावः उत्पत्तिमान् ध्वंस इत्येतयोर्विशेष इति चेन्न को हि प्रागभावस्य विनाशो येन विनाशीत्युच्यते । यदि प्रतियोगिभूतोघटादिः प्रध्वंसस्यापि प्रागभाववत् प्रतियोगीति सोऽपि विनाशी प्राप्तः । उत्पत्तिमांश्च प्रध्वंस इति उत्पत्तिपदार्थो विवेचनीयः । यद्यसावसतः सत्त्वं तस्य सामान्यं तदा अभावे असम्पृक्त एव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ स्वरूपसत्त्वं तदा प्रागभावेऽपि प्रसङ्गः तस्यापि कदाचिदसत्त्वात् पूर्व्वमसतः पश्चात् सत्त्वं विवक्षितमिति चेन्न, पूर्व्वेदानीं पश्चादर्थस्यैव निरूप्यमाणत्वात्। एतेन कारणावच्छिन्नं सत्त्वमुत्पत्तिरित्यपि निरस्तं, पूर्व्वापरनिर्व्वचनमन्तरेण कारणार्थानिर्व्वचनात्। अस्तु तावदतीतानागतयोर्यथातथानिरुक्तिः यत्क्रियावच्छिन्नो यः कालः स तत्क्रियापेक्षया वर्त्तमानो नत्वन्यापेक्षयेति चेत्, तदपेक्षयेति कोऽर्थः। किं तदुपधानेन, उत तदवधिकतया, तत्प्रतियोगिकतया उत तेन प्रकारेण वा, नाद्यः उपाध्यवच्छिन्नस्यातीतानागतप्रतिपत्तिविषयत्वमपि तस्येत्यसकृदुक्तत्वात्। नापि द्वितीयः, अस्मादयं दीर्घ इति वदस्मादयं वर्त्तत इत्यवध्यपेक्षासहकारेण प्रतीयमानत्वात् सर्व्वदैव च त्रिविधावध्यपेक्षया आसीदस्ति भविष्यतीति प्रत्ययाव्यवस्थाप्रसङ्गात्। अतएव न तृतीयः नापि चतुर्थः, अतीतानागतप्रतीति काले क्रियावच्छेदप्रकारेण वर्त्तमानप्रत्ययविषयत्वप्रसङ्गात्। नासौ क्रियावच्छेदलक्षणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकारोऽतीतानागतकाले वर्त्तत इति चेन्न, वर्त्तमानताया अद्यापि निरूपणेन वर्त्तत इत्युक्ता विशेषस्य दर्शयितुमशक्यत्वात् तत् क्रियाकाले तत्क्रियावच्छिन्ना वर्त्तमानता इति चेन्न, कालस्य कालाश्रयतया निरूपणासम्भवात् कालान्तरस्यानभ्युपगमात् तस्यैव च कालस्य तदाश्रयत्वे व्यक्तमात्माश्रयत्वापत्तेः। स्यादेतत् ग्राहकविज्ञानविषयो ग्राहकविज्ञानाश्रयश्च कालो वर्त्तमानः वर्त्तमानोपाधिप्रागभावावच्छिन्नस्य पूर्वः तत्प्रध्वंसावच्छिन्नस्यानागतः प्रागभावप्रध्वंसयोश्च स्वाभाविकमेव भेदमादाय व्यवस्था प्राग्व्यवस्थाहेतुरभावप्रागभाव इति स्वभावभूतस्यैव विशेषस्य कार्य्यमादाय लक्षणम् अनागतव्यवस्थानिदानमभावः प्रध्वंस इति च प्रध्वंसस्येति मैवं, ज्ञानास्वप्रकाशतापक्षे स्वोपहितस्य स्वयं ग्रहणानुपपत्तेः कथं वर्त्तमानता ग्रहः ज्ञानान्तरेण तथाग्रहे वर्त्तमानतावभासाङ्गीकारे तदासौ दृष्टो मयेति प्रत्ययस्य तदासौ मया दृश्यते इत्याकारतापत्तिः। अतः एव स्वप्रकाशपक्षेऽप्यनिस्तारः। श्रीवानर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्रकाशे वर्त्तमानतयोक्तः तावत एव परेण ग्रहणे व्यभिचारात् स्वप्रकाशतायाश्चाधिक्येऽपि विषये विशेषाभावात् स्वरूपमेव विशेष इति चेन्न, तस्यानुगमानानुगमाभ्यामनुपपत्तेः प्राक्-प्रध्वंसाभावयोश्च स्वरूपतो विशेषेऽपि कतरो भूतभव्यव्यवहारस्य कतरश्चानागतव्यवहार-स्योपाधिरित्यनुयुक्ते कार्य्यभेदजनकतया च तन्निर्वक्तावुत्तरे पूर्व्वप्रत्युक्तां पूर्व्वतापरतानि-रुक्तिं विना जन्यजनकत्वाज्ज्ञानमिति । उपाधि-भेदाच्च कालभेदे योऽपेक्षतयाभिमतः कालः सोऽपि चन्द्रसूर्य्यक्रियाद्यसंख्योपाधिभेदसम्भ-वेन नाना स्यात् तत्रायमेवोपाधिर्नायमिति चाविनिगम्यत्वात् प्रतिक्षणस्वभावभेदवादि-पक्षेऽपि च नानाक्षणेषु वर्त्तमानत्वादिव्यवहा-रार्थमुपाध्यनुसरणावश्यम्भावेनोक्तोपाधिदोष-ग्रासस्यैवापातादिति ।

ननु तथापि विषयभेदेनावश्यम्भवितव्यं प्र-तीतिभेदस्य दुरपलापत्वात् अतः सामान्यतः सिद्धौ विशेषतोविवेचनाशक्तौ संशयएवास्ता-मिति चेन्न, संशयस्यापि निर्व्वक्तुमशक्यत्वात्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा हि संशयस्य निश्चयात् किमुपाधिकृतो विशेष उत जातिकृतः आद्ये किं विषयविशेषेणोपाधिना उत कारणविशेषेण उतान्येनैव केनचित् सम्बन्धिना कृतः। न प्रथमः तस्यानिर्वचनात् उभयकोटिविषयः संशय इति चेन्न कोटिद्वयसमुच्चयनिश्चयस्यापि संशयत्वप्रसङ्गात् प्रतीतिरेव नैवमिति चेन्न भेदाभेदप्रतीतीनां शाब्दस्वप्नादिप्रतीतीनाञ्च तादृशां सम्भवात् समुच्चयप्रकाशे कोट्योरविरोधः प्रकाशते संशये तु विरोध इति विशेष इति चेन्न पीतः शङ्ख इत्यादिषु पीतत्वशङ्खत्वादेर्भिन्नाश्रयता नियमं विरोधं जानतोऽपि प्रत्ययात् तथापि तस्यां बुद्धौ न भासते विरोध इति चेन्न कथमेवमिति प्रकाशेऽपि तत् प्रकाशात् तयोरेकाश्रययोर्विरोधप्रतीतेरवश्योपेयत्वात् मिथ्याविषयस्ता इति चेन्न संशयस्यापि भवद्भिरतत्त्वबुद्धितयाङ्गीकारात् तत्त्वातत्त्वबुद्धोश्च तद्विषयत्वेन विशेषाभावात् न हि मिथ्यारजतबुद्धीरजतबुद्धिरेव न भवति अव्यवस्थितकोटिद्वयविषयः संशय इति, चेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केयमव्यवस्थितता प्रातिस्विकतेति चेन्न, पर्य्यायं पृच्छामोऽपि तु किं कोटिद्वयस्वरूपमेव, उत कोटिद्वयस्य धर्म्मः कश्चिदसौ, आद्ये कोटिद्वयनिश्चयेन सहाविशेषस्तदवस्थः । द्वितीये यद्यसौ केनचित् प्रमाणेन सिद्धः तदा तस्यैव कोटिद्वयाश्रितधर्म्मविषयस्य संशयत्वप्रसङ्गेन प्रमाणत्वव्याघातः । अथ कस्यचित् प्रमाणस्य नासौ विषयः नास्ति तर्हि विषयकृतोविशेषः एतेनान्योऽपि यः कश्चित् विषये विशेषः स्थाणुतदभावपुरुषतदभावादिरूपोऽभिधीयते; सोऽपि निरस्तोवेदितव्यः अत्यन्तासत एव च तस्य प्रतिभासे जितमसद्ख्यातिवादिभिः क्वचित् सतश्चेत्तत्रैव प्रसङ्गः । नापि द्वितीयः कारणविशेषो हि विशिष्टा सामग्री वा स्यात् तदेकदेशो वा, नाद्यः तस्याश्चाप्रत्यक्षत्वेन तदुपहितस्य प्रत्यक्षतोऽवगमानुपपत्तेः न च तस्या अनुमेयत्वं लिङ्गासम्भवात् कार्य्यविशेष एव लिङ्गमिति चेन्न, कार्य्यगतस्यैव विशेषस्य चिन्त्यमानस्याद्याप्यप्राप्तेः जातिभेदस्य दूषणीयत्वात् । नापि द्वितीयः द्वयस्य तदेकदेशस्य साधारण-

CC-0. In Public Domain. Digitization by eGangotri

धर्म्मिदर्शनादेर्विशेषद्वयस्मरणादेश्च साधारण-धर्म्मविशेषद्वयज्ञानप्रत्यक्षत्वादावपि हेतुत्वेन साधारण्यात् अदृश्ये च तस्मिन् लिङ्गाभावात् तेन कार्य्ये विशेषजात्याधानस्य निरस्तत्वात् तस्या विषयत्वेनानुव्यवसाय साक्षिकार्य्यगत-विशेषीभवनासामर्थ्यात्। नापि तृतीयः तस्य दर्शयितुमशक्यत्वात्। न च द्वितीयः धर्म्मिस्वरू-पादेरपि तद्विषयतया संशयितत्वप्रसङ्गात् न चैवं नस्ययं स्थाणुर्वा पुरुषोवेति संशये सतीद-मापरामृष्यमाणस्य ऊर्द्ध्वत्वशालिनोधर्म्मिणः स्वरूपसत्त्वेऽपि स्वरूपमेव भवति नवेति द्रष्टु-रभिमानोव्यवहारो वा किन्नामकः स्वरूपस-त्तांशमात्रावलम्बिनस्तस्य ज्ञानस्य निश्चयत्वमेव ततः किमिति चेन्न एकस्यैव ज्ञानस्य निश्चयत्व-संशयत्वजातिसङ्करः। स प्रामाण्याप्रामाण्य-वत् भविष्यतीति चेन्न अतएव हि तयोरपि जातित्वानङ्गीकारः। किन्नाम तथाभूतातथा-भूतार्थत्वलक्षणोपाधिद्वयरूपतास्वीकारः एव तयोः यदा च संशयत्वनिश्चयत्वलक्षणजाति-द्वयसम्भिन्नं तद्विज्ञानमाश्रीयते तदा क्वचित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयमपेक्ष्य संशयत्वं कञ्चिदपेक्ष्य निश्चयत्व-मित्यापेक्षिको जातिव्यवस्थितिरपीत्यपूर्व्वः पन्थाः इदृशस्य पक्षः पार्श्वेनापि भवता किं नि-श्चायकमभिधेयं येन धर्म्मिणि तस्य निश्चयत्वं व्यवतिष्ठेत। विशेषद्वये च संशयत्वं विशेष-दर्शनादर्शने इति चेत्तर्हि भवति स्थाणोः स्थाणुत्वं पुरुषत्वं पुरुषस्य विशेषः प्रतीयते चासाविति विशेषदर्शनात्तत्रापि निश्चयत्वप्र-सङ्गः। संशयात् पूर्व्वं नास्ति विशेषदर्शनमिति युक्तस्तत्रापि संशय इति चेन्न, धर्म्मिधियः पूर्व्वं तर्हि कथं तद्गतविशेषदर्शनं स्यात् संशयकाले नास्ति विशेषदर्शनमित्यनन्तरं तर्हि संशयानु-त्पत्तिप्रसङ्गोऽपि युक्त एव तदीयविषयात् विशे-षात् व्यतिरिक्तस्य विशेषस्य दर्शनं विवक्षित-मिति चेन्न, स्थाणुर्वा पुरुषो वेति संशयानन्तरं दारुमयो मांसमयो वायमिति संशयो नोपपद्यते तदुभयमयत्वव्यतिरिक्तयोः स्थाणुत्वविशेषयोः पूर्व्वज्ञानोल्लिखितत्वात्। अन्यतरविशेषदर्शनं संशयप्रतिरोधकं संशये तूभयोरपदर्शनम् अतो नोक्तदोषप्रसङ्ग इति चेत्, तर्हि स्थाणुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषश्चेति कुतोऽपि भ्रमे जाते दारुमयो वा मांसमयोवेति संशयप्रतिरोधो न स्यात् पूर्वज्ञानेन विशेषद्वयोपदर्शनस्य कृतत्वात् विशेषदर्शनं हि विशेषनिश्चयोविवक्षितो न तु विशेषज्ञानमात्रं येन संशयोपनीतादपि विशेषात् संशये प्रतिरोधः प्रसज्येतेति चेत् मैवं संशयेन यावुपदर्शितौ विशेषौ तत्र न संशयस्य निश्चयत्वमिति व्यवस्थायां सिद्धायाम् उपदर्शितनियामकसिद्धिर्भवति सिद्धे चास्मिन् नियामके संशयस्य विशेषद्वयं प्रति निश्चयत्वं नास्तीति सिध्येदित्यन्योन्याश्रयापत्तेः को वारयिता। स्यादेतत् संशयज्ञानस्य धर्मिविषयत्वेऽभ्युपगम्यमाने त्वद्वैशसमापद्येत तच्च तदनभ्युपगम एव निवर्त्तते तेन धर्मिज्ञानं निश्चयात्मकम् अन्यदेव स्थाणुर्वा पुरुषोवेति चान्यदेव संशयज्ञानं इत्यभ्युपेष्याम इति चेत् मैवम् एकधर्मिसम्बन्धोपनयव्यतिरेकेण स्थाणुत्व पुरुषत्वयोर्विरोध एव नास्तीति स्थाणुर्वा पुरुषोवेत्येतदेव न स्यात् न हि यस्य कस्यचित् स्थाणुत्वेन यस्य कस्यचित् पुरुषत्वं विरुध्यते धर्मिसम्ब-

CC-0. In Public Domain. Digitization by eGangotri

मनन्तर्भाव्य विरोधे जगति तयोरन्योन्यस्य व्यतिरेकतोरसत्त्वमेव प्रसज्येत तस्य धर्मिणो वा पुरुषत्वनिर्णयाद्यथा संशयो निवर्त्तते नोपपद्यते वा तथा स्वात्मनः पुरुषत्वनिर्णयात् संशयो- निवर्त्तेत नोत्पद्येत वा विशेषाभावाद्यथाद्रष्टुर्न स्वशरीरविषयः संशयस्तथैव हि पुरोवर्त्ति- विषयोऽपि नासौ कथञ्चेदमर्थेन सामानाधि- करण्याभिमानः योऽमूर्त्ताधर्मी स किं स्थाणुरुत पुरुष इति कस्माद्वा प्रत्यभिज्ञादयो- प्येकं ज्ञानमङ्गीकृता इत्युच्छिन्ना विशिष्टज्ञान- सङ्कथा सञ्जातश्च गौरवस्त्र: पुरुषः इतिवत् विशकलितोविज्ञानसंसार इत्यास्तां विस्त- राभिनिवेशः।

नन्वस्ति तावत् स्थाणुर्वा पुरुषोवेति पर- स्परविरुद्धार्थावगाही प्रत्ययः स्वविषयं तथा- भूतमुपस्थापयिष्यति न उक्तबाधकैः सर्वप्र- कारखण्डने परिशेषासम्भवात् यच्च स्वरूप- मादाय विरुद्धार्थत्वमभिधीयते तदपि निर्वक्तुं न शक्यते तथा हि भावतदभावयोः कोवि- रोधः सहानवस्थानमिति चेत् देशभेदेन सहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवस्थानात् देशाभेदेनेति चेन्न, संयोगाद्यव्यापकत्वं यद्यभ्युपैषि तदा तथाप्यनुपपत्तिः। प्रकारभेदेन तथाभावस्याभ्युपगमात् तस्य पक्षे एकेन प्रकारेणैकस्मिन् सहानवस्थानं, विरोधः संयोगाद्यव्यापकत्वानभ्युपगन्तृपक्षे च देशाभेदेन सहानवस्थानं स इति चेन्न तर्हि तदुभयावस्थानसाहित्यनिषेधो वा तदुभयावस्थाननिषेधसाहित्यं वा स्यात्, आद्ये अप्रसिद्धप्रतियोगिकत्वं तदुभयावस्थानसाहित्यस्य क्वचिदप्यप्रमितेः शशविषाणनिषेधादेश्च शशके विषाणनिषेधादिरूपत्वाङ्गीकारेण प्रसिद्धप्रतियोगिकत्वाभ्युपगमात् यदाहैको वस्तुनः प्रतियोगितेति अन्यस्य। स्वस्वरूपेण क्वचित् किञ्चित् तादृगेव निषिध्यतीति, द्वितीये तु तदुभयावस्थानसाहित्यस्वीकार एव स्यात् तदुभयनिषेधयोस्तदुभयतयैवाङ्गीकारात्। परस्परप्रतिक्षेपकत्वं विरोध इति चेन्न, तर्हि परस्परप्रतिक्षेपं प्रति कारणत्वं वा तदात्मत्वं वा न प्रथमः प्रमाणाभावेन तथाविधतत्कार्य्यानङ्गीकारात्, न द्वितीयः प्रतिक्षेपशब्दार्थस्योभयानुगतस्यानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वचनात् यत्रैकस्य सत्त्वं तत्रापरस्य सत्त्वं नियमेन यत् स विरोधस्तयोरिति चेन्न, सत्त्वासत्त्वयोरेकापराश्रयत्ववैयधिकरण्यात् सम्बन्धतद्यतिरेकत्वे च एकसत्त्वस्यैव चापरात्मकतया स्वीकारेण यत्रैकस्य सत्त्वं तत्रैकस्य सत्त्वमिति वचनार्थप्रसङ्गेन पौनरुक्त्याद्व्याप्त्यापातात् यत्र घटाभाव इत्यस्य खल्वयमर्थः, यन्नाम यस्याधेयतया सम्बन्धो घटाभावः तत्रैव घटो नास्तीत्यस्याप्ययमर्थः, तस्याधेयतया सम्बन्धो घटाभाव इति यत्र घट इत्यस्य कोऽर्थः, यस्याधेयतया सम्बन्धी घटः तत्र घटाभावो नास्तीति कोऽर्थः, तस्याधेयतया सम्बन्धो घटाभावसम्बन्धनिषेधः घटाभावसम्बन्धस्य घटाभावात्मकतया घटाभावनिषेधस्यापि घटात्मकत्वेति तस्मात्तस्याधेयतया सम्बन्धी घट इत्येवार्थः, अतो घटतद्भावयोर्भेदं मनसि कृत्वापि न विप्रतिपत्तव्यमिति यत्रैकस्यावस्थानं तत्रैकस्यैवेति नियमाभिप्रायेणापौनरुक्त्यादिरिति चेन्न, नियमस्य यत्किञ्चिदन्यव्यवच्छेदकत्वेनासिद्धत्वापातात् विरोधिव्यवच्छेदकत्वस्य च विरोधानिर्वचनात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावपक्षेऽभावव्यवच्छेदोऽभावपक्षे वा भावव्यवच्छेदो नियमार्थ इति चेन्न, एकरूपानभिधानेऽनुगतरूपविरोधानिर्वचनात्। किं वा भावाभावव्यवच्छेदयोरभावभावविधानातिरिक्तयोरनभ्युपगमे पुनरपि च यत्र भावस्तत्र भावः यत्राभावस्तत्राभाव इत्युद्देश्यविधेयभावानुपपत्तेरभेदादिति पौनरुक्त्याधिकफलाभाव एव। स्यादेतत् भावाभावयोः स्वरूपमेव विरोधः न चैवं, सत्यविरुद्धतापत्तिः यथा सत्ताभावरूपैव सती स्वात्मनि सदिति भवितुर्व्यवहारं करोति तथाभावाभावौ विरोधात्मानावेव स्वात्मनि विरुद्धरूपं भवितव्यवहारम्। कुर्य्याते कस्येतौ विरोध इति चानुयोगे स्वाश्रयस्येत्युत्तरं किन्तत्र विरोधफलमिति प्रश्ने भेदव्यवस्थानमित्यभिधेयम्। यदाह अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चेति, तदेतदनुपपन्नं एतयोर्हि विरुद्धत्वं प्रत्येकं वा स्यात् मिलितयोर्वा नाद्यः प्रत्येकमेवास्यैकत्वभङ्गप्रसङ्गात् नैकत्वाभावो भेदोऽभिमतः किन्तु अन्योन्याश्रयापेक्षभेदरूप विरुद्ध-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्म्मवत्त्वमिति चेन्न, तस्याभावात् कालभेदेनैकस्य भावाभावाश्रयत्वाभ्युपगमात् तद्भेदइति चेन्न, तद्भेदस्य स्वाभाविकस्य विवक्षितत्वे विशेषणवैयर्थ्यात् एकोपाध्यवच्छिन्नत्वस्य विवक्षितत्वे कालभेदाभिमतेऽपि सम्भवात् भिन्नोपाध्यनवच्छिन्नत्वस्य विवक्षितत्वेऽसम्भवात् असहावच्छिन्नभिन्नोपाध्यनवच्छिन्नत्वस्य वाञ्छितत्वे सहसत्त्वस्य च कालरूपत्वेन तत्रापि कालभेदविकल्पाद्वृत्त्यापत्तेः, मिलितत्वञ्चानयोरेकदेशत्वं वा एककालत्वं वा एकप्रकारेण वृत्तिर्वा वृत्तिप्रकारान्यैकोपाध्यवच्छेदो वा, नाद्यः, भावात्यन्ताभावयो स्तदभावात् न द्वितीयः, भावस्य प्रध्वंसप्रागभावाभ्यां तदनुपपत्तेः न तृतीयः, संयोगाद्यव्याप्यवृत्तितावादिपक्षे गमनादौ संयोगभावाभावयोस्तदभावात् अव्याप्यवृत्तिधर्मानभ्युपगन्तृपक्षे भावाभावयोर्वृत्तौ प्रकारान्तराभावे प्रमाणाभावात् नापि चतुर्थः स हि यदि निर्देष्टुं शक्यते, तदापि भावप्रागभावयोर्भावप्रध्वंसयोर्वैकदानभ्युपगमेन तद्विशेषितयोरप्येकदावश्यमनभ्युप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गन्तव्यतया कदा विरोधस्य तदाश्रयतेति वक्तुमशक्यत्वात् किञ्च भावप्रागभावयोर्भावप्रध्वंसयो यदि तथा भावोऽभ्युपगम्यते तदा आश्रयभेदप्रसङ्गः अभावान्तरेऽपि सावकाशत्वान्न परस्परप्रतिषेधात्मकत्वञ्च। अथ नाभ्युपगम्यते तदा भावप्रागभावयोर्भावप्रध्वंसयोश्चाविरोधापत्तिः तत्तदसत्त्वयोर्व्विरोधो न तु तत्तदसत्त्वविशेषयोरिति चेन्न विशेषस्य तथाप्यविरोधात् कदापि सद्भावस्थितियोग्यतापत्तेः नियमेन तथात्वे वा अविरोधव्याघातात् मात्र शब्देन च यदि विशेषशून्यत्वमसत्त्वस्योच्यते तदा तदनभ्युपगम एव प्रमाणाभावात् न हि निर्व्विशेषासत्त्वमात्र सद्भावे प्रमाणमभिधातुं शक्यते। अथ मात्रशब्दोपादाने सत्यपि विशेषे असत्त्वस्य साधारणरूपपुरस्कारेण विरोधस्य व्यवस्थितिप्रदर्शनार्थं तदा भावप्रध्वंसयोस्तादृगेवास्तु दोषापत्तिः प्रध्वंसादौ विशेषे सामान्यरूपस्यावश्यभ्युपगम्यत्वात् तदादायैव विशेषे विरोधपर्य्यवसानात् भावाभावयोर्व्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषानभ्युपगमे तत्राप्यनिष्टापत्तिरिति चेत् केयमापत्तिः। तर्कभेद इति चेत्।

अथ कस्तर्कः अभ्युपगतव्याप्यं प्रति व्यापकप्रसञ्जनं सः, तत्प्रसञ्जनञ्च स्वीकारार्हताबोधनमिति चेन्न, अव्याप्तेः अस्ति ह्यप्रसङ्गेऽपि सम्भावना नाम तर्कः, तद्यथा यदि जलं सहकारिभिः सम्पत्स्यते तदा मे तृषं शमयिष्यतीति इष्टापादनेऽपि गतत्वाच्च। अनभ्युपेतव्यापकमित्यपीति चेन्न तथाभूतस्यापि प्रत्याख्यात् व्यापकप्रसञ्जने गतत्वात् व्याप्येनेत्यपि कार्य्यमिति चेन्न, विकल्पासहत्वात् किं परमार्थतोव्याप्यव्यापकभावव्यवस्थितयोः स्वरूपेणेष्टानिष्टत्वम् उत व्याप्यव्यापकभावेन तत्। नाद्यः तथात्वाज्ञानेन वैपरीत्येनेष्टेनापि प्रसञ्जनप्रसङ्गात् अन्यथा परैस्तथात्वेनानङ्गीकृतेन स्वयमपि परान् प्रति तथात्वेन व्युत्पादयितुमशक्तेन परमार्थस्तथाभूतेन प्रसञ्जने जयप्रसङ्गात्। न द्वितीयः स्वयमपि तद्येष्टानिष्टतायां सत्यां कृते तादृशि प्रसङ्गे यत्नोभयोरित्यादिना दोषेण तत्प्रसङ्गस्यानिष्टेऽपि गततयातिव्यापकत्वात स्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याप्यतयानिष्टेनेत्यपि विशेषणीयमिति चेन्न, स्वयमपि व्याप्यतयेष्टेन स्वमात्रेष्टव्यापके विषये प्रसङ्गस्याव्यापनात्। अथ स्वयमनिष्टव्यापके स्वयं व्याप्यतयेष्टेन यन्न भवति तत्स्वानभ्युपगतव्यापकं परं प्रति पराभ्युपगतेन व्याप्येन व्यापकप्रसञ्जनं तर्कः एवं सति हि स्वानिष्ट व्यापके स्वयमिष्टव्याप्येन यत्र प्रसङ्गः तत्र गमनादतिव्याप्तिर्या च स्वमात्रेष्टव्यापके स्वयमपि वाप्यतयेष्टेन प्रसङ्गस्याव्याप्तिः ते निरस्ते भवत इति चेन्न, यद्यत्र घटोऽभविष्यत् तदा अद्रक्ष्यदित्याद्यव्यापनात् तत्र स्वयमनिष्टदर्शनरूपव्यापके स्वयं व्याप्यतयेष्टेनैव हि दर्शनयोग्येन घटसत्त्वेनासौ प्रसङ्गः। अथ तत्र सत्तयापि स्वयमिष्टेनेति निषेध्यकोटौ प्रवेश्य निषेधोऽभिधीयते एवं यन्न भवति तदपि न एवम्भूते विपर्य्ययापर्य्यवसायिनि गततयातिव्यापकत्वात् विपर्य्ययपर्य्यवसायितेत्यपि प्रक्षेप्यमिति चेन्न, केवलपरपक्षदूषणाय परमात्राभ्युपगम्यमान व्याप्यत्वेनैव क्षमस्य परं प्रति व्यापकप्रसञ्जनस्याव्यापनात् तत्र स्वयं व्याप्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नभ्युपगमेन विपर्य्ययपर्य्यवसायित्वासम्भवात् सप्रसङ्ग एव न भवति विरोधमात्रं तदिति चेन्न, अनिष्टं व्याप्याभ्युपगमबलेन परं प्रत्यापाद्यत इत्येवम्भूतस्यार्थस्योभयत्रापि तुल्यत्वात् तुल्यत्वेऽपि लक्षणकरणासामर्थ्यात् यदि विपर्य्ययपर्य्यवसायिन्येव प्रसङ्गत्वं त्वया परिभाष्यते तर्हि मयापि परबाधनमात्रक्षम एव प्रसङ्गतायाः विपर्य्यपर्य्यवसायिनि तु तत्र विरोधतायाः परिभाषितुं शक्यत्वात् अन्यथा विरोधित्वमेवोभयोरपि स्यात्, प्रत्यवस्थानवैचित्री चेत्तत्र विरोधाद्विशेषः सात्रापि तुल्यैव अतएव सम्भावना तर्कादन्यैवेति निरस्तम् आरोपादपि व्याप्यतानिमित्तव्यापकाभ्युपगमाविशेषात् अतएव परप्रमितेनेति विशिष्य परानिष्टापादानमात्ररूपविपर्य्ययापर्य्यवसायितर्कता निरस्येति निरस्तम्। परमार्थतोव्याप्त्यभावेऽपि पराभ्युपगममादाय प्रसङ्गप्रवृत्तेरुपपत्तेः कथं हि परेण व्याप्यतयानुमतं प्रतिव्यापकानुमत्या नापतितव्यं न हि प्रसङ्गोवास्तवत्वं व्याप्तेरालम्बते किन्नामाभ्युपगममात्रम् अनभ्युपगतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वस्तुगत्या स्थितेनापि तेनापादनाप्रवृत्तेः अत-
एव परस्य प्रमाणेन व्याप्यानुमितिमुत्पाद्यापा-
दनं क्रियते वस्तुगत्या व्याप्यत्वञ्च तथात्वेनाभ्युप-
गतत्वञ्च द्वयमपि प्रसङ्गाङ्गस्यासङ्गमिति चेन्न,
तथात्वे नाभ्युपगमस्यावश्यं प्रसङ्गाङ्गतया मन्त
व्यस्य परानपेक्षस्यैव समर्थत्वेन वास्तवव्याप्यत्व-
स्यापि प्रवेशने प्रमाणाभावात् तस्माद्यः प्रसङ्गः
स्वपक्षसिद्ध्यङ्गं तस्य विपर्य्ययापर्य्यवसायिता
दोषायैव स्यात् प्रसङ्गस्य विपर्य्ययपर्य्यवसान-
दार्ढ्यार्थं दण्डतयोपन्यासात् सौगतानां सत्त्व-
क्षणिकत्वव्याप्तिसाधकविपर्य्ययान्यथाभावदण्ड-
प्रसङ्गवत् तामन्तरेण तस्य स्वपक्षसाधनाक्षम-
त्वात् तस्य व्याप्तिवास्तवत्वमपि मन्तव्यम् अन्यथा
विपर्य्ययेऽपि व्याप्त्यभावेन स्वपक्षसाधनाक्षम-
त्वादेव, यस्तु प्रसङ्गः परपक्षबाधमात्रं, तत्र
पराभ्युपगममात्रं प्रयोजकं तावतैव परपक्ष-
प्रतिक्षेपक्षमत्वेन वास्तवव्याप्तिविपर्य्ययपर्य्यव-
सानपर्य्यन्ताननुसारित्वादिति युक्तं, पश्यामः।
तथा च सति कथितलक्षणासङ्गतिस्तदवस्थैव।
अथ व्याप्याभ्युपगमेनाप्यनिष्टस्य व्यापकस्य

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतिस्तर्क इति चेन्न, दृष्टार्थसम्भावनाया-
मव्याप्तेः। तेन व्यापकस्य प्रतीतिः स इति चेन्न,
दृष्टापादनेऽपि गतत्वात् अप्रमितस्य तथेति
चेन्न, प्रथमानुमानेऽपि गतत्वात् अनुमाने व्या-
प्यस्य प्रमया तथा न त्वभ्युपगमेनेति चेन्न, वस्तु-
गत्या व्याप्यस्य प्रमयापि प्रतिवाद्यसिद्धस्य व्या-
पकानुमानासम्भवेन तत्राभ्युपगमपर्य्यन्तं गन्त-
व्यत्वादेव। नन्वेवमन्यतरासिद्धं व्याप्यं प्रसा-
ध्यानुमानव्यवस्थापनमुच्छिन्नं तदप्रसाधने-
ऽन्यतरासिद्धा तत्प्रसाधने परस्याभ्युपगन्तु-
रपसिद्धान्तमनुद्भाव्य वादिना प्रसाधिताद्व्याप्यात्
व्यापकसाधने पर्य्यनुयोज्योपेक्षणादिति किं
तत्र तथा न स्यात् किमत्रा प्रस्तुतया चिन्तया
अन्यतरासिद्धस्य तावद्व्याप्यस्याभ्युपगमं परेणा-
कारयित्वैव न व्यापकसाधनमभ्युपेयं तस्या-
प्रमा स इति चेन्न, मिथोविरुद्धादौ तर्काभा-
सेऽपि गतत्वात् आश्रयासिद्ध्यादिव्यतिरेके स-
तीति चेन्न, सन्दिग्धधूमदर्शनात् यद्ययं धूम-
स्तदाऽग्निमानिति सम्भावनायाः परमार्थत-
स्तथाविस्थानात् प्रमात्वं त्वकुमपारयन्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्यापनात् तत्कालं प्रमात्वेनाप्रतीयमानत्वेऽपीति चेन्न, बज्ञ्घोदत्तोत्तरत्वात् सर्व्वस्य चास्य पूर्व्वोक्तोभयानिष्टव्यापकेष्टव्याप्योदाहरणे गतत्वेनातिव्यापकत्वात् तद्यवच्छेदार्थमारोपितस्य व्याप्यस्याभ्युपगमेनैति करणे च सिद्धे तद्याप्येन प्रसङ्गस्याव्यापनात् तद्यथा कार्य्यत्वाद्यद्दृष्टमङ्कुरादि मीमांसकः शंसति तदानीमविशेषेण कर्तृकार्य्यमपि पर्य्यवस्येदस्य तदिति। अपि चात्माश्रयोऽन्योन्याश्रयः चक्रकं व्याघातोऽनवस्था प्रतिबन्दीत्याद्यापाद्यैर्भिद्यमाना षट्तर्कीष्यते स्वरूपञ्चैषां स्वस्याव्यवहितस्यापेक्षणमात्माश्रयः अन्योन्यस्याव्यवहितान्योन्यापेक्षित्वमन्योन्याश्रयः अन्तरितस्य तदेव द्वयमात्माश्रयोऽन्योन्याश्रयश्चक्रकं विरुद्धसमुच्चयो व्याघातः उपपाद्योपपादकप्रवाहोऽनवधिरनवस्था स्वाभ्युपगतदोष तुल्यताप्रतिबन्दीति। तत्रात्माश्रयस्य सम्बन्धिद्वारभेदादाभासत्वं यथा प्रमेयत्वस्य आत्मनि वृत्तौ क्वचिन्नैवमपि यथानेककालस्थस्य घटस्य पूर्व्वकालवृत्तेरात्मन उत्तरकालवृत्तिमात्मानं प्रति कारणत्वेऽन्योन्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयस्य व्यक्तिभेदात्, यथा ज्ञानेन संस्कारस्य तेन च ज्ञानजनने चक्रकस्यापि, तस्मात् यथा वीजेनाङ्कुरस्तेन स्तम्बः तेन च वीजं जन्यत इत्यत्र व्याघातस्योपाधिभेदात्, यथा कालभेदादिना जननाजननादौ अनवस्थायाः क्रियायै परम्परानन्त्यापेक्षणात्, यथा सामग्र्याः कार्य्यजननाय स्वसामग्र्यानपेक्षणे तामेतामधोधावन्तीमनवस्थामाचक्षते कचिन्नैर्मितिम्, यथा स्वाश्रये भिन्नबुद्धिजननाय स्वगतभेदानुपजीवनादपि भेदस्यानन्त्येऽप्राग्लोपादिदोषात् तामेतामूर्द्धं धावन्तीमनवस्थामाचक्षते प्रतिवन्द्या अविशेषात्, यथा धूमानुमानेष्वुपाधिशङ्का प्रतिवन्द्यास्तर्कानुकूलत्वादिति तदेतेषामापादनानि तर्काभासाः, कथमुक्तलक्षणेन न संग्राह्याः, सत्यपि व्याप्त्याद्यदोषे प्रसङ्गस्थानगतेन विशेषणेनाभासीभूतत्वात्। प्रसङ्गस्थाने तावतां विशेषणानामभावेनापि लक्षणं विशेषणीयमिति चेन्न, अन्योन्याश्रयाभासत्वप्रयोजकस्य व्यक्तिभेदस्याभावो नानवस्थायामेवमात्माश्रयाभासत्वप्रयोजकस्य द्वारभेदस्याभावो नात्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रयान्तराद्दाविति व्यक्तमव्यापकत्वापत्तेः अपि चापसिद्धान्तविरोधादिष्वपि तर्कलक्षणं गच्छत् कथङ्कारं वारणीयं, यत्रैव निग्रहे तर्कान्तराणामन्तर्भावस्तत्रैवानयोरपीति पृथक् निग्रहानुपपत्तेः आत्माश्रयादेश्च मूलव्याप्तौ प्रमाणोपगमश्चेत् तर्हि प्रामाणिकत्वान्निर्दोषत्वं न चेन्मूलशैथिल्यमित्युभयतः पाशबन्धः कथं मोचनीयः। अथोच्यते यदेतदाश्रयत्वमाश्रयित्वञ्च तद्भेदे दृष्टं तद्यदि विवादाध्यासिते द्वयमुपेयते तदा भेदः स्यादित्याकारेणापादने नोक्तदोषापत्तिरिति नैवम्। एकत्र द्वयस्यापि दृष्टत्वात् तदाश्रयत्वं तदाश्रितत्वञ्च मिथोभेदनियतमिति चेन्न, तन्मिथःशब्दाभ्यां व्यारोपितत्वात् एतदाश्रयत्वादेतदाश्रितत्वाद्वा नैकत्वं स्यादित्यादिवचनभङ्ग्यापाद्यमिति चेत्, नैवम्। यद्येतदेवैतदाश्रयादि स्यात् तदेतन्न स्यादित्याद्यापाद्यं न चैतत् युक्तं धर्मापाद्ययोर्वैयधिकरण्यात्। न च वाच्यम् आपाद्यस्य प्रमाणबाध्यतानुकूलैवेति व्याघातादपि सा भवन्ती न दोषमावहतीति यत आपाद्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादकयोः सामानाधिकरण्यानादरेऽतिप्रसङ्गः स्यात् अतो विपर्य्ययापर्य्यवसायित्वमेव स्यादेवं हि विपर्य्ययोवक्तव्यः।

यन्नाम भवति चैतदेतत् तस्मात् नैतदाश्रय इति नचैतदेतत् भवितुं शक्नोति, एतदित्युद्दिष्टे धर्म्मिण्येतद्विधानासम्भवात् उद्देश्य विधेययोः प्रकारभेदस्याभावात्, न च प्रसङ्गमात्रमेतत् बाधायैवास्तु कृतमस्य विपर्य्ययपर्य्यवसानेनेति युक्तं, स्वयमपि प्रसङ्गमूलस्य व्याप्तेरिष्टतया प्रसञ्जितनिषेधे तद्व्यतिरेकप्रामाण्यस्यावश्यमन्तव्यत्वापत्तेः। अतएवैतदन्यत् स्यादित्यपि न शक्यप्रसञ्जनम्, एतदन्यत्वस्य एतत् स्वरूपभेदमादायैव प्रतीतिपर्य्यवसायितया प्रसङ्गे व्याघातादेवाविपर्य्ययेऽप्येतद्विशेषितान्यत्वविधायिनोऽविशेषणतयाप्रविष्टमात्मानमात्मनि विधीयमानं न क्षमते एतदनन्यत्वस्य एतदन्यान्यत्वस्य एतत्त्वादेव अन्यत्वावधेरात्मन उपलक्षणत्वे चान्यत्वमात्रमुपलक्ष्यमाणमन्यस्मादन्यत्वमादाय पर्य्यवस्येत, स्वरूप एव विलक्षणमन्यत्वविशेषमवधिरात्मोपलक्षयतीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न घटते, यतोऽन्यत्वमात्रमेवावधिविशेषैरुप-
धीयमानं तत्तदन्यत्वप्रत्ययव्यवहारोपपादकं भवदन्यत्वव्यक्तिभेदपर्य्यन्तं गमनं, प्रमाणस्य न सहते यदि चान्यव्यक्तिभेदोऽपि स्यात्, तथापि प्रसङ्गमूलभूता व्याप्तिः सामान्याकारपुरस्कारित्वादेतेनैवोपधीयमानामन्यत्वव्यक्तीनाम् ऐक्यमादाय प्रवृत्ता तथैव प्रसङ्गे विपर्य्यये चोपनयन्ती स्यादेवोक्तदोषालङ्घनायेति एवं प्रकारता चाश्रयाश्रयिभाववत् प्रकारान्तराश्रयेष्वप्यात्माश्रयोदाहरणेष्वतिदिश्यते। अन्योन्याश्रयो यथा भेदेनावगतात् भेदज्ञानोपगमे सोऽपि त्वया कथङ्कारमुपन्यसनीयः न तावत् यद्येतदेतद्बोधाधीनबोधाधीनबोधं स्यात् तदा न बुद्ध्येतेति तथा सति व्याप्त्यसिद्धेः एतद्बोधाधीनबोधं यत्तद्बोधाधीनबोधस्य तस्यैवादृष्टचरत्वात्, कदाचन व्याप्यव्यापकभेदकल्पनया व्यभिचाराप्रतीतचरत्वयोर्वीरणेऽप्यतथात्वशङ्काखण्डकदण्डदुर्लभत्वात्, एवमन्योन्याश्रयान्तरेऽपि चक्रकञ्च मध्ये परमन्तर्भाव्यात्माश्रयान्योन्याश्रयावेव विपरिणमत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति तद्दोषं नातिक्रामति, व्याघातस्तु यथा सन्नास्तीत्यत्र तमपि कथं प्रयोक्ष्यसे यदि यद्ययं सन् स्यात् तदानीमसन्न स्यात् इति, तर्हि असन्न स्यादित्यस्यापि सन्न स्यादित्यस्मिन्नेवार्थे पर्य्यवसानात् अभेदेन व्याप्यव्यापकभावस्यैवा-सिद्ध्यापत्तिः स्वभाव विरुद्धोपजीविनी च विरु-द्धान्तरे तद्व्याघातनिरासादेव निरस्तप्राये गौर्महिषस्ततो न भवति अगवात्मता नियता यतो महिषात्मतेति एष हि तयोर्विरोधः। अनवस्था तु यथा सत्तायामपि सत्तान्तरमि-त्यनवधौ सत्ताप्रवाह इष्यमाणे तत्र कथं प्रत्यव-स्थेयं न तावत् यदि सत्तायां सत्ता स्यात् तदा न विश्रान्तिः स्यात् सत्तायां सत्ताभ्युपगमस्य विश्रान्त्यभावेन सह व्याप्तिसिद्ध्यसिद्धोदोष-ग्रस्तत्वात् प्रति वन्दी च खण्डितैव। किञ्च प्रमेयत्वाभिधेयत्वव्यवहार्य्यत्वसन्निकर्षवत्ताभाव प्रतियोगित्वादीनामात्माश्रितत्वदर्शनात् कथ-मात्माश्रयताखण्डिका व्याप्तिः सव्यभिचारा न स्यात् द्वारव्यक्तिभेदस्यापि व्यभिचारिव्यति-रेकित्वात् स्वप्रकाशत्वादिना स्वयमेव स्वज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्य एवमभावेऽभावमस्वीकुर्वता स्वयमेव स्वाभावत्वस्य एवं तदेव ग्राह्यं तदेव ग्राहकञ्चात्मप्रतीतौ एवं तदेव ज्ञाप्यं ज्ञप्तिकारणञ्च शब्दोवाचक इत्यत्र एवञ्च तदेव नाश्यं नाशकञ्च प्रध्वंसिनि एवं तदेव सम्बन्धि सम्बन्धश्च स्वभावसम्बन्धोपगमे इत्यादि बहुत्वमुपगमादात्माश्रयतदाभासविवेकाय किन्नियामकमुपेक्षम्। अन्योन्याश्रये चान्त्योपान्त्यशब्दयोरन्योन्यनाशकतायां समव्याप्तिकयोश्चान्योन्यव्याप्यव्यापकतायाम् एककार्य्यकारिणाञ्चान्योन्यसहकारितायामेवमन्यस्मिन्नपि तत्र तत्र दर्शनात् कथं न व्याप्तिभङ्गः कश्च विशेषो यद्व्यतिरेको विशेषणमुपादीयेत। तत्र तत्राविरोधात् नैवमिति चेन्न, अन्यत्र तथाभावदर्शनस्य विरोधाभ्युपगममूलस्याविशेषात्। तत्र तत्र तथात्वे प्रमाणसद्भाव एव विशेष इति चेत्तर्हि सर्वत्रानभ्युपगममूलं तथात्वे प्रमाणाभाव एवोपजीव्योद्धरणमिष्यतां कृतमन्योन्याश्रयेण व्यभिचरितदोषत्वेनेति। चक्रकेऽपि दुःखजन्मादिसूत्रोक्तादिषु व्यभिचारदर्शनात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अव्याप्तिर्विशेषव्यतिरेकदर्शनदुःसहत्वञ्च कार्य्यकारणभावस्य तज्जातीयतया नियतत्वेन व्यक्तिभेदस्य चक्रकानन्तर्भूतत्वात्। व्याघातेऽप्येकस्यैव जनकत्वाजनकत्वे तथा न च कालभेदादिर्व्विशेषो घटते घटतत्प्रध्वंसादौ कालभेदेऽपि तादात्म्यव्याघातोपगमादेव सत्प्रतिपक्षजात्योश्च कोविशेषो व्याघाते येन पूर्व्वत्र बाध्यबाधकयोर्द्वयोरप्याभासत्वमुत्तरत्र तूत्तरस्य परं तथोपेयत इति गुरवः। यद्यपि हि प्रतिपक्षहेतुः साध्यान्तरसाधक इत्यस्ति तस्य जात्युत्तरवैधर्म्यं तथापि त्वद्धेतुरसाधकः समबलप्रतिपक्षप्रतिहतत्वादित्यस्य दूषणत्वार्थमवश्यापेक्षस्य द्वारात्मव्याघातकत्वात् साक्षाद्वावश्योपस्थाप्यस्य द्वारेण वा स्वव्याघातकतायासुपयुक्तविशेषाभावात्। न च तत्रास्तामेव व्याघातः सत्प्रतिपक्षता तु निरवद्यैवेति शक्यं मन्तुं, यतः शब्दादेर्नित्यत्वमेकस्मादनित्यत्वञ्चापरस्मादनुमानात्तथा सति किं न स्यात् तयोर्व्विरोधग्राहिणः प्रमाणस्य बलादिति चेन्न, यथा नित्यत्वमनित्यत्वमित्युभयमास्तामित्याच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ष्महे तथा विरुद्धत्वमविरुद्धत्वञ्चास्तामित्यपि ब्रुवतोऽस्मान् कथं वारयिष्यसि। स्याद्येवं यदि सत्प्रतिपक्षत्वमेव तत्र दोषो न स्यादिति चेत् तर्हि मन्तव्यं प्रथमस्य हेतोः समानबलप्रतिपक्षहेतुप्रतिहतत्वादसाधकत्वमित्युक्तमावर्त्तते अनवस्थायाञ्च यस्यां यस्यां सत्तायामपरापरा सत्तापाद्या तस्यास्तस्याः प्रमाणेन सिद्धौ नानवस्थादोषः स्यात् असिद्धौ चाश्रयासिद्धविषयमापादनमिति। यदि चात्माश्रयादिषु सर्व्वत्र विशेषोऽयमभिधीयते प्रमाणसिद्धत्वात् तत्र तत्र तथोपेयत इति तर्ह्यापादनस्थाने तथाभ्युपगमाय प्रमाणं नास्तीत्युक्तं भवति तथा च तत्र प्रमाणप्रश्नस्यावसरो न प्रसङ्गस्येति। अपरेऽपि विषयभेदात् तर्कभेदा आत्माश्रयादिवत् मन्तुमुचिताः तद्यथा अविनिगमः उत्सर्गः कल्पनागौरवलाघवे चानौचित्यञ्चेति। विकल्पेनान्वययोग्ये नैकस्मिन्नभ्युपगते तदेकदेशान्वयनियमनिर्द्धारणाशक्यत्वमविनिगमः सत्प्रतिपक्षहेत्वोरिव निर्द्धारयितुमशक्यान्वययोः परस्परप्रतिक्षेप एव पर्य्यवसा-

CC-0. In Public Domain. Digitization by eGangotri

नात् नन्वन्यतरमादायापि प्रकृतस्योपपत्तिसम्भवेनाविनिगमस्य दोषत्वमेव अनुपपन्नं केवलं पुंसः तत्र यदि संशयः स्यात् स च किं न स्यादिति चेन्न, भावानवबोधात् प्रमाणासत्त्वेन क्वचिदपि विशेषः कथमभ्युपगन्तुं शक्यो यमादाय वस्तुगत्याप्येकस्यान्वयः स्यात्। नन्वेवं प्रमाणाभाव एव दोषः स्यान्नाविनिगम इति चेन्न, तस्याविनिगमोन्नेयत्वेनाविनिगमस्यैव प्रथमोपनतस्योपन्यासौचित्यात्। नन्वेवमनुमानेऽपि व्यक्त्यविनिगमो दोषः स्यादिति चेन्न, अनेकव्यक्तीनामभ्युपगमसिद्धभावात् सामान्योपसंहारस्यैकामेव व्यक्तिमाच्छेत्तुं सामर्थ्यात् अविनिगमस्य चानेकाभ्युपगमे सत्युपस्थानादिति बाहुल्यदृष्टमपेक्ष्याबाहुल्यदृष्टतया दुर्बलस्याभ्युपगमानर्हतोत्सर्गः तद्यथा स्वस्य जाग्रतो ज्ञानं प्रति प्रामाण्याप्रामाण्यनिर्द्धारकप्रमाणानुपनिपाताविशेषेऽपि विना बाधकमप्रामाण्यमभ्युपगच्छन्तं प्रति स्यात् न तु प्रामाण्यं यं तर्कमेवालम्ब्याङ्गः। "तस्माद्बोधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्मकत्वेन प्राप्ता बुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत,, इति।

प्रष्टव्योदाहरणञ्चैतदीश्वराभिसन्धौ वेदप्रामाण्ये तथा यथा सौगतोऽपि न विप्रतिपत्तुमर्हति। ननु बलवदेककोटिकः संशय एवोत्सर्गः तत् कथं तर्कः स्यादिति चेन्न उत्सर्गस्य सम्भावनायाः स्वार्थस्थित्यनुकूलतयावलम्ब्यत्वात् संशयस्य त्वनेवम्भावात् उत्सर्गस्यैककोटिनिविष्टत्वात् संशयस्य च कोटिद्वयावगाहितत्वात् एतेन संशयस्यैका बलवती या कोटिः सैवोत्सर्ग इति निरस्तम्। निर्णयोऽपि संशयस्यैवं वस्तुनियतकारणजत्वरूपबलशालिनी कोटिः स्यात्। स्यादप्येवं यद्युत्सर्गवन्निर्णयेऽपि संशयानुस्मृतिः स्यादिति चेन्न, उत्सर्गोदाहरणे उत्सर्गमाद्रियमाणैः संशयोच्छेदानुमतेरेव बाधाभावं सहकारिणमपेक्ष्योत्सर्गमात्रैकभाव एव प्रमाणीभवनात्। तस्मात् यथानवस्थादयोबाधाद्दूषणत्वं त्यजन्तस्तदभावे दूषणानि भवन्ति तथोत्सर्गोऽपि तथैवेति सुगमासुगमयोरसुगमदुर्बलत्वं कल्पनागौरवं दृष्टजातीय-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सवैव्याद्दष्टजातीयं दुःखेन प्रतीयते अल्पम-
पेक्ष्य च वह्नित्याद्यखिलज्ञानानुभवसिद्धमेतत्
दर्शितञ्चेदं विविच्य ईश्वरासिद्धौ यथा
नैयायिकादिकं प्रति चित्यादिषु प्रतिकार्य्या-
कर्तृणां भिन्नानामभ्युपगमापादके यथा च
सौगतं प्रति प्रत्येकं कारणानां समर्थानाम-
नेकसमानदेशकालानेक नीलादिव्यक्त्युत्पादके
वेति दूषणानुकूलमिदं तद्यतिरेकेण कल्पना
लाघवं साधनानुकूलं प्रामाणिकाव्यवहार्य्यत्व-
मसमाधेयजातीयमनौचित्यं वैजात्यनामकं
तस्य भेदाः प्रश्नवैजात्यादयः । प्रश्नविषयसम्प्र-
सिद्धतां प्रष्टरि प्रश्नानौचित्यं प्रश्नवैजात्यं यथा
अवस्तुनि विधिनिषेधयोः किमिच्छसीति पृ-
च्छति प्रमाणव्यवहारिणं सौगते अतएवा-
वानौचित्यापरनामकं वैजात्यं परस्य दोषं म-
नसि कृत्वैके ब्रुवते अत्र सचेतसां मूकतैवोचि-
तेति । अपरे च न ह्यप्रतीते देवदत्ते स किं
गौरः कृष्णोवेति वैजात्यं विना प्रश्नः स्यादिति ।
यदि चेदमनौचित्यं नाम दोषोनाभ्युपेयते
तदानीमर्थान्तरस्यार्थान्तरेण परिहारात् तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्परामालम्बितुकामः न केनाप्या दोषेणा-र्थान्तरपरिहाराभासत्वादिन्यर्थान्तरेणैव तत् परिहरणमनुचितमित्यतोऽन्येन जीयेत अर्था-न्तरनिग्रहतायां विप्रतिपन्नोऽपि प्रश्नपरम्परा-मालम्ब्य स्वभङ्गभयात् कथावसानमनिच्छन्तं कथं जयेत् न चानवस्थयेति वाच्यं यावदुत्तर-मर्थान्तरेण परिहरणे प्रश्नान्तरेण वा द्वयो-रप्यनवस्थासाम्यात्। "दोषं व्यक्तिविवेके स्वं कविलोके विलोचने। काव्यमीमांसिषु प्राप्त महिमा महिमाहृत,,।

ननु कथमत्र प्रामाणिकाव्यवहार्य्यत्वमिति दृष्टेन यदि मूकत्वमालम्ब्य तथात्वं वादिनि न व्युत्पाद्यते तदानीमप्रतिभा। अथ तथात्वं व्युत्-पाद्यते प्रश्नार्थादेः प्रमाणाविषयत्वमुपन्यस्य तदात्यन्तासद्व्यवहार्य्यता स्वीकृतैव स्यादिति चेदत्र ब्रूमो, मूकतैवात्र विजयायेति न चा-प्रतिभैवं प्रसज्यते, उत्तरस्याप्रतिपत्तिरुत्तरा-र्हस्येति तल्लक्षणविशेषणात्, यदि चायं नियमो वादिनेष्यते यदा भ्रान्त्यैव तेन व्यवहर्त्तव्य-मनुवादादन्यत्रेति, तदा मध्यस्थोद्ग्राव्यत्वमस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषस्योपेयतां मध्यस्थेन ह्यपभ्रंशभाषयापि यथा वादिप्रबोधनं क्रियते, तथा यद्यप्रामाण्यमालम्ब्यापि क्रियेत तदा को दोषस्तस्य स्यात् तत्र विषये तथैव तेन वादिबोधनस्य शक्यत्वात्। तस्मान्मध्यस्थं प्रत्युत्तरदानं स्वदोषपरिहाराय प्रतिवादिनापि वैजात्यलक्षणप्रदर्शनं कार्य्यं मध्यस्थं प्रति तस्याप्रमाणेनापि बोधने निर्दोषत्वात्। ननु वादिभ्यामेव वादिनि मध्यस्थेन वा तं प्रति वादिना वात्यन्तासद्विषयव्यवहारोपगमे कथं नासत् ख्यातिः स्वीकृता स्यात्, किं न स्यात् विशिष्टरूपे सम्बन्धांशे वा सत्ख्यातेरन्यथाख्यातिवादिभिरभ्युपगमात्। ननु बन्ध्यासुताच्छशविषाणं भिन्नमित्यादिषु व्यवहारतः कथं विशेष्ये विशेषणेऽपि च नासत्ख्यातिरभ्युपगन्तव्येति चेन्न, असत्ख्यात्यनभ्युपगमस्य सत्ख्यातित्वात्यागनियमविश्रान्तत्वात् असदपि सदुपश्लिष्टमेव प्रतिभासते न तु केवलमसत्कयापि ख्यात्या समुल्लिख्यत इत्यन्यथाख्यातिवादिभिरभ्युपगमात्, बन्ध्यासुताच्छशविषाणं भिन्नमिति प्रतिपत्त्यापि हि भिन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्ययमंशः सामान्यतोऽन्यत्र दृष्ट एव प्रतीयते केवलं भेदस्य सदाश्रयः प्रतियोगि चेति। यद्वस्तुतस्तदसदाश्रयः प्रतियोगि च तस्येत्यन्यथा कृत्वा प्रतीयत इत्यन्यथाख्यातिरेवोपगता भवति यथा तु विशिष्टमत्यन्तासदेव तथाश्रयः प्रतियोगिनौ अत्यन्तासती एव किमिति न प्रतिभासेतेतावतापि यथोक्तान्यथाख्यात्यनुल्लङ्घनादेव। न चैवमसत्ख्यातिवादिनापि शक्यं वक्तुं केवलं सदेव प्रकाशत इत्यस्मात् पश्चात् विपरीतं विशिष्टं सम्बन्धश्च क्वचित् विशेषणाद्यप्यत्यन्तासद्भ्रान्तग्रोल्लिखित इत्येवंरूपा तावदसत्ख्यातिः परेणोपगतैव यदि तु सदपि प्रकाशते किञ्चित् तत् किन्न प्रकाशत इति, यतः परेण विकल्पः सर्व्वथा वस्त्वनुल्लेखो केवलमलीकमुल्लिखन्नसत्ख्यात्यात्मा स्वीक्रियते यदि तु यथोक्तमेव परोऽभ्युपगच्छति तदानीमनुमानप्रामाण्यादिवत् अत्रापि विप्रतिपत्तिरेवेति। नतु सर्व्वथैवासत्ख्यातिरपि भवता मन्तव्यैव, तथा हि बन्ध्यासुतशशविषाणे कूर्म्मरोमैवेति वदतः शब्दादर्थः प्रतीयतां किं तदर्थमात्रमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुल्लेख्यं तत्प्रतीतेरिति चेन्न, तत्रापि तादा-
त्म्यस्य सामान्यतोऽत्र प्रतीतस्यैवासदुपहितस्य
स्फुरणोपगमात् प्रकारभेदवैशिष्ट्येन भिन्नयो-
रेकत्वं हि तादात्म्यं भिन्नान्यत्वाख्यमेव तर्कसंग्र-
हाख्यासप्रमाख्यां जननेऽपि तत्तत्प्रमावत् मध्य-
स्थाद्यप्रमया प्रमा नौचित्यादिप्रमोत्पादनावि-
रोधो बाधवत् भ्रमविषया तथाभावेऽपि भ्रम-
स्याप्रमात्वपारमार्थिकतावत् प्रमस्य विषया-
सत्यत्वेऽपि प्रमानौचित्यसत्यतोपपत्तिरेव एतेन
भ्रान्तिजायाधियः प्रमात्वं तथाप्यहष्ट चरमि-
त्यपि परास्तप्रायमिति । एवमन्यत्राप्येवम्वि-
धोदाहरणं वाच्यं न च कश्चिदुक्तप्रकारमन्य-
थाख्यातिसमाधानं नानुमन्तुं शक्नोति अन्यथा
कथमसत्ख्यातिवादिनोमतमपि जानीयात्
अज्ञात्वा च स्वपरमतवैचित्र्यं कथं वादे प्रव-
र्त्ततेति तत्र ते सर्व्वेऽपि तर्काः प्रमाणविरोधे
वा प्रमाणाभावे वा निष्पीडिताः प्रविशन्तो न
बाधासिद्धिभ्यां भिद्यन्ते पूर्व्वैरपि लोकसिद्ध-
त्वात् व्यवहृताः केवलमस्माभिरेव तर्कपदव्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मभिषिक्ता: ततो न प्रबन्धेन निरस्यन्ते "विप्रदुष्टोऽपि सम्बर्द्धा स्वयं छेत्तुमसाम्प्रतमिति,, ।

ये च परैस्तर्कदोषा: षट् स्वीक्रियन्ते आश्रयासिद्धिरनुकूलत्वं मूलशैथिल्यमिष्टापादनं विपर्य्ययापर्य्यवसानं मिथोविरोधश्चेति सोऽयं तर्कस्य दोषविभागेनोपपद्यते, व्याप्तिपक्षधर्म्मत्वयो: प्रतीतिमपेक्ष्य यथानुमानं जायते तथैव तर्कोऽपि इयान परमनयोर्व्विशेषो यदनुमानं तयो: प्रमित्या जायते तर्कस्तवास्तवाभ्यामपि ताभ्यां पराभ्युपगममात्रसिद्धाभ्यां भवति, तेन विमृष्यमाणस्तर्क: पराभ्युपगममात्रप्रसादसिद्धपरिकरो नाश्रयासिद्धमपि यावत् वास्तवीमनुरोद्धुमधिकरोति, तत: प्रमित्यभ्युपगमनसिद्धिकृतवैचित्र्याश्रयात् भेदादन्यो यावान्, यथा च हेत्वाभासविभागस्तद्वदेव तर्काभासविभागोऽपि न्याय्य: । तस्मादाश्रयासिद्धिमूलशैथिल्येष्टापादनान्यसिद्धिरेकैव दोषोऽनुमानवत् तत्राप्रमितत्वावलम्बिनी इह त्वनभ्युपगमावलम्बिनीति विशेष: । मिथो विरोधश्च सत्प्रतिपक्षतैव, विपर्य्ययापर्य्यवसानन्तु दोषएवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादनस्य न भवति, यन्नाम विपर्य्ययापर्य्यवसानादापादनमेवात्मसाधनानुकूलं न भवति, तदन्यदेव किमपि वाच्यं विरुद्धव्यभिचारादिष्वनुमानवत्तर्केऽपि दोषाः पृथग्वाच्याः। बाध उत्सर्गसम्भावनादेरन्यत्रानुकूलस्तर्कस्य सप्तममपि दोषं तर्कस्यापत्तिसाध्यं नोपगच्छामः। स चोभाभ्यामभ्युपगतव्याप्येऽनभ्युपगतव्यापके प्रागेव दर्शित इत्यास्तां विस्तर इति॥

एवम्प्रकाराणि तत्तल्लक्षणेषु खण्डनान्यूहनीयानि।

तदेतासु खण्डनयुक्तिषु कामपि स्थानान्तरस्थां केनापि प्रकारान्तरेणानीय तत्सदृशीमन्यां वा स्वयमूहित्वा परैर्विविच्यमानान्यपि पदार्थान्तराणि बुद्धिमता बाधनीयानि। अत्र चास्माभिर्दूषयितुं शङ्कितेभ्यः परपक्षप्रकारेभ्यो यदि प्रकारान्तरं कोऽपि स्वयमूहति उक्तानां बाधकानां मध्ये कचित् स्वप्रज्ञया समादध्यात्, तत्र च खण्डनवादिनः प्रस्तुता प्रतिक्रिया न स्फुरेत्तदा परेण प्रयुज्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माने वाक्ये बहुपदात्मके कस्यचित् पदस्यार्थं खण्डयितुं खण्डनान्तरमवतारणीयम् एवं तत्रापि परेण प्रत्याघोषणे पुनस्तथैव शाखान्तरेषु संक्रमणीयमिति खण्डनमये चक्रे सम्यगवधेयम्। न च शाखान्तरसंक्रान्तावर्थान्तरं पतेत् अप्रकृतत्वाभावात्। न चैकनिर्णयारम्भेऽन्यसंक्रान्तावनौचिती स्यात् शब्दोनित्याकृतकत्वादित्यादौ परेणोक्ते कृतकत्वादौ अप्रतिपत्तव्यत्वापत्तेरन्यतरासिद्ध्याद्युच्छेदापातात्। येन हि तन्निर्वाह्यते तदनिर्वचनीयतयापि निर्वाह्यानिर्वचनीयतैवेति तस्मात्॥

"तत्तुल्यौ हस्तदीयञ्च योजनम् विषयान्तरे।
प्रदङ्खता तस्य शोषे च त्रिधा भ्रमति मत्क्रियेति॥"

ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया, प्राज्ञम्मन्यमना हठेन पठितीमास्मिन् खलः खेलतु। श्रद्धाराध्यगुरुः श्लथीकृतदृढग्रन्थिः समासादयत्वेतत्तर्करसोर्म्मिमज्जनसुखेष्वासञ्जनं सज्जनः॥ ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात् यः साक्षात् कुरुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिषु परंब्रह्म प्रमोदार्णवम्। यत्काव्यं मधुवर्षिधर्षितपरास्तर्केषु यस्योक्तयः श्रीहर्षस्य कवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम्॥

इति श्रीहर्षकृतानिर्वचनीयसर्वस्वे खण्डनखण्डखाद्ये तुरीयः सङ्कीर्णपरिच्छेदः समाप्तम्।

कलिकाता

निमतलाघाट ष्ट्रीट ८ संख्यक भवने संवाद-ज्ञान-रत्नाकरयन्त्रे श्रीभुवनचन्द्रवसाक-द्वारा मुद्रित।

सन १२८४ साल।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खण्डन-खण्ड-खाद्यम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

२०५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu